वर्णप्रकरणम्	पत्राङ्काः	श्लोकाङ्काः	वर्णप्रकरणम्	पत्राङ्काः	श्लोकाङ्काः
जषट्कम्	४३	२७	ढैककम्	५८	१
	—		ढद्विकम्	५८	१
झैककम्	४३	१	ढत्रिकम्	५८	६
झद्विकम्	४३	१	ढचतुष्कम्	५९	११
	—			—	
ञैककम्	४३	१	णैककम्	५९	१
ञद्विकम्	४३	१	णद्विकम्	५९	२
ञत्रिकम्	४४	४	णत्रिकम्	६२	३३
	—		णचतुष्कम्	६८	८९
टैककम्	४४	१	णपञ्चकम्	७०	११२
टद्विकम्	४४	२	णषट्कम्	७१	११७
टत्रिकम्	४७	२३		—	
टचतुष्कम्	५०	५८	तैककम्	७१	१
टपञ्चकम्	५१	६७	तद्विकम्	७१	२
	—		तत्रिकम्	७९	७६
ठैककम्	५१	१	तचतुष्कम्	८९	१७५
ठद्विकम्	५१	१	तपञ्चकम्	८४	२२८
ठत्रिकम्	५२	१०	तषट्कम्	८५	२३२
ठचतुष्कम्	५३	१७	तसप्तकम्	८५	२३४
	—			—	
डैककम्	५३	१	थैककम्	८५	१
डद्विकम्	५३	१	थद्विकम्	८५	२
डत्रिकम्	५६	२७	थत्रिकम्	८७	१४
डचतुष्कम्	५८	२७	थचतुष्कम्	८८	२५

वर्णप्रकरणम्	पत्राङ्काः	श्लोकाङ्काः
दैककम्	९८	१
दद्विकम्	९८	२
दत्रिकम्	१००	१७
दचतुष्कम्	१०३	४३
दपञ्चकम	१०४	५६
धैककम्	१०५	१
धद्विकम्	१०५	२
धत्रिकम्	१०७	२६
धचतुष्कम्	१०८	४०
धपञ्चकम्	११०	४८
नैककम्	११०	१
नद्विकम्	११०	१
नत्रिकम्	११३	२६
नचतुष्कम्	१२६	१६२
नपञ्चकम्	१३३	२२८
नषट्कम्	१३६	२५४
पैककम्	१३६	१
पद्विकम्	१३६	२
पत्रिकम्	१३७	१२
पचतुष्कम्	१३८	२३
पपञ्चकम्	१३८	३१

वर्णप्रकरणम्	पत्राङ्काः	श्लोका
फैककम्	१३८	१
फद्विकम्	१४०	२
बैककम्	१४०	१
बद्विकम्	१४०	२
बत्रिकम्	१४१	८
बचतुष्कम्	१४२	१५
बपञ्चकम्	१४२	१७
भैककम्	१४२	१
भद्विकम्	१४२	२
भत्रिकम्	१४३	१०
भचतुष्कम्	१४५	२४
मैककम्	१४५	१
मद्विकम्	१४५	२
मत्रिकम्	१४८	३८
मचतुष्कम्	१५१	५८
यैककम्	१५२	१
यद्विकम्	१५२	३
यत्रिकम्	१५८	६७
यचतुष्कम्	१६३	११५
यपञ्चकम्	१६५	१३२

वर्णप्रकरणम्	पत्राङ्का	श्लोकाङ्का	वर्णप्रकरणम्	पत्राङ्का	श्लोकाङ्का
यषङ्कम्	१६५	१३४	शद्विकम्	२२१	२
	——		शत्रिकम्	२२७	१
रैककम्	१६६	१	शचतुष्कम्	२२४	३१
रद्विकम्	१६६	३		——	
रत्रिकम	१७६	१०३	षैककम्	२२६	१
रचतुष्कम्	१८०	२४०	षद्विकम्	२२६	२
रपञ्चकम्	१८६	३०२	षत्रिकम्	२२८	२८
	——		षचतुष्कम्	२३१	४८
लैककम	१८७	१		——	
लद्विकम्	१८७	२	सैककम्	२३२	१
लत्रिकम्	२०३	५७	सद्विकम्	२३२	२
लचतुष्कम्	२१२	१४७	सत्रिकम्	२३३	१४
लपञ्चकम	२१४	१६८	सचतुष्कम्	२३७	४७
	——		सपञ्चकम्	२३८	६५
वैककम	२१४	१	सषङ्कम्	२३८	६८
वद्विकम्	२१५	३०		——	
वत्रिकम	२१७	३०	हैककम्	२३८	१
वचतुष्कम	२२०	५६	हद्विकम्	२३८	२
वपञ्चकम्	२२१	६६	हत्रिकम्	२४१	१३
	——		हचतुष्कम्	२४२	२६
शैककम्	२२१	१	हपञ्चकम्	२४३	३४

अव्ययानि ।

प्रकरणम्	पत्राङ्काः	श्लोकाङ्काः	।	वर्णप्रकरणम्	पत्राङ्काः	श्लोकाङ्काः
स्वराव्ययम्	२४४	२	।	नान्तम्	२४८	४०
न्तम्	२४५	११	।	पान्तम्	२५०	४६
ान्तम्	२४६	१२	।	भान्तम्	२५१	[illegible]
ान्तम्	२४६	१३	।	मान्तम्	२५१	४८
चान्तम्	२४६	१३	।	यान्तम्	२५२	६३
जान्तम्	२४६	१६	।	रान्तम्	२५३	६५
ठान्तम्	२४७	१७	।	लान्तम्	२५४	७३
णान्तम्	२४७	१८	।	वान्तम्	२५४	७४
तान्तम्	२४७	१९	।	षान्तम्	२५४	७८
थान्तम्	२४८	३५	।	सान्तम्	२५५	७९
दान्तम्	२४९	३९	।	हान्तम्	२५५	८५
धान्तम्	२४९	३९	।		——	

क्तान्तादिष्वव्ययेषु स्वरवत्त्वमविवेचितम् ।

मेदिनी

उत्पलिनीशब्दार्णवसंसारावर्त्तनाममालाख्यान् ।
भागुरिवररुचिशाश्वतवोपालितरन्तिदेवहरकोषान् ॥१॥
अमरडुभाड्गलायुधगोवर्द्धनरभसपालकृतकोषान् ।
रुद्रामरदत्ताजयगङ्गाधरधरणिकोषांश्च ॥२॥
हारावल्यभिधानं त्रिकाण्डशेषञ्च रत्नमालाञ्च ।
अपि बहुदोषं विश्वप्रकाशकोषञ्च सुविचार्य ॥३॥
वामटमाधवशाश्वततिधर्मव्याडितारपालाख्यान् ।
अपि विश्वरूपविक्रमादित्यनामलिङ्गानि सुविचार्य ॥४॥
कात्यायनवामनचन्द्रगोमिरचितानि लिङ्गशास्त्राणि ।
पाणिनिपदानुशासनपुराणकाव्यादिकञ्च सुनिरूप्य ॥५॥
षट्शतगाथाकोषप्रणयनविख्यातकौशलेनायम् ।
मेदिनिकरेण कोषः प्राणकरसूनुना रचितः ॥६॥

॥ मेदिनी ॥

ओं नमो गणेशाय।

वृषाङ्काय नमस्तस्मै यस्य मौलिविलम्बिनी।
जटावेष्टनजां शोभां विभावयति जाह्नवी ॥१॥
पातु वो मदकालिम्ना धवलिम्ना रदस्य च।
गङ्गायमुनयोः सङ्गं वहन्निव गजाननः ॥ २ ॥
पूर्वाचार्यकृतो वीक्ष्य शब्दशास्त्रं निरूप्य च।
नानार्थशब्दकोषोऽयं लिङ्गभेदेन कथ्यते ॥ ३ ॥
प्रायशो रूपभेदेन विशेषणवशात् क्वचित्।
स्त्रीपुनपुंसकं ज्ञेयं विशेषोक्तेश्च कुत्रचित् ॥ ४ ॥
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने च द्वयोरिति।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥५॥
रूपाद्युक्तं लिङ्गमुक्तं लिपिभ्रान्तिच्छिदे क्वचित्।
विशेष्यनिघ्नेऽनुक्तोऽपि विज्ञेया वाच्यलिङ्गता ॥ ६ ॥
गुणे शुक्लादिकट्वाद्याः पुंसि स्युस्तद्वति त्रिषु।
तीक्ष्णाद्यास्तु गुणे क्लीबे गुणिलिङ्गास्तु तद्वति ॥७॥

क्लीवपुंसोरपि क्लीवं काप्यस्पत्वविवक्षया।
जातिवाचकशब्दानामपि तत् क्लीविवक्षया ॥ ८ ॥
उद्भिदः प्रसवे क्लीवे हरीतक्यादयः स्त्रियाम्।
पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ ९ ॥
प्राङ्गानार्थोऽनु तल्लिङ्गं द्वयोर्द्वन्द्वे न चैकता।
शब्दावृत्ति र्न लिङ्गैक्य सप्तमी न विशेषणे ॥ १० ॥
क्लीवे नपुंसके पुंसि स्त्रियां योषिति च द्वयोः।
त्रिषु चेत्यादि यद्रूपं तल्लिङ्गस्यैव वाचकम् ॥ ११ ॥
नानार्थः प्रथमान्तोऽत्र सर्व्वत्रादौ प्रदर्शितः।
सप्तम्यन्तोऽभिधेयेषु वर्त्तमानो विनिश्चितः ॥ १२ ॥
एकद्वित्रिचतुष्पञ्चषड्वर्णानुक्रमात् छतः।
खरकाद्यादि-कायन्त-वर्गै र्नानार्थसंग्रहः ॥ १३ ॥
नानार्थकोपपुस्तकभावार्ज्जनंदुःखहानये क्षतिनः।
मेदिनिकरकृतकोपो विशुद्धलिङ्गोऽभिलिख्यतामेकः॥१४

कैककम्।

को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे।
कामग्रन्थौ चक्रिणि च पतत्रिणि च पार्थिवे ॥ १५ ॥
मयूरेऽग्नौ च पुंसि स्यात् सुखशीर्षजलेषु कम्।

कद्विकम्

अर्कोऽर्कपर्णे स्फाटिके रवौ ताम्रे दिवस्पतौ ॥ १६ ॥

अङ्को रूपकभेदागश्चिह्नरेखाजिभूषणे।
रूपकांशान्तिकोत्सङ्गे स्थानेऽकं पापदुःखयोः ॥१७॥
एकः सङ्ख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु।
कर्कः कर्के तले वह्नौ शुक्लाश्वे दर्पणे घटे ॥ १८ ॥
कङ्कः स्कन्दद्विजे ख्यातो लोहपृष्ठकृतान्तयोः।
कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके ॥ १९ ॥
विट्किट्टयोश्च पापे त्रिषु पापाशये पुनः।
काकः स्याद् वायसे वृत्तप्रभेदे पीठसर्पिणि ॥२०॥
शिरोऽवक्षालने मानप्रभेद-दीपभेदयोः।
काकास्यात्काकनासायां काकोलीकाकजङ्घयोः॥२१
रक्तिकायां मलपूश्च काकमाच्याञ्च योषिति।
काकं सुरतबन्धे स्यात् काकानामपि संहतौ ॥ २२ ॥
किष्कुर्द्वयो वितस्तौ च सप्रकोष्ठकरेऽपि च।
कोकश्चक्र-वृक-ज्येष्ठी-खर्जूरीद्रुम-दर्दुरे ॥ २३ ॥
केको गृहाश्रित-मृगपक्षिणो नागरे त्रिषु।
टङ्को नीलकपित्थे च खनित्रे टङ्कणेऽस्त्रियाम् ॥२४॥
जङ्घायां स्त्री पुमान् कोपे कोपाशिग्रावदारणे।
तर्कः कांक्षावितर्कोहहेतुशास्त्रेषु कथ्यते ॥ २५ ॥
त्रिका कूपस्य नेमौ स्यात् त्रिकं पृष्ठाधरे त्रये।
तोकं पुत्रे सुतायाञ्च द्विकः स्यात् काककोकयोः॥२६॥

न्यङ्कुर्मुनौ मृगे पुंसि नाकस्तु त्रिदिवेऽम्बरे।
नाकुर्मन्यन्तरे पृथ्वीधरवल्मीकयोः पुमान् ॥ २७॥
निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः।
वक्षोऽलङ्करणे हेममात्रे हेमपलेऽपि च ॥ २८ ॥
पङ्कोऽस्त्री कर्दमे पापे पाकः परिणतौ शिशौ।
केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च॥२९॥
वकस्तु वकपुष्पे स्यात् कङ्के श्रीदे च रक्षसि।
भेकं छिद्रे च काले च भेको मण्डूकमेघयोः ॥ ३० ॥
मुष्को मोक्षकवृक्षे स्यात् सङ्घाते वृषणेऽपि च।
मूक स्त्ववाचि ना दैत्ये रङ्कुः क्षपणमन्दयोः ॥३१॥
राका नद्यन्तरे कच्छां नवजातरजःस्त्रियाम्।
सम्पूर्णेन्दुतिथौ रेकः शङ्कानीचविरेचने ॥ ३२ ॥
रोकस्तु क्रयभिद्दीप्त्योः रोकं नावि चले विले।
लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च ॥ ३३ ॥
लोको जनेऽपि भुवने वल्कं वल्कलशल्कयोः।
वङ्कः पर्य्याणभागे ना नदीपात्रे च भङ्गुरे ॥ ३४ ॥
शल्कन्तु शकले वल्के शको जात्यन्तरे नृपे।
शङ्कुः सङ्ख्यास्त्रयादौ भित्कीले शकलुपेषु ना ॥३५॥
शङ्का त्रासे वितर्के च शाको द्वीपान्तरेऽपि च।
शक्तौ द्रुमविशेषे च पुमान् हरितकेऽस्त्रियाम् ॥३६॥

शुको व्याससुते कीरे रावणस्य च मन्त्रिणि ।
शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम् ॥ ३७ ॥
शुल्कं घट्टादिदेये स्याद् वरादर्थग्रहेऽस्त्रियाम् ।
शूकोऽस्त्री शूङ्कदययोः श्लोकः पद्ये यशस्यपि ॥ ३८ ॥

कत्रिकम्

शौकं शुकगणे स्त्रीणां करणे स्रक इत्ययम् ।
बाणवातोत्पले स्तोकं त्रिष्वल्पे चातके पुमान् ॥ ३९ ॥
अशोक स्त्रिषु निःशोके पुंसिकङ्केल्लिपादप ।
स्त्रियान्तु कटुरोहिण्यां पारदे स्यान् नपुंसकम् ॥ ४० ॥
अलका कुवेरपुर्य्यामस्त्रियां चूर्णकुन्तले ।
अभीकः कामुकेक्रूरे निर्भये त्रिषु ना कवौ ॥ ४१ ॥
अनीकोऽस्त्री रणे सैन्येऽप्यणुको निपुणाल्पयोः ।
अलीकमप्रियेऽपि स्याद् दिव्यसत्ये नपुंसकम् ॥ ४२ ॥
अनूकन्तु कुले शीले पुंसि स्याद् गतजन्मनि ।
अंशुकं श्लक्ष्णवस्त्रे स्याद् वस्त्रमात्रोत्तरीययोः ॥ ४३ ॥
अन्तिक निकटे वाच्यलिङ्गं स्त्री शातलोपधौ ।
चुल्ल्यां ज्येष्ठभगिन्याञ्च नाट्योक्त्याकथ्यतेऽन्तिका ॥ ४४ ॥
अलर्कौ धवलार्के स्याद् योगोन्मादितकुक्कुरे ।
अम्बिका पार्वतीमात्रोः धृतराष्ट्रस्य मातरि ॥ ४५ ॥

अम्बिका द्यूतभेदे च रजन्यामपि योषिति ।
अम्लिका तिन्तिड़िकाऽम्लोद्गारचाङ्गेरिकासु च ॥४६॥
अर्भकः कथितो वाले मूर्खेऽपि च कृशेऽपि च ।
आनकः पटहे भेर्य्यां मृदङ्गे ध्वनदम्बुदे ॥ ४७ ॥
आढ़की तु तुवर्य्यां स्त्री परिमाणान्तरे त्रिषु ।
आलोकस्तु पुमान् द्योते दर्शने वन्दिभाषणे ॥ ४८ ॥
आह्निकं दिननिवर्त्त्ये त्रिलिङ्गमथ न द्वयोः ।
नित्यक्रियाभोजनयोर्वृन्दे प्रकरणस्य च ॥ ४९ ॥
आतङ्को रोगसन्तापशङ्कासु मुरजध्वनौ ।
इक्ष्वाकुः कटुतुम्बयां स्त्री सूर्य्यवंश्यनृपे पुमान् ॥५०॥
उलूकः पुंसि काकाराविन्द्रे भारतयोधिनि ।
उदर्क एष्यत्काले तत्फले मदनकण्टके ॥ ५१ ॥
उष्णकस्तु निदाघे स्यादातुरे चिप्रकारिणि ।
उद्रिका मृत्तिकाभाण्डभेदेऽपि करभे स्त्रियाम् ॥५२॥
ऊर्म्मिका चाङ्गुरीये स्याद् वस्त्रभङ्गतरङ्गयोः ।
कनकं हेम्नि पुंसि स्यात् किंशुके नागकेशरे ॥५३॥
धुस्तूरे काञ्चनाले च काञ्चीये चम्पकेऽपि च ।
करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च ॥५४॥
द्वयोर्वर्षोपले न स्त्री करङ्के च कमण्डलौ ।
कमकस्तु पुमान् भद्रमुस्तके ब्रह्मदारुणि ॥ ५५ ॥

फले कार्पासिकायाश्च पट्टिका लोध्रपूगयोः ।
कटकोऽस्त्री नितम्बेऽद्रेर्दण्डिनां दन्तमण्डले ॥५६॥
सामुद्रलवणे राजधानी वलययोरपि ।
कटुका कटुरोहिण्यां स्त्रियां व्योषे नपुंसकम् ॥ ५७ ॥
कण्टको नस्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे।
नैयायिकादिदोषोक्ता स्याद्रोमाञ्चद्रुमाङ्गयोः॥५८॥
करङ्को मस्तकेऽमत्रनारिकेलफलास्थिनि ।
कलङ्कोऽङ्केऽपवादे च कालायसमलेऽपि च ॥५९॥
कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि ।
क्रमुकादिच्छटांशेऽब्जवराटे कर्णभूषणे ॥६०॥
कणिका कथ्यतेऽत्यन्त-सूक्ष्मवस्त्वग्निमन्थयोः ।
कच्चाकुस्तु दुराधर्षे दुःशीले ना विलेशये ॥६१॥
कञ्चुको वारवाणे स्यान्निर्मोके कवचेऽपि च ।
वर्द्धापकगृहीताङ्गस्थितवस्त्रे च चोलके ॥६२॥
कञ्चुक्यपधिभेदेऽथ कारिका नटयोषिति ।
कृतौ विवरणश्लोके शिल्पयातनयोरपि ॥६३॥
नपुंसकन्तु कर्म्मादौ कारकं कर्त्तरि त्रिषु ।
कामुकः कमनेऽशोकपादपे चातिमुक्तके ॥६४॥
कार्मुकं धनुषि स्यान्ना वेत्रौ कर्म्मक्षमेऽन्यवत् ।
कावृकः कुक्कवाकौ स्यात् पीतमस्तककोकयोः ॥६५॥

चारकः पतिमत्स्यादिपिटके जालकेऽपि च ।
कालिका चण्डिकाभेदे काष्ण्र्यवृश्चिकपत्रयोः ॥६६॥
क्रमदेये वस्तुमूल्ये धूसरीनवमेघयोः ।
पटोलशाखारोमालीमांसीकाकीशिवासु च ॥६७॥
मेघावलौ च किम्पाको महाकालफलाज्ञयोः ।
कीचको दैत्यभिद्वाताहतसस्वनवंशयोः ॥६८॥
कीटकः कृमिजातौ ना निष्ठुरे पुनरन्यवत् ।
कुलकन्तु पटोले स्यात् सम्बद्धश्लोकसंहतौ ॥६९॥
पुंसि वल्मीककाकेन्दु कुलश्रेष्ठेषु कथ्यते
चुम्बक स्त्रिषु नीचेऽल्पे कुशिको मुनिसर्ज्जयोः ॥७०॥
कुपाकुः कपिवल्ल्यर्कौ ना परोक्ता पिनि त्रिषु ।
कुलिको नागभेदे स्याद्द्रुमेभेदे कुलमत्तमे ॥७१॥
चुरकः कोकिलाचे स्याद् गोचुरे तिलकद्रुमे ।
कूपको गुणवृक्षे स्यात् तैलपात्रे कुकुन्दरे ॥७२॥
उदपाने चितायाञ्च कूपिकाऽम्भोगतोपले ।
कूलकं न स्त्रियां स्तूपे पुंसि स्यात् कृमिपर्व्वते ॥७३॥
कूर्च्चिका सूचिकायाञ्च तूलिकायाञ्च कुड्मले ।
कवाटकुट्टके चीरविकृतावपि योषिति ॥७४॥
कृपकः पुंसि फाले स्यात् कर्षकोऽप्यभिधेयवत् ।
कोरकोऽस्त्री कुड्मले स्यात् कर्षोलकमृणालयोः ॥७५॥

कौतुकन्त्वभिलाषे स्यादुत्सवे नर्म्महर्षयोः ।
तथा परम्परायाते मङ्गले च कुतूहले ॥७६॥
विवाहसूत्रगीतादिभोगयोरपि न द्वयोः ।
काशिको नकुले व्यालग्राहे गुग्गुलुशक्रयोः ॥७७॥
कोपघ्नोलूकयोश्च स्याद् विश्वामित्रमुनावपि ।
कौषिकी चण्डिकायाञ्च नदीभेदे च योषिति ॥७८॥
खनको नोन्दुरौ सन्धिचौरे त्रिम्ववदारके ।
खड्गिको महिषीक्षीरे फेनशौनिकयोरपि ॥७९॥
स्यात् खोलकस्तु पाके शिरस्त्र वल्मीक पूगकोषेषु ।
गणिका यूथीवेश्येभीतर्कारीषु ना तु दैवज्ञे ॥८०॥
ग्रन्थिक पिप्पलीमूले गग्गुलुग्रन्थिपर्णयोः ।
करीरे पुंसि दैवज्ञे सहदेवाख्यपाण्डवे ॥८१॥
गण्डक पुंसि खङ्गे स्यात् सङ्ख्याविद्याप्रभेदयोः ।
अवच्छेदेऽन्तराये च गण्डकी सरिदन्तरे ॥८२॥
ग्राहको घातिविहगे व्यालानाञ्च ग्रहीतरि ।
गान्धिको लेखकेऽपि स्यात् सुगन्धिव्यवहारिणि ॥८३॥
गुण्डको मलिने धूलौ कलोक्ति स्नेहपात्रयोः ।
गुह्यको निम्बके स्फेके गैरिक धातुरुक्मयोः ॥८४॥
गोलको विधवापुत्रे जारात् स्यान्मणिके गुडे ।
गोरङ्कुः स्यात् पुमान् पक्षिभेदे नग्नकवन्दिनोः ॥८५॥

चषकोऽस्त्री पानपात्रे मधुमद्यप्रभेदयोः ।
चलुकः प्रसृतौ भाण्डभेदे चुलुकवत् पुमान् ॥८६॥
चतुष्की मशकहर्य्यां पुष्करिण्यन्तरेऽपि च ।
चारकः पालकेऽश्वादेः स्यात् सञ्चारकबन्धयोः ॥८७॥
चित्रकं तिलके नातु व्याघ्रभिच्चञ्चुपाठिषु ।
चम्बकश्चुम्बनपरे धूर्त्तायस्कान्तयोरपि ॥८८॥
बहुग्रन्थैकदेशज्ञे धटस्योर्द्ध्वावलम्बने ।
चुलकी शिशुमारे स्यात् कुण्डीभेदे कुलान्तरे ॥८९॥
चूलिका नाटकस्याङ्गे कर्णमूले च हस्तिनाम् ।
चुतकः कूपकेऽप्याम्रे जनकः पितृभूभुजोः ॥९०॥
जम्बुकः फेरवे नीचे पश्चिमाशापतावपि ।
जतुका जिनपत्रायां जतुकं हिङ्गुलाक्षयोः ॥९१॥
जाहको घोङ्कमार्ज्जार-खट्वाकारुपिडकासु च ।
जालकं कोरके दम्भे कुलायानाययोरपि ॥९२॥
न पुंसि मोचकफले स्त्रियान्तु वसनान्तरे ।
गिरिसारे जलौकायामपि स्याद् विधवास्त्रियाम् ॥९३॥
भटानामश्मरचिताङ्गरक्षिण्याञ्च जालिका ।
जालिको वाग्बद्द् ग्रामजालिजालोपजीविनोः ॥९४॥
जीवक. प्राणके पीतशालक्षपणयोरपि ।
कूर्चशीर्षे च पुंसि स्याद्दाजीवे जीविका मता ॥९५॥

त्रिषु सेविनि वृद्धाशीर्जीविनोराशिरतुण्डिके ।
झञ्जिकोद्वर्त्तनमले पटे दीप्तौ च झिल्लिका ॥९६॥
उद्वर्त्तनांशुके झिण्ट्यां टुण्टुकः शोणकाल्पयोः ।
डिम्बिका जलविम्बे स्यात् शोणकेकामुकेस्त्रियाम्॥९७॥
तण्डकः खञ्जने फेने समासप्रायवाचि च ।
गृहदारुतरुस्कन्धमायाबहुलकेष्वपि ॥९८॥
तक्षकस्तु पुमान् नागराजभेदे च वर्द्धकौ ।
तारको दैत्यभित्कर्णधारयो र्न दयो र्दृशि ॥९९॥
कनीनिकायामृक्षे च न पुमान् त्रातरि त्रिषु ।
तिलको द्रुमरोगाश्वभेदेषु तिलकालके ॥१००॥
क्लीवं सौवर्चलक्लोम्नो र्न स्त्रियान्तु विशेषके ।
त्रिशङ्कु र्ना राजभेदे शलभे वृषदंशके ॥१०१॥
तुरुष्कः सिह्लके म्लेच्छजातौ देशान्तरेऽपि च ।
तूलिका कूर्च्चिकायान्तु शय्योपकरणेऽपि च ॥१०२॥
दर्शकः स्यात् प्रतीहारे दर्शयितृप्रवीणयोः ।
दारको बालकेऽपि स्याद् भेदकेऽप्यभिधेयवत्॥१०३॥
द्रावको ग्रावभेदे स्याद् विदग्धे मोषकेऽपि च ।
दीपकं वागलङ्कारे वाच्यवद् दीप्तिकारके ॥१०४॥
दीप्यकञ्चाजमोदायां यवानीवर्हिचूडयोः ।
दुच्छको गन्धकुट्यां स्याद् विदारादवकाशके ।

दूषिका तूलिकायाञ्च मले स्यादलोचनस्य च ॥१०५॥
धनिका साधुनार्य्यां ना धन्याके त्रिषु साधुधनिनोश्च।
स्याद्धेनुकाकरिण्यां धेनावपिपुंसिदानवविशेषे॥१०६
धेनुकं करणे स्त्रीणां धेनूनामपि संहतौ।
नर्त्तकः केलके पोटगल चारणयो र्नटे ॥१०७॥
नर्त्तकीलासिकायाञ्च करेण्वामपि योषिति।
नग्निकाऽपिकुमार्य्यां स्यात्पुमान् क्षपणवन्दिनोः॥१०८॥
नरकः पुंसि निरयदेवारातिप्रभेदयोः।
नन्दको हरिखड्गे च हर्षके कुलपालके ॥१०९॥
नालीकः शरशल्यास्त्रेष्वब्जषण्डे नपुंसकम्।
नायको नेतरि श्रेष्ठे हारमध्यमणावपि ॥११०॥
निर्म्मोको मोचने व्योम्नि सन्नाहे सर्पकञ्चुके।
नीलिका नीलिनी-क्षुद्ररोग-सेफालिकासु च ॥१११॥
पराकस्तु व्रते खड्गे प्रसेकः सेचने च्युतौ।
प्रतीकोऽवयवेऽपि स्यात प्रतिकूलविलोमयोः ॥११२॥
पद्मकं स्यात् पद्मकाष्ठबिन्दुजालकयोरपि।
पञ्चकस्तु पुमान् पार्श्वदारे च पार्श्वमात्रके ॥ ११३ ॥
पल्यङ्को मञ्चपर्य्यङ्कवृषीपर्य्यस्तिकासु च।
पताका वैजयन्त्याञ्च सौभाग्यनाटकाङ्कयोः ११४॥
पातुकः पतयालौ स्यात् प्रपातजलहस्तिनोः

प्राणकः सत्वजातीये जीवकद्रुमचोलयोः ॥११५॥
पाटकः स्यान्महाकिष्कौ कटकान्तरवाद्ययोः।
अक्षादिचालने मूलद्र‍्व्यापचयवेधसोः ॥ ११६ ॥
पालङ्कः शल्लकीशाकभेदयोः प्राजिपक्षिणि।
पावकोऽग्नौ सदाचारे वह्निमन्थे च चित्रके ॥११७॥
भल्लातके विडङ्गे च प्रियकः पीतशालके।
नीपे चित्रमृगे चालौ प्रियङ्गौ कुङ्कुमेऽपि च ॥११८॥
पिण्याकोऽस्त्री तिलकल्के हिङ्गुवाल्हीकसिह्लके।
पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः ॥११९॥
पिटकस्त्रिषु विस्फोटे मञ्जुषायां पुनः पुमान्।
पिष्टको घृतपूपादौ नेत्ररोगान्तरेऽपि च ॥१२०॥
पुलकः कृमिभेदे प्रस्तरभेदे च मणिदोषे।
रोमाञ्चे हरिताले गजान्नपिण्डे च गन्धर्वे ॥१२१॥
पुलाकस्तुच्छधान्ये स्यात् संक्षेपे भक्तसिक्थके।
पुष्पकं रीतिका-नेत्ररोगयो रत्नकङ्कणे ॥१२२॥
कुवेरस्य विमाने च काशीशे च रसाञ्जने।
लौहकांस्ये मृदङ्गारशकट्याञ्च नपुंसकम् ॥१२३॥
स्यात् पुत्रिका पुत्तलिकादुहित्रोर्धोपद्मलके।
ना पुत्रे शरभे धूर्त्ते शैलवृक्षप्रभेदयोः ॥१२४॥

पूर्णकः स्वर्णचूडे स्यात् नासाछिन्द्यान्तु पूर्णिका ।
पृदाकु वृश्चिके व्याघ्रे सर्पचित्रकयोः पुमान् ॥१२५॥
पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवत् ।
पेचको गजलाङ्गूलमूलोपान्ते च कौशिके ॥१२६॥
पेटकः पुस्तकादीनां मञ्जूषायां कदम्बके ।
वल्मीको रोगभेदे च नाकौ च पुन्नपुंसकम् ॥ १२७ ॥
बन्धूकं बन्धुजीवे स्याद् बन्धूकः पीतशालके ।
बन्धकं स्याद् विनिमये पुंश्चल्यां स्यात् तु बन्धकी ॥१२८
बङ्कः कर्कटे चार्के दात्यूहे जलखातके ।
बराकः शङ्करे पुंसि शोचनीयेऽभिधेयवत् ॥१२९॥
बालकस्तु शिशावश्वे बालधौ वयहस्तिनोः ।
अङ्गुरीयकह्रीवेरवलये पुंसि वालिका ॥१३०॥
वालायां वालुका पत्रकावले कर्णभूषणे ।
वारकोऽश्वगतौ पुंसि वाच्यवत्स्यात् निषेधके ॥१३१॥
वालुका सिकतासु स्याद् वालुकस्त्वेलवालुके ।
भस्मक रोगभेदे स्याद् विडङ्गकलधौतयोः ॥ १३२ ॥
भ्रामको जम्बुके धूर्त्ते सूर्य्यावर्त्ताश्मभेदयोः ।
भालाङ्कः करपत्रे स्यात् शाकभेदे च रोहिते ॥१३३॥
महालक्षणसम्पन्नपुरुषे कच्छपे हरे ।
भूमिका रचनायां स्याद् वेशान्तरपरिग्रहे ॥१३४॥

भूतीकर्मापि भूनिम्बे दीप्यभूस्तृणे कत्तृणे ।
मधुका मधुपर्ण्यां स्त्री मधुकं क्लीतके खगे ॥१३५॥
वन्ध्यन्तरे ना मशको रोगकीटप्रभेदयोः ।
मण्डूकः शोणके मुन्यन्तरे स्याद् गूढवर्चसि ॥१३६॥
मण्डूकपर्ण्यां मण्डूकी मक्षिका च समिद्यपि ।
मक्षिका तृणशून्येऽपि मीनमत्स्याक्षभेदयोः ॥ १३७ ॥
मामकः स्यान् मदीयार्थे त्रिषु पुंसि तु मातुले ।
मातृका धातृका मात्रा देवीभिद्वर्णमालयोः ॥१३८॥
मालिका सप्तला पत्री-ग्रीवालङ्करणेषु च ।
पुष्पमाल्ये नदीभेदे पक्षिभेदे तु मालिकः ॥१३९ ॥
मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान् ।
यद्युक्ते वाच्यवत् क्लीव स्रोतोञ्जनान्धकारयोः ॥१४०॥
मोचकः कदलीशिग्रुनिर्मोचकविरागिषु ।
मोदकः खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत् ॥१४१॥
यमकं यमजे शब्दालङ्कारे पुंसि संयमे ।
याजकस्तु गजे राज्ञो याज्ञिकेऽप्यथ याज्ञिकः ॥१४२॥
याजके च कुशे चाथ युतकं संशये युगे ।
नारीवस्त्राञ्चले युक्ते चलनाग्रे च यौतके ॥ १४३ ॥
यूथिका म्लानके पुष्पविशेषेऽपि च योषिति
रसिका स्त्री रसालेक्षुरसयोः सरसे त्रिषु ॥ १४४ ॥

रक्तकोऽम्लानवन्धूकरक्तवस्त्रानुरागिषु ।
राजिकाऽपि च केदारे राजसर्षपरेखयोः ॥१४५॥
रात्रकं पञ्चरात्रे ना वेश्यावेश्माब्दवासिनि
रुचको वीजपूरे च निष्के दन्तकपोतयोः ॥१४६॥
न द्वयोः सर्ज्जिकाक्षारेऽप्यश्वाभरणमाल्ययोः ।
सौवर्चलेऽपि माङ्गल्यद्रव्ये चाप्युत्कटेऽपि च ॥१४७॥
रुण्डिका द्वारपीठश्च दूतिकायां रणक्षितौ ।
रूपकं नाटके मूर्त्तौ काव्यालङ्करणेऽपि च ॥१४८॥
रेणुकापि हरेणौ च जामदग्न्यस्य मातरि ।
लम्पाको लम्पटे देशे लासको लास्यकारिणि ॥१४९॥
मयूरे लसके चाथ लूणको भिदिते पशौ ।
लोचको मांसपिण्डेऽक्षितारकायाञ्च कज्जले ॥१५०॥
ललाटाभरणे स्त्रीणां कदलीनीलवस्त्रयोः ।
निर्व्वुद्धौ कर्णपूरे च मौर्व्वां भ्रूस्नयचर्मणि ॥१५१॥
वसुकं रौमके पुंसि शिवमल्ल्यर्कपर्णयोः ।
वर्णकश्चारणे स्त्री तु चन्दने च विलेपणे ॥१५२॥
द्वयोर्नीत्यादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च ।
वर्त्तकस्तु खुरेऽश्वस्य विहगे वर्त्तिका द्वयोः ॥१५३॥
वञ्चकस्तु खले धूर्त्ते गृहवभ्रौ च जम्बुके ।
व्यलीकमप्रियाकार्य्यवैलक्ष्येष्वपि पीडने ॥१५४॥

ना नागरेऽथ वाह्लीकं वाह्लिकं धीर हिङ्गुनोः।
द्वावेतौ पुंसि देशस्य प्रभेदे तुरगान्तरे ॥१५५॥
वार्द्धकं वृद्धसङ्घाते वृद्धस्य भावकर्म्मणोः।
वार्षिकं त्रायमाणायां क्लीवे वर्षाभवे त्रिषु ॥१५६॥
वालकोऽस्त्री पारिहार्य्ये त्रिषु स्यादङ्गुरीयके।
वितर्कस्तु पुमानूहे संशये च निगद्यते ॥१५७॥
विपाकः पचने खेदे कर्म्मणो विसदृक्फले।
विवेकः स्याज् जलद्रोण्यां पृथग्भावविचारयोः ॥१५८॥
वृश्चिकस्तु द्रुणे राशौ शूककीटौषधीभिदोः।
वृषाङ्कः शङ्करे साधौ भल्लातकमहोत्तयोः ॥१५९॥
वैजिक शिग्रुतैले स्याद् हेतौ सद्योऽङ्कुरे तु ना।
शलाका शल्यमदनशारिकाशल्लकीषु च ॥ १६० ॥
छत्रादिकाष्ठीशरयोः शल्लकी पशुवृत्तयोः।
शम्बुको गजकुम्भाग्रे घोङ्गे च शूद्रतापसे ॥१६१॥
जलजन्तुविशेषे च शम्बूका न नपुंसके।
शङ्खकं वलये कम्वावस्त्री पुंसि शिरोरुजि ॥१६२॥
शार्ककः स्याद् दुग्धफेनशर्करापिण्डयोः पुमान्।
शिशुकः शिशुमारे स्याद् वालकोलुपिनोरपि ॥१६३॥
शीतकः शीतकाले च सुस्थिते दीर्घसूत्रिणि।
शूककः प्रावटेऽपि स्याद् रसेऽपि परिकीर्त्तितः ॥१६४॥

सृक्को मणिभेदेऽसौ सृक्कों मेलके रतौ ।
सम्पाकः स्तार्किके धृष्टे त्रिषु ना चतुरङ्गुले ॥१६५॥
स्यमीका नीलिकायां स्त्री स्यमीको नाकुवृक्षयोः ।
स्वस्तिको मङ्गलद्रव्ये चतुष्क गृहभेदयोः ॥१६६॥
सरकोऽस्त्री सीधुपाने सीधुपात्रेक्षुसीधुनोः ।
अच्छिन्नाध्वगपङ्क्तौ च सायकः शरखड्गयोः ॥१६७।
स्यासकः पुंसि चार्चिक्ये जलादेरपि बुद्बुदे ।
सूचकः सीवनद्रव्ये बोधके पिशुने शुनि ॥१६८॥
ओतौ काके सूतकोऽस्त्री पारदे न द्वयोर्जनौ ।
सृदाकु र्नोऽनिले वज्रे ज्वलने प्रतिसूर्य्यके ॥१६९॥
सेवकस्तु प्रसेवे ना वाच्यलिङ्गोऽनुजीविनि ।
सेचकस्तु पुमान् मेघे वाच्यलिङ्गस्तु सेक्तरि ॥१७०॥
सैनिकः सैन्यरक्षे च स्यात् सेनासमवेतके ।
हारकः कितवे चौरे गद्यविज्ञानभेदयोः ॥१७१॥
हुडुक्को वाद्यभेदे च मत्तदात्यूहपक्षिणि ।
हेरुको बुद्धभेदे स्यान् महाकालगणेऽपि च ॥१७२।

कचतुष्कम् ।

भवेद्लिमको भेके पिकेऽम्नौ पद्मकेशरे ।
मधूकेऽप्ययाम्लिपकौ भृङ्गकोकिलकुक्कुरे ॥१७३॥

अङ्गारकः कुजेऽपि स्याद् दग्धकाष्ठे कुरुण्टके।
भवेदङ्गारिका चेक्षुदण्डे किंशुककोरके ॥१७४॥
स्यादश्मन्तकमुद्धाने मल्लिका च्छदनेऽपि च।
आकल्पक स्तमोमोहग्रन्थिपुत्कलिकामुदो ॥१७५॥
आक्षेपकोऽनिलव्याधौ व्याधे निन्दाकरेऽपि च।
भवेदाखनिकश्चौरे शूकरे मूषिकेऽपि च ॥ १७६ ॥
कथितोत्कलिकोत्कण्ठाहेलासलिलवीचिषु।
एडमूकोऽन्यलिङ्गः स्यात् शठे वाक्श्रुतिवर्जिते ॥१७७॥
कठिल्लकस्तु पर्णासे वर्षाभूकारवेल्लयोः।
कपर्दको वराटे स्याज् जटाजूटे च धूर्जटेः ॥१७८॥
कर्कटकः स्यान् मालूरकाद्रवेयप्रभेदयोः।
कलविङ्कः पुमान् ग्रामचटकेऽपि कलिङ्गके ॥ १७९ ॥
कनीनिका तारकेऽक्ष्ण स्यात् कनिष्ठाङ्गुलावपि।
कापटिकोऽन्यमर्मज्ञे छात्रे पुंसि शठे त्रिषु ॥ १८० ॥
काकरुको नग्नदम्भस्त्रीजितोलूकभीरुषु।
निःस्वे कुरुवकः शोणाम्लानझिण्टीप्रभेदयो ॥१८१॥
कुरुण्टकः पीतपुष्पाम्लानझिंटिकयोः पुमान्।
कृकवाकु र्मयूरेऽपि सरटे चरणायुधे ॥ १८२ ॥
कोपातकी कचे पुंसि पटोल्या घोषके स्त्रियाम्।
अथ कौक्कुटिकोऽदूरप्रेरिता-ऽक्षे च दाम्भिके ॥ १८३ ॥

कौलेयकः सारमेये कुलीनेऽथ खरालिकः।
ग्रामणीभण्डिनाराचेऽप्युपधाने च पुंस्ययम् ॥ १८४ ॥
भवेद् गुणनिका नृत्ये शून्याङ्के पाठनिश्चितौ ।
गोकण्टको गोक्षुरके स्थपुटे गोखुरेऽपि च ॥ १८५ ॥
गोमेदकं पीतमणौ काकोले पत्रकेऽपि च ।
स्याद् गोकुलिको वलिरे पङ्कस्थगवोपेक्षके ॥ १८६
अथ घर्घरिका क्षुद्रघण्टावादित्रदण्डयोः ।
चर्चरीको महाकाले केशविन्यासशाकयोः ॥ १८७ ।
चण्डालिका किन्नरायामुमायामोषधीभिदि ।
अथ चातुरको चक्रगण्डौ पुंस्यभिधेयवत् ॥ १८८ ॥
गोचरे लोचनस्यापि चाटुकारे नियन्तरि ।
जर्जरीकं बहुच्छिद्रे जरातुरेऽपि वाच्यवत् ॥१८९॥
जीवन्तिका गुडूच्यां च जीवाख्यशाकवन्दयोः ।
जैवातृकः पुमान् सोमे दीर्घायुःकृशयोस्त्रिषु ॥१९०॥
तर्त्तरीकं वहित्रे स्यान् न द्वयोः पारगे त्रिषु ।
तिक्तशाकस्तु खदिरे वरुणे पत्रसुन्दरे ॥ १९१ ॥
त्रिवर्णकं गोक्षुरके त्रिफलायां कटुत्रिके ।
दलाढकः स्वयं जाततिले प्रश्नगाञ्च गैरिके ॥ १९२ ॥
फेनखातकयो र्नागकेशरे च मतङ्गजे।
दन्दशूकस्तु पुंलिङ्गो राक्षसे च सरीसृपे ॥ १९३ ॥

दासेरकस्तु करभे दासीपुत्रे च धीवरे।
नियामकः कर्णधारे पोतवाहे नियन्तरि ॥ १९४ ॥
निश्चारकः पुरीषस्य चये स्वैरे समीरणे।
निर्ग्रन्थकः स्यात् चपणे निष्फलेऽप्यपरिच्छदे ॥१९५॥
प्रचलाकः शराघाते शिखण्डे च भुजङ्गमे।
प्रकीर्णक चामरे स्याद् विस्तारे ना तुरङ्गमे ॥१९६॥
पञ्चालिका स्त्रियां वस्त्र पुत्त्रिकागीतिभेदयोः।
भवेत् पुमान् प्रापणिको गन्धविक्रयिणि द्विजे ॥१९७॥
स्यात् पिप्पलक वक्षोजवृन्ते सीवनसूत्रके।
पिण्डीतकः स्यात् तगरे मदनाख्यमहीरुहे ॥१९८॥
अथ पुष्पलको गन्धमृगे चपणकीलयोः।
पुण्डरीक सीताम्भोजे सितच्छत्रे च भेषजे ॥१९९॥
पुंसि व्याघ्रेऽग्निदिङ्नागे कोपकारान्तरेऽपि च।
भवेत् पूर्णानक वर्द्धापने च पटहेऽपि च ॥२००॥
फर्फरीकश्चपेटे स्यात् फर्फरीकन्तु मार्द्दवे।
बलाहको गिरौ मेघे दैत्यनागविशेषयोः ॥२०१॥
वराटकः पद्मवीजकोषे रज्जौ कपर्द्दके।
वकेरुका बलाकाभिद्वातवेल्लितशाखयोः ।२०२।
वरण्डकस्तु मातङ्गवेद्या यौवनकण्टके।
वर्त्तुलेऽथ वाणिजिको बाडवाग्नौ वणिज्यपि ॥२०३॥

कपञ्चकम्।

अनेडमूक उद्दिष्टः शठे वाक्श्रुतिवर्ज्जिते।
स्यादास्फुरितकं हासनखराघातभेदयोः॥ २२४ ॥
उपकारिकोपकार्य्यां पिष्टभेदे नृपालये।
कञ्चावेचक इत्येष शुद्धान्तोद्यानपालयोः ॥२२५॥
रङ्गाजीवे कवौ पिङ्गे दाःस्थेऽथ कटखादकः।
खादके काचकलसे बलिपुष्टे च जम्बुके ॥२२६॥
क्रमिकण्टकन्तु चित्राङ्गविडङ्गोडुम्बरेषु च।
गोजागरिकं मङ्गले पुंसि स्यात् कण्टकारके ॥२२७॥
चिलमीलिका तु कण्ठीभेदे खद्योतविद्युतोः।
अथो जलकरङ्कः स्यान् नारिकेलफलेऽम्बुजे ॥ २२८ ॥
शङ्खे जललतायाञ्च वारिवाहे च कीर्त्तितः।
जलतापिक इलीशकाकोचिमत्स्ययोः पुमान्॥२२९॥
नवफलिका स्त्रीनव्ये (नव) जातरजोऽङ्गनायाञ्च।
नागवारिक उद्दिष्टो राजकुञ्जर हस्तिपे ॥२३०॥
गणस्थराजे गरुडे चित्रमेखलकेऽपि च।
स्याद् व्रीहिराजिकः काङ्गुधान्यचीनकधान्ययोः ॥२३१
व्यवहारिका स्यात् लोकयात्रासम्मार्ज्जनीङ्गुदे।
शतपर्व्विका [illegible] ॥ २३२ ॥

शीतचम्पक इत्येष स्यादातर्पणदीपयोः ।
सुवसन्तक आख्यातो वासन्त्यां मदनोत्सवे ॥ २३३ ॥
स्याद् हेमपुष्पिका यूथ्यां चम्पके हेमपुष्पकः ।

कपट्कम् ।

ग्राममद्गुरिका ग्रामयुद्धे भृङ्गीझषे स्त्रियाम् ॥२३४॥
मातुल-पुत्रक इत्यपि मातुल तनये च फले धूर्त्तस्य ।
मदनशलाका कामोद्दीपणभैषज्यशारिकयोः ॥ २३५
वर्णविलोडक एष श्लोकस्तेनेच सन्धिचौरे च ।
सिन्दूरतिलक उक्तो मतङ्गजे स्त्रीतु कामिन्याम् ॥२३६

इति कान्तवर्गः समाप्तः ।

खैककम् ।

खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि ।
सवेदने देवलोके शर्म्मण्यपि नपुंसकम् ॥ १ ॥

खद्विकम् ।

नखो स्त्रीक्लीवयोः प्रुक्तो नखरे पुन्नपुंसकम् ।
न्युङ्ख सम्यङ्मनोज्ञे च साम्नः षट्प्रणवेऽपि च ॥२॥
प्रेङ्खा पर्य्यटनेऽप्यश्वगतौ सवेशनान्तरे ।
मुख नि सरणे वक्रे प्रारम्भोपाययोरपि ॥३॥

सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्।
लेखो लेख्ये सुरे लेखा लिपिराजिकयोरपि ॥ ४ ॥
विङ्खोऽश्वगतिभेदेऽपि शूकशिम्बयाञ्च नर्त्तने।
शङ्खः कम्बौ न योषिन्ना भालास्थिनिधिभिन्नखे ॥ ५ ॥
शाखा पक्षान्तरे बाहौ वेदभागद्रुमाङ्गयोः।
शिखा शाखावर्हिचूड़ालाङ्गलिक्य-ऽग्रमात्रके ॥ ६ ॥
चूड़ामात्रे शिखायाञ्च ज्वालायां प्रपदेऽपि च।
सखा मित्रे सहाये ना वयस्यायां सखी मता ॥ ७ ॥
सुखं शर्म्मणि नाके च सुखा पुर्य्यां प्रचेतसः।

खत्रिकम्।

गोमुखं कुटिलागारे वाद्यभाण्डे च लेपने ॥ ८ ॥
पुंसि मातलिपुत्रे च महादेवगणान्तरे।
त्रिशिखं राक्षसे क्लीवं त्रिशूले मण्डलान्तरे ॥ ९ ॥
दुर्म्मुखः कपिभिन्नागभिदो र्ना मुखरे त्रिषु।
प्रमुखः प्रथमे श्रेष्ठे मयूखः किरणेऽपि च ॥ १० ॥
ज्वालायामपि शोभायां विशिखस्तोमरे शरे।
विशिखा तु खनित्र्याञ्च रथ्यानालिकयोरपि ॥ ११ ॥
विशाखस्तर्कके स्कन्दे स्त्रियामृक्षे कठिल्लके।
वैशाखो मासभेदे स्यात् मन्थाने च प्रकीर्त्तितः ॥ १२
सुमुखस्तार्क्ष्यतनये शाकनागप्रभेदयोः।

खचतुष्कम्।

भवेदग्निमुखो देवे विप्रे भल्लातके स्त्रियाम् ॥ १३ ॥
अथाग्निमुखमुद्दिष्टं कुसुम्भे कुङ्कुमेऽपि च।
लाङ्गलिकाख्यौषधौ च विशल्यायाञ्च योषिति ॥ १४
इन्दुलेखाऽमृतासोमलता शशिकलासु च।
अथ बहुशिखा स्त्री स्यादुच्चटायां शिशौ त्रिषु ॥१५॥
महाशङ्खो मानुषास्थिसङ्ख्याभेदालिकेषु च।
भवेद् व्याघ्रनखं कन्दगन्धद्रव्यविशेषयोः ॥ १६ ॥
नखक्षतान्तरे क्लीवं शिलीमुखोऽलिकाण्डयोः।
शशिलेखा कलाभागे गुडूचीवृक्षभेदयोः ॥ १७॥
भवेत् स्वस्तिमुखो लेखे ब्राह्मणे वन्दिनि त्रिषु।

खपञ्चकम्

मलिनमुखोऽग्नौ गोलाङ्गुले पुंसि त्रिषु क्रूरे ॥१८ ॥
शीतमयूख चन्द्रे घनसारे चापि पुंलिङ्गः।
सर्वतोमुख उग्रे च चेत्रजब्रह्मणोः पुमान् ॥१९॥
नपुंसकन्तु पानीये सुरवर्त्मन्यपि स्मृतम्।

खान्तवर्गः समाप्तः।

गैककम्

गौः. स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पमान।

स्त्री सौरभेयीदृग्बाणदिग्वाग्भूव्वप्सु भूम्नि च ॥१॥
गायत्र्यामपि गम्भीरे जगत्यां भुवने जने।
गोगणेशे च नाके च वियत्यपि पुमानयम् ॥२॥
गः सुमेरौ समाख्यातो गायत्रीगीतयोः पुमान्।
गन्धर्व्वे चापि गः ख्यातो गायके चाभिधेयवत् ॥३॥

गद्विकम्

अगो महीरुहे शैले भास्करे पवनाशने।
अङ्ग गात्रे प्रतीकोपाययोः पुम्भूम्नि नीवृति ॥ ४ ॥
क्लीवैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके।
इङ्गः स्यादद्भुते ज्ञाने जङ्गमेङ्गितयोरपि ॥५ ॥
खगः सूर्य्ये ग्रहे देवे मार्गणे च विहङ्गमे।
खड्गो गण्डकशृङ्गासि-बुद्धभेदेषु गण्डके ॥ ६ ॥
गाङ्गस्तु गङ्गासम्भूते त्रिषु भीष्मे गुहे पुमान्।
चङ्गस्तु शोभने दक्षे टङ्कोऽस्त्री स्यात् खनित्रके ॥७॥
खड्गभेदे च जङ्घायां त्यागो दाने च वर्ज्जने।
तुङ्गी निशावर्व्वरयोः पुन्नागनगयोः पुमान् ॥ ८ ॥
उन्नते त्रिषु दुर्गोमानीन्द्योः स्त्री दुर्गमे त्रिषु।
नागं नपुंसके रङ्गे सीसके करणान्तरे ॥ ९ ॥
नागः पन्नगमातङ्गक्रूरचारिषु तोयदे।
नागकेशर-पुन्नाग-नागदन्तकमुस्तके ॥१०॥

देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः ।
पिङ्गा गोरचनाहिङ्गुनालिकाचण्डिकासु च ॥११॥
पिङ्गी शम्यां पिशङ्गे ना बालके तु नपुंसकम् ।
पूगस्तु क्रमुके वृन्दे फलत्वसारेऽभिधेयवत् ॥१२॥
नदीभेदे मलपां स्त्री भंगो जयविपर्य्यये ।
भेदरोगतरङ्गेषु भङ्गा सस्यान्तरे स्त्रियाम् ॥१३॥
भगं स्त्रीयोनिवीर्य्येच्छाज्ञानवैराग्यकीर्त्तिषु ।
माहात्म्यैश्वर्य्ययत्नेषु धर्मे मोक्षे च ना रवौ ॥१४॥
भागो रूपार्द्धके भाग्यैकदेशयो र्भृगुः पुमान् ।
मुनौ हरे तटे शुक्रे भृङ्गो धूम्याटपिङ्गयोः ॥१५॥
मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि ।
भोगः सुखे धने चाहेः शरीरफणयोरपि ॥ १६ ॥
पालनेऽभ्यवहारे च सोपिदादिभृतावपि ।
मार्गो मृगमदे मार्गशीर्षे चान्वेषणाध्वनोः ॥१७॥
मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः ।
अन्वेषणे च याच्ञायां मृगी तु वनितान्तरे ॥१८॥
युगो रथहलाद्यङ्गे न द्वयोस्तु कृतादिषु ।
युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपि च ॥ १९ ॥
योगोऽपूर्व्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु ।
वपुःस्थैर्य्ये प्रयोगेऽपि विष्कम्भादिषु भेषजे ॥ २० ॥

विस्रब्धघातके द्रव्योपायसन्नहनेष्वपि ।
कार्म्मणेऽपि च रङ्गो ना रागे नृत्ये रणक्षितौ ॥२१॥
अस्त्री नपुंसि रागस्तु मात्सर्य्ये लोहितादिषु ।
क्लेशादावनुरागे च गान्धारादौ नृपेऽपि च ॥२२॥
रोगः कुष्ठौषधे व्याधौ लङ्गस्तु सङ्गपिङ्गयोः ।
लिङ्गं चिह्नेऽनुमाने च साङ्ख्योक्तप्रकृतावपि ॥२३॥
शिवमूर्त्तिविशेषे च मेहनेऽपि नपुंसकम् ।
व्यङ्गो भेके च हीनाङ्गे वङ्गं सीसकरङ्गयोः ॥२४॥
वार्त्ताकेऽपि च कार्पासे पुंभूम्नि नीवृदन्तरे ।
वल्गु स्यात् छागले पुंसि सुन्दरे चाभिधेयवत् ॥२५॥
वेगो जवे प्रवाहे च महाकालफलेऽपि च ।
शार्ङ्गं कार्म्मुकमात्रेऽपि विष्णोरपि शरासने ॥२६॥
शुङ्गो वटाम्रतकयोः पर्कट्यामपि च स्त्रियाम् ।
शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके ॥२७॥
विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात् कूर्च्चशीर्षके ।
स्त्री विषायां स्वर्णमीनभेदयो ऋषभौषधे ॥२८॥
सर्गस्तु निश्चयाध्यायमोहोत्साहात्मसृष्टिषु ।

गत्रिकम्

न्यग्रोधो चित्र्युरे कूटे विश्लेषे काठिन्याश्मे ॥२९॥

अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि।
अपाङ्गस्त्वङ्गहीने स्यान् नेत्रान्ते तिलकेऽपि च ॥३०॥
आभोगो वारुणच्छत्रे पूर्णतायत्नयोरपि।
आयोगो व्यापृतौ गन्धमाल्योपहाररोधयोः॥३१॥
आशुगो मारुते वाणेऽप्युद्वेगं क्रमुकीफले।
उद्वेगोऽप्युद्दाङ्कलकोद्वेजनोद्गमनेषु च ॥ ३२॥
उत्सर्गः पुंसि सामान्ये न्याये च त्यागदानयोः।
कलिङ्गः पूतिकरजे धूम्याटे भून्नि नीवृति ॥३३॥
नद्योः कौटजफले मल्लिकायान्तु योषिति ।
कालिङ्गो भून्नि कर्कारौ द्रण्डावलभुजङ्गयोः ॥३४॥
कालिङ्गी राजकर्कट्यां चक्राङ्गो मानसौकसि।
चक्राङ्गी कटुरोहिण्यां जिह्मगोऽहौ च मन्दगे ॥३५॥
तडागोऽस्त्री जलाधारविशेषे यन्त्रकूटके।
तातगुः क्षुद्रताते ना जनकस्य हिते त्रिषु ॥३६॥
त्रिवर्गो धर्मकामार्थे त्रिफलायां कटुत्रिके।
वृद्धिस्थानक्षये सत्त्वरजस्तमसि चेष्यते ॥ ३७ ॥
तुरगी चाश्वगन्धायां तुरग श्चित्तवाजिनोः।
धारङ्गोऽसौ च तीर्थे च नरङ्गस्तु वरण्डके ॥३८॥
मेहने नद्योश्चाथ नारङ्गः पिप्पलीरसे।
यमजे प्राणिनि विटे नागरङ्गद्रुमेऽपि च ॥३९॥

निषङ्गः सङ्गे तूणे च निसर्गौ हूपसर्गयोः ।
नीलाङ्गुः स्यात् क्रमौ भ्रमराल्याञ्च योषिति ॥४०॥
पत्राङ्गं न द्वयो भूर्जे पद्मके रक्तचन्दने ।
पन्नग स्त्रौषधिभेदे तथैव पवनाशने ॥४१॥
प्लवगो वानरे भेके सारथौ चोष्णदीधितेः ।
परागः सुमनोरेणौ धूलिस्नानीययोरपि ॥४२॥
गिरिप्रभेदे विख्यातावुपरागे च चन्दने ।
प्रयाग स्तीर्थभेदे स्याद् यज्ञे शतमखाश्वयोः ॥४३॥
प्रयोगः कार्म्मणेऽपि स्यात् प्रयुक्तौ च निदर्शने ।
पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः ॥४४॥
क्लीवं सूते प्रियङ्गुः स्त्री राजीकाकणयोरपि ।
फलिन्यां कङ्गुसस्ये च पुन्नागस्तु सितोत्पले ॥४५॥
जातीफले नरश्रेष्ठे पाण्डुनागे द्रुमान्तरे ।
वराङ्गं योनिमातङ्गमस्तकेषु गुडत्वचि ॥४६॥
भुजङ्गोऽहौ च पिङ्गे च मातङ्गः श्वपचे गजे ।
मृदङ्गः पटहे घोषे रक्ताङ्गस्तु मङ्गीसुते ॥४७॥
कम्पिल्ले स्त्री तु जीवन्त्यां क्लीवं विद्रुमधीरयोः ।
रथाङ्गं न द्वयो श्चक्रे ना चक्राङ्गविहङ्गमे ॥४८॥
वातिगः पुंसि भण्टाक्यां धातुवादिनि चान्यवत् ।
विडङ्ग स्त्रिष्वभिज्ञे स्यात् क्रमिघ्ने पुन्नपुंसकम् ॥४९॥

विसर्गस्तु पुमान् दाने त्यागे च मलनिर्गमे।
विसर्ज्जनीयेऽप्ययनभेदेऽपि च विभावसोः ॥५०॥
विहगस्तु नृलिङ्गः स्यादाशुगे च विहङ्गमे।
सर्व्वगं सलिले क्लीवं सर्व्वगः शङ्करे विभौ ॥५१॥
सम्भोगस्तु पुमान् भोगे सुरते जिनशासने।
सारङ्गः पुंसि हरिणे चातके च मतङ्गजे।
शरले त्रिषु हेमाङ्गो गरुडे परमेष्ठिनि ॥५२॥

गचतुष्कम्।

स्यादपवर्गस्त्यागे मोक्षे कार्य्यावसाने साफल्ये।
अभिषङ्गः पुंलिङ्गः पराभवाक्रोशशपथेषु ॥५३॥
ईहामृगस्तु पुंसि स्यात् कोके रूपकभेदयोः।
उपरागस्तु पुंसि स्यात् राहुग्रासेऽर्कचन्द्रयोः ॥५४॥
दुर्नये ग्रहकल्लोले व्यसनेऽपि निगद्यते।
उपसर्गः पुमान् रोगभेदोपप्लवयोरपि ॥५५॥
कटभङ्गस्तु सस्यानां हस्तच्छेदे नृपात्यये।
छत्रभङ्गोऽपि वैधव्ये स्वातन्त्र्यनृपनाशयोः ॥५६॥
दीर्घाध्वगः पुमानुष्ट्रे लेखहारे तु भेद्यवत्।
मल्लनागोऽभ्रमातङ्गे वात्स्यायनमुनावपि ॥५७॥
समायोगस्तु संयोगे समवाये प्रयोजने।
सम्प्रयोगो रतेऽपि स्याद् निधने कार्म्मणेऽपि च ॥५८॥

गपञ्चकम्।

कथाप्रसङ्गो वातुले विषवैद्ये च वाच्यवत्।
नाडीतरङ्गः काकोले हिण्डके रतहिण्डके ॥५८॥

गान्तवर्गः समाप्तः।

घैककम्।

घो घण्टायां घर्घरे ना स्त्रियान्तु काञ्चिघातयोः।

घद्विकम्।

अघन्तु व्यसने दुःखे दुरिते च नपुंसकम् ॥१॥
अर्घः पूजाविधौ मूल्ये प्युद्घः स्याद् देहजानिले।
अङ्घ्रौ हस्तपुटे ग्रस्तोऽप्योघो वेगे जलस्य च ॥२॥
वृन्दे परम्परायाञ्च द्रुतनृत्योपदेशयोः।
मघा माघी च नक्षत्रे धान्यभेदे यथाक्रमम् ॥३॥
मघो द्वीपान्तरे मेघो मुस्ताजलदयोः पुमान्।
मोघोऽस्त्री पाटलायां स्याद् हीननिष्फलयोस्त्रिषु॥४॥
लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीवम्।
शीघ्रे कृष्णागुरुणि च पृक्कानामौषधौ तु स्त्री ॥५॥
श्लाघा स्त्रियां प्रशंसायां परिचर्य्याभिलाषयोः।

घत्रिकम्।

अनघो निर्म्मलापापमनोज्ञेष्वभिधेयवत् ॥६॥

अमोघः सफले वाच्यवत् स्त्री पथ्या विडङ्गयोः।
उल्लाघोऽपि शुचौ दक्षे हृष्टनीरोगयोस्त्रिषु ॥७॥
काचिघः काञ्चनेऽपि स्यात् क्लेमपड्डे मूषिकेऽपि च।
निदाघो ग्रीष्मकाले स्यादुष्णस्वेदाम्बुनोरपि ॥८॥
पलिघः काचकलसे घटप्राकारगोपुरे।
परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः ॥९॥
प्रतिघः प्रतिघाते स्यात् क्रोधेऽपि परिकीर्त्तितः।
महार्घस्तु महामूल्ये त्रिषु स्यात् लावके पुमान् ॥१०॥
सर्वौघो गुरुवेगे च सर्व्वसन्नहने पुमान्।

घान्तवर्गः समाप्तः।

ङैककम्।

ङः पुमान् विषये स्यातः स्पृहायां विषयस्य च ॥१॥

ङान्तवर्गः समाप्तः।

चैककम्।

चश्चण्डेशे पुमानुक्तः कच्छपे चन्द्रचौरयोः।

चद्विकम्।

अर्च्चा पूजाप्रतिमयोः कचः केशे गुरोः सुते ॥१॥
बन्धे शुष्कव्रणे पुंसि करिण्यान्तु कचा स्त्रियाम्।

काचः शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे ॥२॥
काञ्ची स्यान् मेखलादाम्नि प्रभेदे नगरस्य च।
कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे ॥३॥
क्रौञ्चो द्वीपविशेषे स्यात् पक्षिपर्व्वतभेदयोः।
चर्चा चिन्तास्थासकयोश्चर्चिकायाञ्च योषिति ॥४॥
चञ्चा तु नलनिर्म्माणे तृणनिर्म्मितपूरुषे।
चञ्चुस्त्रोव्यां स्त्रियां पुंसि गोनाड़ीके व्यडम्बके ॥५॥
त्वक् स्त्री चर्म्मणि वल्के च गुडत्वचि विशेषतः।
न्यङ् नीचमन्दयो र्नीचः पामरे वामनेऽपि च ॥६॥
प्राच्छब्दो दिशि देशे च काले च वाच्यलिङ्गकः।
पिचुर्ना कुष्ठभेदे च कर्षे तूलेऽसुरान्तरे ॥७॥
मोचः शोभाञ्जने पुंसि मोचा शाल्मलिरम्भयोः।
रुचिः स्त्री दीप्तौ शोभायामभिष्वङ्गाभिलाषयोः ॥८॥
रुक् स्त्री शोभाद्युतीच्छासु वचः कीरे वचौषधौ।
सारिकायाञ्च वाग्वाचे भारत्यां वचने स्त्रियौ ॥९॥
वीचिः स्वल्पे तरङ्गे स्यादवकाशे सुखे द्वयोः।
शुचि र्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि ॥१०॥
ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु।
शचीन्द्राण्यां शतावर्य्यां योषितः करणान्तरे ॥११॥
सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे।

चत्रिकम्

उदग् दिग्देशकालेषु वाच्यवत् त्रितयेऽव्ययम् ॥१२॥
कणीचि: पुष्पितलतागुञ्जयोः शकटे स्त्रियाम् ।
कवचो गर्दभाण्डे च सन्नाहे पटहेऽपि च ॥१३॥
क्रकचः करपत्रेऽस्त्री ग्रन्थिलाख्यतरौ पुमान् ।
नमुचिस्तु पुमान् दैत्यभेदे कुसुमकार्मुके ॥१४॥
नाराचो‌ऽपणिकाया ना लौहवाणाम्बुहस्तिनोः ।
प्रपञ्चः सञ्चयेऽपि स्याद् विस्तारे च प्रतारणे ॥१५॥
प्रत्यग् दिग्देशकालेषु वाच्यवत् त्रितयेऽव्ययम् ।
मरीचि र्मुनिभेदे ना गभस्तावनपुंसकम् ॥१६॥
मारीचो राक्षसभेदे कक्कोले याजकद्विजे ।
मरीची देवताभेदे विपञ्ची केलिवीणयोः ॥१७॥
विकचः क्षपणे केतौ नाऽकेशे स्फुटितेऽन्यवत् ।
विरिञ्चि र्ना विरिञ्चश्च वैकुण्ठे परमेष्ठिनि ॥१८॥
सङ्कोचो मीनभेदे च वन्धे क्लीवन्तु कुङ्कुमे ।
सम्यक् स्याद् वाच्यलिङ्गस्तु मनोज्ञे सङ्गतेऽपि च॥१९॥

चचतुष्कम् ।

जलूचि: कङ्कत्रोटिमत्स्यशृङ्गाटयोरपि ।
शिशुमारे च पुंलिङ्गे जलौकायाञ्च योषिति ॥२०॥
मलिम्लुचो मासभेदे चौराग्न्यनलयोः पुमान् ।

चपञ्चकम्।

रतनारीचो नारीणां शीत्कारे च पुंसि स्मरे ॥२१॥

चान्तवर्गः समाप्तः।

छैककम्।

छा छादने स्त्रियां ख्याता निर्मलेऽन्यवदिष्यते।
तरले छं प्रकीर्त्तितं माखात्स्ये परमेऽपि च ॥१॥

छद्विकम्।

अच्छः स्फटिकभल्लूकनिर्मलेष्वच्छमव्ययम्।
आभिमुख्येऽथ कच्छः स्यादनूपे तुन्नकद्रुमे ॥२॥
नौकाङ्गे पुंसि वाराह्यां चीरिकायाञ्च योषिति।
स्याद् गुच्छः स्तवके स्तम्बे हारभेदकलापयोः ॥३॥
पिच्छा पूगच्छटाकोपमोचाशाल्मलिवेष्टके।
भक्तसम्भूतमण्डे च पङ्क्तावश्वपदामये ॥४॥
स्त्रियां पुंसि तु लाङ्गूले न द्वयोर्बर्हचूडयोः।
पुच्छः पश्चात् प्रदेशेऽपि लाङ्गूले पुच्छमस्त्रियाम् ॥५॥
म्लेच्छः पामरभेदे च पापरक्तेऽपभाषणे।

छचतुष्कम्।

महाकच्छस्तु पुंसि स्यात् समुद्रे च प्रचेतसि ॥६॥

छान्तवर्गः समाप्तः।

जैकाम ।

जो ना मृत्युञ्जये जन्या जातमात्रे जनार्दने ।
त्वरिते जः समाख्यातो जयने जिः प्रकीर्त्तितः ॥१॥
जूस्त्वरागमने प्रोक्तः सामान्यगमने स्त्रियाम् ।
जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम् ॥२॥

जद्विकम् ।

अजश्छागे हरिब्रह्म-धातुस्मरहरे नृपे ।
अजोऽस्त्री शङ्ख(ना)निचुले धन्वन्तरौ हिमकिरण॥३॥
क्लीव पद्मे अथाजिः स्त्री समभूमौ च संग्रामे ।
ऊर्जस्तु कार्त्तिकोत्साहबलेषु प्राणनेऽपि च ॥४॥
कञ्जः केशे विरिञ्चौ च कञ्ज पीयूषपद्मयोः ।
कुजा कात्यायनीदेव्यां कुजो नरकभौमयोः ॥५॥
कुब्जो वृक्षप्रभेदे ना न्युब्जे स्याद् वाच्यलिङ्गकः ।
कुञ्जोऽस्त्रिया निकुञ्जेऽपि हनौ दन्तेऽपिदन्तिनाम् ६॥
खञ्जा कन्द प्रभेदे स्त्री कुटिलाङ्घ्रौ तु वाच्यवत् ।
खजा मन्थे प्रहस्तेऽथ खर्जूः कीटान्तरे स्मृता ॥७॥
खर्ज्जूरीपादपे कण्डां गजोमाने मतङ्गजे ।
वास्तुनः स्थानभेदेऽपि गञ्जा खनौ सुराग्रहे ॥८॥
गञ्ज स्यात् पुंसि रीढायाभाण्डागारे तु न स्त्रियाम् ।
गुञ्जा तु काकचिञ्चायां पटहे च कलध्वनौ ॥९॥

द्विजः स्याद् ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना।
द्विजा भार्ग्यां हरेणौ च ध्वजः स्यात् शौण्डिके पुमान्॥१०॥
न स्त्रियान्तु पताकायां खट्वाङ्गे मेढ्रचिह्नयोः।
निजं स्वीये च नित्ये च न्युब्जो दर्भमयस्रुचि॥११॥
कर्म्मरङ्गफले क्लीवं कुब्जाधोमुखयोस्त्रिषु।
प्रजा लोके च सन्ताने पिञ्जा तूलहरिद्रयोः॥१२॥
बले क्लीवे बधे पुंसि व्याकुले त्रिष्वथो भुजा।
द्वयोर्बाहौ करे मज्जूः स्त्री शुद्धौ धावकेऽपि च॥१३॥
रजो रेणौ परागे स्यादार्त्तवे च गुणान्तरे।
रज्जुर्वेण्यां गुणे योषित् राजिः स्त्री पङ्क्तिरेखयोः॥१४॥
रुजा रोगे च भङ्गेऽथ लाजः स्यादार्द्रतण्डुले।
नपुंसकमुशिरे च स्त्रियां पुंभूम्नि चाक्षते॥१५॥
व्रजो गोष्ठाध्ववृन्देषु वाजो निस्वनपक्षयोः।
वेगे पुमानथ क्लीवे घृतयज्ञान्नवारिषु॥१६॥
व्याजः शाठ्येऽपदेशेऽथ वीजमङ्कुरकारणे।
हेतुतत्त्वाधानशुक्रे सर्ज्जू र्वणिजि विद्युति॥१७॥
स्त्रियां सञ्ज्ञो विधौ रुद्रे सजः प्रस्वेदपुत्रयोः।
क्लीवं रक्तेऽथ सज्जः स्यात् सन्नद्धे सम्भृते त्रिषु॥१८॥

जत्रिकम्।

अण्डजो मृगनाभौ स्यात् सरटेऽहौ खगे झषे।

अङ्कजं रुधिरेऽनङ्गकेशपुन्नगदेषु ना ॥१९॥
अम्बुजो निचुले पुंसि कमले तु नपुंसकम्।
कम्बोजो हस्तिभेदेऽपि शङ्खदेशविशेषयोः ॥२०॥
करजं स्याद् व्याघ्रनखे करञ्जनखयोः पुमान्।
कारुजः शिल्पिनां चित्रे वामलूरे गजार्भके ॥२१॥
काम्बोजोऽश्वान्तरे सोमवल्के पुन्नागपादपे।
काम्बोजी माषपर्ण्याञ्च बलक्षखदिरे स्त्रियाम् ॥२२॥
कुटजो वृक्षभेदे स्यादगस्त्यद्रोणयोरपि।
गिरिजं त्वभ्रकेऽपि स्यात् शिलाजतुनि शैलजे ॥२३॥
लोहेऽपि गिरिजा गौरीमातुलुङ्गोश्च योषिति।
जलज कमले शङ्खे नीरज कुष्टपद्मयोः ॥२४॥
परञ्जस्तैलयन्त्रे स्यात् क्षुरिकाफलफेनयोः।
बलजं गोपुरे क्षेत्रे सस्यसङ्गरयोरपि ॥२५॥
बलजा वरयोषायां यूथ्यामपि वणिक् स्त्रियाम्।
वणिज्यायां पुमान् वाणिजिके च करणान्तरे ॥२६॥
बाहुजः क्षत्रिये कीरे स्वयञ्जाततिलेऽपि च।
भूमिजो नरकेऽङ्गारे सीतादेव्यान्तु भूमिजा ॥२७॥
वनजा मुद्गपर्ण्यां ना मुस्तके क्लीवमम्बुजे।
सहजस्तु निसर्गे ना सहोत्थे पुनरन्यवत् ॥२८॥
समजः पशुवृन्दे ना विपिने तु नपुंसकम्

सामजस्तु गजे पुंसि सामोत्थे पुनरन्यवत् ॥२९॥
हिमजा तु शची-गौर्य्योः पुंसि मैनाकपर्व्वते ।

जचतुष्कम् ।

अहिभुक् बर्हिणे तार्क्ष्ये पुंसि काश्मीरजं पुनः ।
कुष्ठकुङ्कुमयोः क्लीबेऽतिविषायान्तु योषिति ॥३०॥
चीराब्धिजन्तु सामुद्रलवणे मौक्तिकेऽपि च ।
पुमान् तुषारकिरणे कमलायान्तु योषिति ॥३१॥
ग्रहराजो रवौ चन्द्रे जघन्यजः कनीयसि ।
वृषले द्विजराजस्तु चन्द्रेऽनन्ते गरुत्मति ॥३२॥
धर्म्मराजो यमे बुद्धे युधिष्ठिरनृपे पुमान् ।
भारद्वाजो गुरोः पुत्रे व्याघ्राटाख्यविहङ्गमे ॥३३॥
भारद्वाजी वनकार्पास्यां ना द्रोणऋषिभेदयोः ।
अथ भृङ्गराज उक्तः पक्षिविशेषे च मार्क्वे भ्रमरे॥३४॥
यक्षराट् पुंसि धनदे मल्लानां रङ्गचत्वरे ।
राजराजः कुवेरेऽपि सार्व्वभौमे सुधाकरे ॥३५॥

जपञ्चकम् ।

ऋषभध्वज ईशेऽपि शङ्करे चार्हदन्तरे ।
मुनिभेषजमागस्त्ये हरीतक्याञ्च लङ्घने ॥३६॥

जपट्कन्।

वसुन्धरीशज चन्द्रे एञ्चेऽपि परिकीर्त्तितः।

जान्तवर्गः समाप्तः।

ञैककम्।

ञो ञण्टीशे सुरगुरौ दैत्यराजे ध्वनावपि।

ञद्विकम्।

ञजञा वाते नारवायौ नष्टेऽपि परिकीर्त्तितः॥१

ञजञाध्वनिविशेषेऽपि स्याद्स्वुकणवर्षणे।

ञान्तवर्गः समाप्तः।

टैककम्।

ट पुमान् स्याद् बलीवर्द्दे शुक्रे वामनतावपि।

टो नम्र बुध विदत्सु—

टद्विकम्।

स्याद्टो जडमूर्खयोः॥१॥

प्रज्ञय पण्डिते वाच्यलिङ्गो बुद्धो तु योषिति।

राज्ञी राजप्रियायाञ्च भार्य्याया भास्करस्य च॥२

सज्ञा नामनि गायत्र्या चेतनारवियोषितोः।

अर्थस्य सूचनायाञ्च हस्ताद्यैरपि योषिति॥३॥

ज्ञत्रिकम्।

कृतज्ञः कुक्कुरे पुंसि मर्य्यादिन्यभिधेयवत्।
क्षेत्रज्ञ आत्मनि च्छेके दैवज्ञो गणके पुमान्॥ ४॥
दैवज्ञे चणिकायां स्त्री सर्व्वज्ञः शिवबुद्धयोः।

ज्ञान्तवर्गः समाप्तः।

टैककम्।

टः पुमान् वामने पादे निस्वनेऽपि क्वचिन्मतः।
टा पृथिव्यां करङ्कोटो ध्वनौ च परिकीर्त्तितः॥१॥
टो महेश्वर आख्यातः ख्याते त्रिभुवनेऽपि च।

टद्विकम्।

अट्टं भक्ते च शुष्के ना क्षौमेऽत्यर्थे गृहान्तरे॥२॥
इष्टमाशंसितेऽपि स्यात् पूजिते प्रेयसि त्रिषु।
सप्तन्तौ पुमान् क्लीवं संस्कारे क्रतुकर्म्मणि॥३॥
इष्टिर्मताभिलाषे च सङ्ग्रहश्लोकयागयोः।
कटः श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शरे॥४॥
समये गजगण्डे च पिप्पल्यान्तु कटी मता।
कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि॥५॥
नपुंसकमकार्य्ये स्यात् पुंलिङ्गो रसमात्रके।
त्रिषु तद्वत् सुगन्धौ च मत्सरेऽपि खरेऽपि च॥६॥
कष्टन्तु गहने कृच्छ्रे क्रुष्टं रोदनरावयोः।

कुटः कोटे पुमानस्त्री घटे स्त्रीपुंसयोर्गृहे ॥७॥
कुटी स्यात् कुम्भदास्याञ्च मुरायां चित्रगुच्छके।
कूटोऽस्त्री निश्चले राशौ लौहमुद्गरदम्भयोः ॥८॥
मायाद्रिशृङ्गयोस्तुच्छे सीरावयव-यन्त्रयोः।
अनृते चाथ क्रुष्टिः स्यादाकर्षे स्त्री बुधे पुमान् ॥९॥
कोटिः स्त्री धनुषोऽग्रेऽश्रौ सङ्ख्याभेद-प्रकर्षयोः।
खटोऽन्धकूप कफयोः प्रहारान्तर-टङ्कयोः ॥१०॥
खाटिस्त्वसङ्कटेऽपि स्यात् किणे शवरथे स्त्रियाम्।
खेटः कफे ग्रामभेदे चर्म्मण्यस्त्रवति त्रिषु ॥११॥
अथ गृष्टिः सकृत्प्रसूतगवीवदरयोः स्त्रियाम्।
घटः समाधिभेदेभशिरःकूटकुटेषु च ॥१२॥
घटा घटन-गोष्ठीभघटनासु च योषिति।
घृष्टिः स्त्री घर्षण-स्पर्द्धा विष्णुक्रान्तासु ना किरौ॥१३॥
घोण्टा तु वदरीपूगवृक्षयोरपि योषिति।
चटुचाटौ पिचिण्डेऽथ व्रतिनामासने पुमान् ॥१४॥
जटा लग्नकचे मूले मांस्यां स्त्रचे पुनर्जटी।
जुष्टन्तु क्लीवमुच्छिष्टे सेविते वाच्यलिङ्गकम् ॥१५॥
झाटो निकुञ्जे कान्तारे व्रणादीनाञ्च मार्ज्जने।
तटं नपुंसकं क्षेत्रे प्रतीरे तु तट त्रिषु ॥१६॥
त्वष्टा पुमान् देवशिल्पितक्ष्णोरादित्यभिद्यपि

त्रुटिः स्त्री संशये स्वल्पे स्वद्योलाकालमानयोः ॥१७॥
त्रोटिः स्त्री कट्फले चञ्चौ खगे मीनान्तरेऽपि च।
दिष्टं दैवे पुमान् काले दिष्टिर्मुत्परिमाणयोः ॥१८॥
स्त्रियां दृष्टिः स्त्रियां वृद्धौ लोचने दर्शनेऽपि च।
घटो दिव्यतुलायां स्याद् घटी चीरे च वाससः ॥१९॥
नटी नट्योषधौ स्त्री स्यात् शैलूषाशोकयोः पुमान्।
पटश्चित्रपटे वस्त्रेऽस्त्री पियालद्रुमे पुमान् ॥२०॥
पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्।
पटोले तु पुमान् क्लीबे छत्रालवणयोरपि ॥२१॥
पट्टः पेषणपाषाणे व्रणादीनाञ्च वन्धने।
चतुष्पथे तु राजादिशासनान्तर-पीठयोः ॥२२॥
पटिः स्त्री पटभेदे स्याद् वाग्गुलौ कुम्भिकाद्रुमे।
पुष्टिः स्त्री पोषणे वृद्धौ फटा तु फणदन्तयोः ॥२३॥
वटी त्रिषु गुणे पुंसि स्यात् न्यग्रोधकपर्दयोः।
भटः स्यात् पुंसि वीरे च विशेष पामरस्य च ॥२४॥
सृष्टिः स्याद् भर्ज्जने शून्यवाटिकायाञ्च योषिति।
म्लिष्टं त्रिष्वव्यक्तवाचि म्लाने मुष्टि र्द्वयोः पले ॥२५॥
वद्धपाणौत्सरौ यष्टिः पुंसि स्याद् भुजदण्डके।
द्वयोर्हारलताभार्ग्यौ मधुका-शस्त्रभेदयोः ॥२६॥
रिष्टं क्षेमे शुभाभावे पुंसि खड्गे च फेनिले।

रिष्टिः खड्गे नाऽशुभे स्त्री लाटः देशान्तरेंऽशुके॥२७॥
वाटो मार्गे वृतिस्थाने स्यात् कुटी-वास्तुनोः स्त्रियाम्।
विटोऽद्रौ लवणे पिङ्गे मूषिके खदिरेऽपि च ॥२८॥
विष्टिस्त्रिषु कर्मकरे स्त्र्याजूवेतनकर्मसु।
व्युष्टिः फले समृद्धौ स्त्री व्युष्टं कान्त्ये त्रिषूषिते ॥२९॥
सटा जटा-केशरयोः स्फुटो व्यक्तप्रफुल्लयोः।
व्याप्ते त्रिषु स्फुटि र्योषित् पाटस्फोटामयेऽपि च॥३०॥
निर्भिन्नकर्कटीसस्येऽपि स्यात् स्पष्टस्तु निर्मिते।
युक्तनिश्चितयोः प्राज्ञे त्रिषु स्पष्टस्तु निर्मितौ॥३१॥
स्वभावे चापि कथिता हृष्टो रोमाञ्चितेऽपि च।
जातहर्षे प्रहसिते विस्मितेऽप्यभिधेयवत् ॥३२॥

टत्रिकम्।

अवटः स्यात् खिले गर्त्ते कूपे कुहकजीविनि।
अरिष्टो लशुने निम्बे फेनिले काककङ्कयोः ॥३३॥
अरिष्टमशुभे तक्रे सूतिकागार आसवे।
शुभे मरणचिह्ने चादिष्टमादेशिते त्रिषु ॥३४॥
आज्ञप्तोच्छिष्टयोः क्लीवमुत्कटस्तीव्रमत्तयोः।
उद्भटः कच्छपे सूर्ये कर्कटो विहगान्तरे।३५॥
राशिभेदे कुलीरे स्त्री वाल्मुङ्कां शाल्मलीफले।
कर्हटः करहाटे स्यात् पङ्कपङ्कारयोरपि ॥३६॥

करटो गजगण्डे स्यात् कुसुम्भे निन्द्यजीविनि।
एकादशाहादिश्राद्धे दुर्दुरूटेऽपि वायसे ॥३७॥
करटो वाद्यभेदेऽथ कार्प्पटो जतुकार्थिणोः।
कीकटः कृपणे निःस्वे त्रिषु पुंभूम्नि नीवृति ॥३८॥
कुरुण्टी दारुपुत्र्यां नां झिण्ट्यम्लानप्रभेदयोः।
कुक्कुट्यनृतचर्य्यायां पुंसि स्यात् चरणायुधे ॥३९॥
निषादशूद्रयोः पुत्रे तृणोल्कायाञ्च कुक्कुभे।
कुनटी मनःशिलायां नैपाल्यामपि योषिति ॥४०॥
कपीटमुदरे तोये केशटो वर्य्यजोकणे।
चर्पटः स्फारविपुले चर्पटे पर्पटेऽपि च ॥४१॥
चक्राटो विषवैद्ये च धूर्त्तदीनारयोरपि।
चिपिटः खाद्यभेदे ना त्रिषु पिङ्किविस्तते ॥४२॥
चिरण्टी च सुवासिन्यां स्याद् द्वितीयवयःस्त्रियाम्।
जकुटं वार्त्ताकुपुष्पे जकुटो मलये शुनि ॥४३॥
व्यङ्कटं शिक्यभेदेऽपि धौताञ्जन्याञ्च न द्वयोः।
त्रिकूटं सिन्धुलवणे त्रिकूटः पर्व्वतान्तरे ॥४४॥
त्रिपुटा मल्लिकायाञ्च स्थूलैलात्रिवृतोः स्त्रियाम्।
सतीलके च तीरे च त्रिपुटः समुदाहृतः ॥४५॥
द्रोघाटः कथितो गाथाप्रभेदे मृगलुब्धके।
वैडालव्रतिके चाथ धाराटश्चातकाश्वयोः ॥४६॥

निर्द्दटस्तु दयाशून्ये कथितो निष्प्रयोजने ।
परापवादरक्ते च वाच्यलिङ्गोऽयमिष्यते ॥४७॥
निष्कुटस्तु गृहोद्याने स्यात् केदारकपाटयोः ।
पर्क्कटी नूतनफले पूगादेः प्लक्षपादपे ॥४८॥
परीष्टिः परिचर्य्यायां प्राकाम्येऽन्वेषणे स्त्रियाम् ।
पर्प्पटी पिष्टभेदे स्यात् पर्प्पटो भेषजान्तरे ॥४९॥
पाञ्चटः कर्परे पुंसि क्लशे स्यादभिधेयवत् ।
पिच्चटो नेत्ररोगे स्यात् क्लीवं सीसकरङ्गयोः ॥५०॥
वृरटो दयो वरव्यां स्त्री चस्यां तत्पतौ पुमान् ।
वव्वटी पण्ययोषायां ब्रीहिभेदेऽपि योषिति ॥५१॥
वेक्कटः स्याद् वैकटिके मत्स्यभेदे च यूनि च ।
भावाटो भावके साधौ निवेशे कामुके नटे ॥५२॥
भाकूटः शैलशृङ्गयो भेदे स्यादथ मर्कटी ।
करञ्जभिच्छूकशिम्ब्योः पुंसि वानरलूतयोः ॥५३॥
मोचाटः कृष्णजीरे च रम्भास्थि मलयोद्भवे ।
मोरटन्तु भवेदिक्षुमूलाङ्कोठप्रसूनयोः ॥५४॥
सप्तरात्रात् परक्षीरे मूर्व्विकायान्तु मोरटा ।
वर्णाटो गायने चित्रकरे स्त्रीकृतजीवने ॥५५॥
विकटा वज्रवाराह्यां त्रिपूर्वविकरालयोः ।

शाकटं शकटस्येदमित्यर्थे तस्य वोदरि ॥५६॥
शैलाटो देवले सिंहे शुक्लकाच-किरातयोः।
संसृष्टं त्रिषु संसर्गे संशुद्धे वसनादिना ॥५७॥

टचतुष्कम्।

उच्चिङ्गटस्तृणगडमत्स्यकोपनयोः पुमान्।
करहाटः शिफाकन्दे पद्मस्य मदनद्रुमे ॥५८॥
स्यात्कार्य्यपुटः क्षपणोन्मत्तानर्थकरेषु च।
कामकूटस्तु वेश्यायाः प्रियविभ्रमयोः पुमान् ॥५९॥
कुटन्नटन्तु कैवर्त्तीमुस्तके पुंसि शोणके।
कुण्डकीटस्तु चार्व्वाकवचनाभिज्ञपूरुषे ॥६०॥
पतितब्राह्मणी पुत्र-दासीकामुकयोरपि।
खङ्गरीटस्तु फलकासिधारव्रतधारिणोः ॥६१॥
गारमुष्टिः कृपाणे ना कृपणे त्वभिधेयवत्।
चक्रवाटः क्रियारोहे पर्य्यन्ते च,शिखातरौ ॥६२॥
चतुःषष्टिः कलासङ्ख्याभेदयो र्वह्वृचि स्त्रियाम्।
नारकीटोऽश्मकीटे स्यात् स्वदत्ताशाविहन्तरि ॥६३॥
परपुष्टः परभृते वारनार्य्यान्तु योषिति।
प्रतिकृष्टं मतं गर्ह्ये द्विरावृत्त्या च कर्षिते ॥६४॥
प्रतिस्पष्टः प्रेषिते स्यात् प्रत्याख्याते च वाच्यवत्।
वर्करोटः कटाक्षे स्यात् तरुणादित्यरोचिषि ॥६५॥

नारीपयोधरोत्सङ्ग-कान्तदन्तनखक्षते।
शिपिविष्टस्तु खलतौ शिवे दुश्चर्मणि स्मृतः ॥६६॥
अथ श्रुतिकटः प्रायश्चित्तेऽहौ पापशोधने।

टपञ्चकम्।

दशनोच्छिष्टः पुंसि स्यात् निश्वासाधरचुम्बयोः॥६७॥

टान्तवर्गः समाप्तः।

ठैककम्।

ठो मण्डले चन्द्रबिम्बे शून्ये च लोकगोचरे।

ठद्विकम्।

कठो मुनौ तदाख्यातवेदाध्येतृभ्रयोः स्वरे ॥१॥
कण्ठो गले सन्निधाने ध्वनौ मदनपादपे।
काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः ॥२॥
स्थानमात्रे दिशि च स्त्री दारुणि स्यान् नपुंसकम्।
कुष्ठ रोगे पुष्करेऽस्त्री कुण्ठोऽकर्मण्यमूर्खयोः ॥३॥
कोष्ठः कुसूले चात्मीये मध्ये कुक्षे गृहस्य च।
गोष्ठं गोस्थानके गोष्ठी सभासंलापयो स्त्रियाम् ॥४॥
ज्येष्ठः श्रेष्ठेऽतिवृद्धे च त्रिषु मासान्तरे पुमान।
ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः ॥५॥
निष्ठा निष्पत्तिनाशान्तयाञ्चानिर्वहणेषु च।

प्रष्टस्त्रिष्वग्रगे श्रेष्ठे पुंसि चाण्डालिकौषधौ ॥६॥
पाठस्य पठने ख्यातो विद्धकर्ण्यान्तु योषिति ।
पृष्ठं चरमगात्रेऽपि देहस्यावयवान्तरे ॥७॥
वण्ठः स्यादकृतोद्वाहे खर्व्वे कुन्तायुधेऽपि च ।
शठो मध्यस्थपुरुषे धूर्त्त-धूस्तूरयोरपि ॥८॥
श्रेष्ठो वरे कुवेरे च शोठो मूर्खेऽलसेऽपि च ।
षष्ठी कात्यायनीतिथ्यो स्त्रिषु षण्णाञ्च पूरणे ॥९॥
हठः स्यात्प्रसभे प्रश्नगां हेठो बाधाविहेठयोः ।

ठत्रिकम् ।

अपष्ठुः पुंसि काले च वामे स्यादन्यलिङ्गकः ॥१०॥
अम्बष्ठो देशभेदेऽपि विप्राद् वैश्यासुतेऽपि च ।
अम्बष्ठा चाम्ललोण्यां स्यात्पाठायूतिकयोरपि ॥११॥
कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम् ।
कनिष्ठाऽतियुवाल्पयोरनुजे स्त्री दुर्वलाङ्गुलौ ॥१२॥
जरठः कर्कशे पाण्डौ कठिनेऽप्यभिधेयवत् ।
नर्म्मठश्चुचुके षिङ्गे प्रतिष्ठा गौरवे स्थितौ ॥१३॥
स्थाने च यागनिष्पत्ति-चतुरक्षरपद्ययोः ।
प्रकोष्ठो मणिवन्धस्य कुर्परस्यान्तरेऽपि च ॥१४॥
भूपकक्ष्यान्तरेऽपि स्याद् वरिष्ठं मरिचेऽपि च ।
ताम्रे क्लीवं तित्तिरौ ना वरोरुतरयोरपि ॥१५॥

मकुष्ठो व्रीहिभेदे ना मन्थरे पुनरन्यवत्।
लघिष्ठोऽत्यल्पके भेले वैकुण्ठः कृष्णशक्रयोः ॥१६॥
श्रीकण्ठो देशभिद्रुद्रे साधिष्ठोऽतिदृढार्य्ययोः।

ठचतुष्कम्।

कलकण्ठः कलध्वाने हंसे पारावते पिके ॥१७॥
कालकण्ठस्तु दात्यूहे कलविङ्के च खञ्जने।
मयूरे पीतसारे च स्यात् खण्डपरशौ पुमान् ॥१८॥
कालपृष्ठं कर्णचापे पुंसि कङ्कविहङ्गमे।
स्याद् दन्तशठो जम्बीरे कपित्थे कर्मरङ्गके ॥१९॥
नागरङ्गेऽपि च पुमान् स्याच्चाङ्गेर्य्यान्तु योषिति।
पूतिकाष्ठन्तु सरल-देवदारुमहीरुहोः ॥२०॥
सूनकण्ठः पुमान् विप्रे खञ्जरीटकपोतयोः।
हारिकण्ठः पिके पुंसि हाराञ्चितगले त्रिषु ॥२१॥

ठान्तवर्गः समाप्तः।

डैकाकम्।

डः पुमान् वाडवाग्नौ स्याड् डाकिन्यां स्त्री निगद्यते।

डद्विकम्।

अण्डं मुष्के च पेश्यां स्यादिडा तु बुधयोषिति ॥१॥
सौरभेय्याञ्च वचने वसुमत्यामपि स्त्रियाम्।

काण्डः स्तम्बे तरुस्कन्धे वाणेऽवसरनीरयोः ॥२॥
कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम् ।
क्रीडा केलिप्रकारे स्यात् खेलावज्ञानयोरपि ॥३॥
कुण्डमग्न्यालये मानभेदे देवजलाशये ।
कुण्डी कमण्डलौ जारात् पतिवत्नीसुते पुमान् ॥४॥
पिठरे तु न ना क्ष्वेडो ध्वनौ कर्णामये विषे ।
क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति ॥५॥
लोहितार्कपर्णफले घोषपुष्पे नपुंसकम् ।
दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्त्तितः ॥६॥
क्रोडः शनौ शूकरे ना नपुमानङ्करक्षसोः ।
खण्डोऽस्त्री शकले नेक्षुविकारमणिदोषयोः ॥७॥
खड्ः पानान्तरे भेदे गण्डः स्यात् पुंसि खड्गिनि ।
ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च ॥८॥
विज्ञवीरकपोलेषु हयभूषणबुद्बुदे ।
गडुः पृष्ठगुडे कुब्जे गडो मीनान्तराययोः ॥९॥
गुडः स्याद् गोलके हस्तिसन्नाहेक्षुविकारयोः ।
गुडा स्नुह्यान्च कथिता गुडिकायाञ्च योषिति ॥१०॥
गोण्डः पामरजातौ च वृद्धनाभौ च तद्वति ।
चण्डो ना तिन्तिडीवृक्षे यमकिङ्करदैत्ययोः ॥११॥
चण्डी कात्यायनीदेव्यां हिंस्रकोपनयोषितोः ।

चण्डा धनहरीशङ्खपुष्प्योः स्त्र्यतिकोपने ॥१२॥
तीव्रेऽपि चूडा वलभौ शिखायां बाहुभूषणे।
चोडः प्रावरणे भूम्नि देशभेदे जडा स्त्रियाम् ॥१३॥
शूकशिम्ब्यां हिमग्रस्तमूकाप्राज्ञेषु तु त्रिषु।
ताडस्तु ताडने घोषे मुष्टिमेयतृणादिषु ॥१४॥
ताडी पत्रद्रुमे चाथ दण्डोऽस्त्री लगुडे पुमान्।
व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि ॥१५॥
सैन्ये काले मानभेदे चण्डांशोः पारिपार्श्विके।
दमे यमेऽभिमाने च नाडी नाले व्रणान्तरे ॥१६॥
शिरायां गण्डदूर्वायां चर्यायां कुहनस्य च।
तथा षट्क्षणकालेऽपि नीडं स्थानकुलाययोः ॥१७॥
पण्डः पण्डे धियि स्त्री स्यात् पाण्डुर्ना नृपतौ सिते।
पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः ॥१८॥
देहमात्रे निवापे च गोलसिह्लकयोरपि।
ओड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः ॥१९॥
पिण्डी तु पिण्डीतगरेऽलाबुखर्जूरभेदयोः।
पीडा कृपाशिरोमालाऽपमर्दसरलद्रुषु ॥२०॥
भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः।
मण्डः पञ्चाङ्गुले शाकभेदे क्लीबन्तु मस्तुनि ॥२१॥
आमलक्यां स्त्रियां मण्डायाऽस्त्रियां सारपिच्छयोः।

मुण्डो दैत्यान्तरे राहुयहे ना मुण्डिते त्रिषु ॥२२॥
मुण्डा मुण्डीरिकायां स्यात् स्त्रियामस्त्री तु मूर्द्धनि।
रण्डा मूषिकपर्ण्यां च विधवायाञ्च योषिति ॥२३॥
रोडः चोभे भवेत् पुंसि दृप्ते तु वाच्यलिङ्गकः।
वण्डा तु पांशुलायां स्त्री त्रिषु हस्तादिवर्ज्जिते ॥२४॥
व्याडो हिंस्रपशौ सर्पे शुण्डा पानगृहे मता।
अप्यम्बुहस्तिनीवेश्याहस्तिहस्तसुरासु च ॥२५॥
शौण्डो मत्ते च विख्यातः पिप्पल्यान्तु भवेत् स्त्रियाम्।
षण्डं पद्मादिसङ्घाते न स्त्री स्याद् गोपतौ पुमान् ॥२६॥

डचिकम्।

करण्डो मधुकोषासिकारण्डेषु दलाढके।
कुष्माण्डकमायां स्त्री पुंसि कर्कारौ च गणान्तरे॥२७
भ्रूणान्तरेऽथ कोदण्डं चापे ना नीवृदन्तरे।
भ्रूव्यथो गारुडं क्ष्वेडमन्त्रे मरकतेऽपि च ॥२८॥
तरण्डो वडिशीसूत्रबद्धकाष्ठादिके प्लवे।
नौकायामपि नस्त्रीस्यात् तिन्तिडीडिम्बचिञ्चयोः॥२९
द्राविडो देशभिज्जाते सङ्ख्याभिद्देधमुख्ययोः।
निर्गुण्डी नीलशेफाल्यां सिन्धुवारद्रुमेऽपि च ॥३०॥
प्रचण्डो दुर्व्वहे श्वेतकरवीरे प्रतापिनि।
प्रकाण्डो नस्त्री विटपे मूलशाखान्तरे तरोः ॥३१॥

शस्ते पिचिण्ड उदरे पशोरवयवे पुमान्।
पूलपण्डा गन्धकीटेऽपि तथा जन्वन्तरे पुमान् ॥३२॥
वरण्डोऽप्यन्तरावेदौ समूहमुखरोगयोः।
वारुण्डी दारपिण्ड्यां स्त्री फणिनां राजके पुमान् ॥३३॥
नस्त्रियां सेकपात्रे च मलेऽक्ष्णः श्रवणस्य च।
भेरुण्डा देवताभेदयक्षिण्यन्तरयोः स्त्रियाम् ॥३४॥
भयानके वाच्यवत् स्यात् मार्त्तण्डः क्रोड सूर्य्ययोः।
मारुण्डोऽण्डे भुजङ्गानां मार्गे गोमयमण्डले ॥३५॥
वरण्डा सारिकावर्त्तिशस्त्रभेदेषु योषिति।
वितण्डा वादभेदे स्यात् कञ्ची शाके शिलाह्वये ॥३६॥
करवीर्य्यामपि स्त्री स्यात् शिखण्डो वर्हचूडयोः।
सरण्डस्तु पुमान् धूर्त्ते सरटे भूषणान्तरे ॥३७॥

डचतुष्कम्।

अपोगण्डन्तु वलिभे विकलाङ्गे शिशावपि।
चक्रवाडोऽद्रिभेदे स्यात् चक्रवाडन्तु मण्डले ॥३८॥
जलरण्डो जलावर्त्ते पयोरेणौ भुजङ्गमे।
देवताडः सैंहिकेये जीमते च हुताशने ॥३९॥
अथ वातयुडा वात्यावातशोणितयोरपि।
पिच्छिलस्फोटिकायाञ्च वामायामपि योषिति ॥४०॥

डान्तवर्गः समाप्तः।

ढैककम्।

ढो ढक्कायां पुमानुक्तः ध्वनि तस्य च लाङ्गुले।

ढद्विकम्।

गूढं रहसि गुह्ये च न द्वयो संवृते त्रिषु ॥१॥
दृढ़ स्थूले नितान्ते च प्रगाढ़ बलवत्यपि।
माढिः स्त्री पत्रभङ्गौ च दैन्यस्यापि प्रकाशने ॥२॥
मूढ़स्तु तन्द्रिते बाले राढ़ा स्त्री' सूक्ष्मशोभयोः।
रूढं जाते प्रसिद्धे च वाढं दृढ़प्रतिज्ञयोः ॥३॥
व्यूढ़ः संहतविन्यस्तपृथुलेष्वभिधेयवत्।
वोढ़ा ना भारिके सूते षण्ढः स्यात् पुंसि गोपतौ ॥४॥
आकृष्टाण्डे वर्षवरे तृतीयाप्रकृतावपि।
सोढ़ा तितिचासंयुक्तो शक्ते चाप्यभिधेयवत् ॥५॥

ढत्रिकम्।

अध्यूढ़ा कृतसापत्न्यनार्य्यामध्यूढ़ ईश्वरे।
आपाढो व्रतिनां दण्डे मासे मलयपर्व्वते ॥६॥
स्त्री पूर्णिमायामालीढं पादन्यासेऽशिते त्रिषु।
उदूढः ऊढं स्थूले स्यादुपोढो निकटोढ़योः॥७॥
प्रगाढ़ं कृच्छ्रदृढयोः प्रमीढ़ो मूत्रिते घने।
प्ररूढो जठरे बद्धमूले वारूढ इत्ययम् ॥८॥
वस्त्राञ्चले कपाटेऽर्गो पञ्जरे सम्वलेऽपि च।

विरूढोऽङ्कुरिते जाते विगूढो गर्हिते त्रिषु ॥९॥
गुप्तेऽपि त्रिषु संरूढः प्रौढे चाङ्कुरिते त्रिषु।
समूढः पुञ्जिते भुग्ने सद्योजातेऽनुपप्लुते ॥१०॥

ढचतुष्कम्।

अध्यारूढं समारूढेऽप्यधिके चाभिधेयवत्।
खट्वारूढः श्रिते खट्वामविनीते च वाच्यवत् ॥११॥
प्रत्यालीढस्तु चरणन्यासभेदेऽशिते त्रिषु।

ढान्तवर्गः समाप्तः।

णैककम्।

णः पुमान् विन्दुदेवे स्याद् भूषणे गुणवर्ज्जिते।
पानीयनिलये चापि केचिदाहुर्विपश्चितः ॥१॥

णद्विकम्।

अणुर्व्रीहिविशेषे स्यात् पुंसि सूक्ष्मेऽभिधेयवत्।
अणिराणिवदक्षाग्रकीलाश्रिसीमसु द्वयोः ॥२॥
उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गकः।
ऊर्णा मेषादिलोम्नि स्यादन्तरावर्त्तके भ्रुवोः ॥३॥
कर्णः पृथाज्येष्ठपुत्रे सुवर्णालौ श्रुतावपि।
क्षणः पर्व्वोत्सवाव्यापारेषु मानेऽप्यनेहसः ॥४॥
कणा जीरककुम्भीरमक्षिकापिप्पलीषु च।

कणोऽतिसूक्ष्मे धान्यांशे काणः काकैकचक्षुषोः ॥५॥
कीर्णं छन्ने च विक्षिप्ते हिंसितेऽप्यभिधेयवत्।
कुणिस्तुन्नकवृक्षे ना कुकरे त्वभिधेयवत् ॥६॥
कृष्णः सत्यवतीपुत्रे वायसे केशवेऽर्ज्जुने।
कृष्णा स्याद् द्रौपदीनीलीकणाद्राक्षासु योषिति॥७॥
मेचके वाच्यलिङ्गः स्यात् क्लीवं मरिचलोहयोः।
कोणो वाद्यप्रभेदे स्याद् वीणादीनाञ्च वादने ॥८॥
एकदेशे गृहादीनामस्रौ च लगुडेऽपि च।
गणः प्रमथसङ्घौघे चण्डासैन्यप्रभेदयोः ॥९॥
गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये।
त्यागे शौर्य्यादिसत्वादिसन्ध्याद्यावृत्तिरज्जुषु ॥१०॥
गुडुक्कादावपि वस्याञ्च गेष्णु र्ना गायने नटे।
घ्राणं क्लीवं नासिकायां घ्राते स्याद् वाच्यलिङ्गकम्॥११
घृणा जगुप्सा-कृपयोरथ चूर्णो कपर्द्दके।
चूर्णो धूलौ क्षारभेदे चूर्णानिवासयुक्तिषु ॥१२॥
जर्णश्चन्द्रे च वृक्षे च जिष्णु र्ना वासवेऽर्ज्जुने।
जित्वरे वाच्यवत् जीर्णं परिपक्वपुराणयोः ॥१३॥
ज्ञणिः क्रमुकभेदेऽपि दुष्टदैवस्रुतौ स्त्रियाम्।
त्राणन्तु त्रायमाणायां रक्षणे रक्षितेऽपि च ॥१४॥
तीः .. सामदनवणे विप्रलोष्ठाजिमस्तके।

क्लीबं यवाग्रजे पुंसि तिग्मात्मत्यागिनोस्त्रिषु ॥१५॥
तूणी नील्यां निषङ्गे ना तृष्णा स्यात् तर्षलिप्सयोः ।
दीर्णं विदारिते भीते द्रुणं चापेऽलिनि द्रुणः ॥१६॥
द्रुण्यम्बुद्रोणीकच्छप्योर्दैष्णुर्दातरि दुर्मदे ।
द्रोणोऽस्त्रियामाढके स्यादाढकानां चतुष्टये ॥१७॥
पुमान् कृपीपतौ दग्धकाके स्त्री नीवृदन्तरे ।
तथा काष्ठाम्बुवाहिन्यां गवादन्यामपीष्यते ॥१८॥
पणो वराटमाने स्यान् मूल्ये कार्षापणे ग्लहे ।
क्रय्यशाकादिकाद्यूतव्यवहारे भृतौ धने ॥१९॥
पर्णं पत्रे किंशुके ना पार्ष्णिः स्यादुन्मदस्त्रियाम् ।
स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च ॥२०॥
प्राणो हृन्मारुते बोले काव्यजीवेऽनिले बले ।
पुलिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चात्मसु ॥२१॥
पूर्णं शक्ते समग्रे ना पूरितेत्वभिधेयवत् ।
फाणि गुडे करम्बे च स्त्रियां वाणी तु योषिति ॥२२॥
व्यूतावपि सरस्वत्यां भ्रूणः स्त्रीगर्भडिम्बयोः ।
मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च ॥२३॥
कण्ठदेशस्तनेऽजाया लिङ्गाग्रेऽलिञ्जरेऽपि च ।
मोणः शुष्कफले नक्रे मक्षिकाहिकरण्डयोः ॥२४॥

रणः कोणे क्वणे पुंसि समरे पुन्नपुंसकम् ।
रेणुः स्त्रीपुंसयोर्धूलौ पुल्लिङ्गः पर्पटे पुनः ॥२५॥
वर्णो द्विजादि-शुक्लादि-यशो गुणकथासु च ।
स्तुतौ ना नस्त्रियां भेदरूपाक्षरविलेपने ॥२६॥
वाणः स्याद् गोस्तने दैत्यभेदे केवलकाण्डयोः ।
वाणा तु वाणमूले स्त्री नीलझिण्ट्यां पुनर्द्वयोः ॥२७॥
वीणा विद्युति वल्लक्यां वृष्णिः पापण्डचण्डयोः ।
त्रिषु ना यादवे मेषे वेणी केशस्य बन्धने ॥२८॥
नद्यादेरन्तरे देवताड़े वेणुर्नृपान्तरे ।
त्वक्सारेऽपि च पुंसि स्यात् शाणो मासचतुष्टये ॥२९॥
लोहादीनाञ्च निकषे शाणी प्रावरणान्तरे ।
श्राणं पक्वे यवाग्वां स्त्री शीर्णं तुन्नविशीर्णयोः ॥३०॥
श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समानशिल्पिसंहतौ ।
शोणः कृशानौ श्योनाके लोहिताश्वे नदे पुमान् ॥३१॥
त्रिषु कोकनदच्छाये स्थाणुः कीले हरे पुमान् ।
अस्त्री ध्रुवेऽथ स्थूणा स्यात् सूर्म्यां स्तम्भे गृहस्य च ॥३२॥

णत्रिकम् ।

अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ ।
निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु ॥३३॥
अरुणाऽतिविषा-श्यामा-मञ्जिष्ठा-त्रिवृतासु च ।

अरणि वैह्निमन्थे ना द्वयो निर्मान्थ्यदारुणि ॥३४॥
अभीक्ष्णं भृशे नित्येऽथ तद्युक्तक्रिययोरपि।
इन्द्राणी करणे स्त्रीणां पौलोमीसिन्धुवारयोः ३५॥
ईरिणन्तूषरे शून्येऽपीक्षण दर्शने दृशि।
ऊषण मरिचे क्लीव कणायामूषणा स्त्रियाम् ॥३६॥
एषणी मणमार्गानुसारिण्याञ्च तुलाभिदि।
करुणस्तु रसे वृक्षे कृपायां करुणा मता ॥३७।
कत्तृणं तृणभित्पृश्न्योः कारणं हेतुकर्म्मणोः।
वालवादौ हस्तलेपे नृत्यगीतप्रभेदयोः॥३८॥
क्रियाभेदेन्द्रियक्षेत्रकायसंवेशनेषु च।
कायस्थे साधने क्लीवं पुंसि शूद्राविशोः सुते ॥३९॥
कल्याणमक्षये स्वर्गे मङ्गलेऽपि नपुंसकम्।
कङ्कणं करभूषायां छत्रमण्डलयोरपि ॥४०॥
करेणु र्गजयोषायां स्त्रियां पुंसि मतङ्गजे।
कार्म्मण मन्त्रतन्त्रादियोजने कर्म्मठेऽपि च ॥४१।
काकिणी पणतुर्य्यांशे मानदण्डेऽपि दृश्यते।
कृष्णलैकवराट्योः स्यादुन्मानस्यांशकेऽपि च ॥४२॥
कारण करणे हेतुवधयोश्च नपुंसकम्।
स्त्री यातनायां कुर्व्वाणो भृत्यकारकयोस्त्रिषु॥४३।
कृपाणः खड्गे छुरिकाकर्त्त्र्योरपि योषिति।

क्षपणस्तु क्रमौ पुंसि मन्दकुत्सितयोस्त्रिषु।
क्षेपणं प्रेरणे नौकादण्डजालभिदोः स्त्रियाम् ॥४४॥
ग्रहणं स्वीकारादरकरोपरागोपलब्धिवन्दिषु।
स्याद्ग्रामणीः प्रधानेऽधिपतौ च त्रिषु नापिते पुंसि ॥४५॥
ग्रामीणा नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत्।
गोकर्णोऽश्वतरे सर्पे सारङ्गे च गणान्तरे ॥४६॥
अङ्गुष्ठानामिकोन्माने गोकर्णी मूर्व्विकौषधौ।
चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च ॥४७॥
भ्रमणे भक्षणे वापि नपुंसक उदाहृतः।
जरणं जिरकेऽपि स्यात् कृष्णसौवर्च्चलेऽपि च ॥४८॥
तरुणं कुब्जपुष्पे ना रुवुके यूनि तु त्रिषु।
तरणि र्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम् ॥४९॥
दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्त्तिषु।
आरामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम् ॥५०॥
द्रविणं न द्वयो र्वित्ते काञ्चने च पराक्रमे।
दारुणो रसभेदे ना त्रिषु स्यात्तु भयावहे ॥५१॥
द्रुघणो मुद्गरेऽपि स्याद्द्रुहिणे च परश्वधे।
दुर्व्वर्णं त्रिष्वसद्वर्णे क्लीबमैलेयरूप्ययोः ॥५२॥
दौर्व्वीणं न्हष्टपर्णे स्याद् दूर्व्वायां स्वरसेऽपि च।
धर्मणस्तु पमान् वृक्षभेद-सर्पप्रभेदयोः ॥५३॥

धरणं मानभेदेऽपि धारणे धरणीभुवि ।
धर्षणं स्यात् परिभवे रतेऽसत्यान्तु धर्षणी ॥५४॥
धरुणः सम्मते नीरे स्वर्लोके परमेष्ठिनि ।
धारणी नाडिकायां स्याद् वृद्धोक्तमन्त्रभिद्यपि ॥५५॥
धारणाऽङ्गे च योगस्य न पुंसि स्याद्विधारणे ।
धिषणस्त्रिदशाचार्य्ये धिषणा धियि योषिति ॥५६॥
निःश्रेणिरधिरोहिण्यां खर्ज्जूरीपादपे स्त्रियाम् ।
निर्य्याणं वारणापाङ्गदेशे मोक्षेऽध्वनिर्गमे ॥५७॥
निर्म्माणं निर्म्मितौ सारे समञ्जसे नपुंसकम् ।
निर्व्वाणमस्तङ्गमने निर्वृतौ गजमज्जने ॥५८॥
सङ्गमे चापवर्गे च प्रवणो ना चतुष्पथे ।
क्रमनिम्नमहीभागोदरप्रह्वेषु च त्रिषु ॥५९॥
प्रघणस्ताम्रकुम्भे स्यादलिन्दे लोहमुद्गरे ।
प्रमाणं नित्यमर्य्यादाशास्त्रेषु सत्यवादिनि ॥६०॥
इयत्तायाञ्च हेतौ च क्लीवैकत्वे प्रमातरि ।
पत्रोर्णं धौतकौषेये क्लीवं स्यात् शोणके पुमान्॥६१॥
पक्षिणी पूर्णिमायां स्याद् विहग्यां शाकिनीभिदि ।
आगामिवर्त्तमानाहर्युक्तरात्रावपि स्त्रियाम् ॥६२॥
प्रवेणिः स्त्री कुथावेण्योः पुराणं पञ्चलक्षणे ।
पर्णे पुंसि त्रिषु प्रत्ने पूरणः पूरके त्रिषु ॥६३॥

क्लीवं पिण्डप्रभेदे च पूरणी शाल्मलिद्रुमे ।
पटारम्भकसूत्रेषु प्रोक्षणं सेचने वधे ॥६४॥
वरुणस्तरुभेदेऽप्सु पश्चिमाशापतावपि ।
वरणस्तु पुमान् तिक्तशाकप्राकारयोरपि ॥६५॥
क्लीवं कन्यादिवरणे वेष्टने स्त्री नदीभिदि ।
वारणं प्रतिषेधे स्याद् वारणस्तु मतङ्गजे ॥६६॥
ब्राह्मणं ब्रह्मसङ्घाते वेदभागे नपुंसकम् ।
भूमिदेवे तु पुंलिङ्गः स्फञ्जिकाष्टकयोः स्त्रियाम् ॥६७
वारुणी गण्डदूर्व्वायां प्रतीचीसुरयोरपि ।
भरणी घोषके ऋक्षे भरणं वेतने भृतौ ॥६८॥
भ्रमणी कारुण्डिकायां क्रीडाढ्यायामधीशितुः ।
भीषणो रसे शल्लक्यां ना गाढे दारुणे त्रिषु ॥६९॥
मसृणोऽकर्कशे स्निग्धे त्रिषूमायान्तु योषिति ।
मत्कुणो निर्व्विषाणेभे निःश्मश्रुपुरुषेऽपि च ॥७०॥
उद्दंशे नारिकेले च मार्गणो याचके शरे ।
याञ्चान्वेषणयोः क्लीवं यन्त्रणं रक्षणे स्मृतम् ॥७१॥
बन्धने स्यान् नियमने रवणः शब्दने खरे ।
रमणं पटोलमूले नार्य्यां स्त्री ना धवे स्मरे ॥७२॥
रोपणः पारदे हेमघर्षणी-परयोः पुमान् ।
रोधने वाच्यलिङ्गः स्याद् रोहिणी कटुरुभिदि ॥७३॥

तडित् कटुभरा सोमवल्कीषु लोहिताङ्गवोः ।
लवणं सैन्धवादौ ना सिन्धुर्लोभिदौ रसे ॥७४॥
तद्युक्ते वाच्यलिङ्गः स्यात् नदीभेदविषोः स्त्रियाम् ।
लक्षणं नाम्नि चिह्ने च सारस्यां लक्षणा मता ॥७५॥
लक्ष्मणा त्वोषधीभेदे सारस्यामपि योषिति ।
रामभ्रातरि पुंसि स्यात् सश्रीके चाभिधेयवत् ॥७६॥
विषाणी क्षीरकाकोल्यामजशृङ्ग्याञ्च योषिति ।
कुष्ठानामौषधे क्लीव पशुशृङ्गेभदन्तयोः ॥७७॥
विपणिः पण्यवीथ्याञ्च भवेदापणपण्ययोः ।
शरणं गृहरक्षित्रो र्वधरक्षणयोरपि ॥७८॥
श्रवणं स्यात् श्रुतौ कर्णे नक्षत्रे न नपुंसकम् ।
श्रवणो यतिभेदे ना निन्द्यजीविनि तु त्रिषु ॥७९॥
स्त्रिया सुदर्शनामांसीमुण्डीरीशवरीभिदोः ।
श्रावणो मासि पाषण्डे द्ध्याख्यां श्रावणा मता॥८०
शिङ्घाण काचपात्रे स्यात् लौहनासिकयोर्मले ।
श्रीपर्णी काश्मरीकुम्भोः क्लीवे पद्माग्निमन्थयोः॥८१॥
सङ्कीर्णं निचितेऽपि स्यादशुद्धे चापि वाच्यवत् ।
सरणिः पङ्क्तौ मार्गे स्त्री सारणो राक्षसान्तरे ॥८२॥
रुग्भेदे ना प्रसारिण्यां स्वल्पनद्याञ्च सारणी।
सुषेणः करमर्दे स्याद् विष्णुसुग्रीववैद्ययोः ॥८३॥

सुवर्णो ना स्वर्णकर्षे सुवर्णाख्यमखान्तरे।
स्त्री कृष्णागुरुणि क्लीवं काञ्चने हरिचन्दने ॥८४॥
सुपर्णः स्वर्णचूडे च गरुडे कृतमालके।
सुपर्णा कमलिन्याञ्च वैनतेयस्य मातरि ॥८५॥
हरेणु र्ना सतीले स्त्री रेणुका कुलयोषितोः।
हरणं यौतकादीनां द्रव्ये भुजे हृतावपि ॥८६॥
हरिणः पुंसि सारङ्गे विशदे त्वभिधेयवत्।
हरिणी हरितायाञ्च नारीसिद्वृत्तभेदयोः ॥८७॥
सुवर्णप्रतिमायाञ्च हर्षणोऽश्चिरुगन्तरे।
हर्षके योगभेदे च श्राद्धदेवेऽपि च क्वचित् ॥८८॥
हिरणं रेतसि स्वर्णे वराटे च नपुंसकम्।

णचतुष्कम्।

अङ्गारिणी हसन्त्याञ्च भास्करत्यक्तदिश्यपि ॥८६॥
आथर्व्वणि नाऽथर्व्वज्ञब्राह्मणे च पुरोधसि।
आतर्पणं प्रीणने स्यात् मङ्गलालेपनेऽपि च ॥६०॥
आरोहण स्यात् सोपाने समारोहे प्ररोहणे।
उत्क्षेपणन्तु व्यजने धान्यमर्द्दनवस्तुनि ॥६१॥
स्यादुद्धरणमुद्गारवान्तान्मोन्मूलनेष्वपि।
कार्षापणोऽस्त्री कार्षिके पणपोडशकेऽपि च ॥६२॥
अथ कामगुणो रागे विषयाभोगयोरपि।

चीर्णपर्णस्तु निम्बेऽपि खर्ज्जूरीभूरुहे पुमान ॥९३॥
चूडामणिः शिरोरत्ने काकचिञ्चाफले पुमान्।
जुहुराणोऽपि चाध्वर्य्यावपि स्यात् जातवेदसि ॥९४॥
तण्डुरीणः कीटमात्रे वर्व्वरे तण्डुलोदके।
त्रायमाणा वार्षिके स्त्री रक्ष्यमाणेऽभिधेयवत् ॥९५॥
तैलपर्णी मलयजे श्रीवासे सिह्लकेऽपि च।
दाक्षायणी त्वपर्णायामश्विन्याद्युडु पु स्त्रियाम् ॥९६॥
अथ देवमणिर्भर्गेऽश्वावर्त्ते कौस्तुभे च ना।
नारायणोऽच्युतेऽभीरु गौर्य्यां नारायणी मता ॥९७॥
अथो निगरण क्लीव भोजने स्याद् गले पुमान्।
अथ निःसरणं मृत्युपायमोक्षेषु निर्गमे ॥९८॥
स्यान् निस्तरणमुपाये निस्तारे तरणेऽपि च।
निरूपण स्यादालोके विचारे च निदर्शने ॥९९॥
पर्व्वरीणस्तु पर्णस्य शिराया द्यूतकम्बले।
पर्णवृन्तरसेऽपि स्यात् पर्व्वरीणन्तु पर्व्वणि ॥१००॥
प्रवारण निषेधे स्यात् काम्यदाने च न द्वयो॰।
परीरणः स्यात् कमठे दण्डे च पट्टशाटके ॥१०१॥
परायणमभीष्टे स्यात् तत्पराश्रययोरपि।
परवाणि पुमान धर्म्माध्यक्षवत्सरयोरपि ॥१०२॥
पारायणं समासङ्गे कात्स्न्र्ये पारगतावपि।

बिलुपर्णी बिम्बिकायां मूर्व्वायामोषधिभिदि ॥१०३॥
अथ पुष्करिणी चेभ्यां सरोजिन्यां जलाशये ।
मधुपर्णी च गाम्भार्य्यां नीलीसंज्ञौषधावपि॥१०४॥
मीनाम्नीणस्तु पुंलिङ्गो दर्दुराम्ने च खञ्जने ।
रक्तरेणुस्तु सिन्दूरे पलाशकोरके पुमान् ॥१०५॥
रागचूर्णः पुमान् दन्तधावने मकरध्वजे ।
रेरिहाणस्तु पुंसि स्यात् महादेवेऽसुरेऽपि च ॥१०६॥
लम्बकर्णः स्मृतोऽङ्कोटपादपे शशकेऽपि च ।
विदारणं विडम्बे च भेदे क्लीवं रणे द्वयोः ॥१०७॥
अथ वैतरणी नद्यां प्रेतानां यातुमातरि ।
शरवाणिः शरमुखे पायिके शरजीविनि ॥१०८॥
पुमानथ शिखरिणी रसालावृत्तभेदयोः ।
नारीरत्ने मल्लिकायां रोमावल्यामपि स्त्रियाम्॥१०९॥
अथ संसरणं क्लीवमसम्बाधचमूगतौ ।
घण्टापथे च संसारे रणारम्भे च कुत्रचित्॥११०॥
समीरणः स्यात् पवने पथिके च फणिज्झके ।
हस्तिकर्णश्चोरुबूके पलाशगणभेदयोः ॥१११॥

णपञ्चकम् ।

अयथ्रहणमित्येतत् प्रतिरोधेऽप्यनादरे ।
अवतारणं भूतादिग्रहे वस्त्राञ्चलेऽर्चने ॥११२॥

प्रविदारणमाख्यातं सम्परायेऽवदारणे।
परिभाषणं सनिन्दोपालम्भने नियमेऽपि च ॥११३॥
उक्तो मत्तवारणस्तु प्रक्लिन्नकटकुञ्जरे।
क्लीवं प्रासादवीथीनां कुन्दवृत्तवृतावपि ॥११४॥
मण्डूकपर्णी मञ्जिष्ठा ब्राह्मण्यो र्ना तु शोणके।
लोमहर्षणं रोमाञ्चे ना द्यूते च विभीतके ॥११५॥
वातरायण उन्मत्ते निष्प्रयोजनपूरुषे।
काण्डे च करपात्रे च कूटे च परसंक्रमे ॥११६॥

णषट्कम्।

दोहदलक्षणमुक्तं वयसः सन्धौ च गर्भे च।
यौवनलक्षणमप्याख्यातं लावण्यकुचयोः ॥११७॥

णान्तवर्गः समाप्तः।

तैकम्।

तस्तौराम्रतपुच्छेषु क्रोडे म्लेच्छेऽपि कुत्रचित्।
अपुमान् तरणे पुण्ये कथितः शब्दवेदिभिः ॥१॥

नद्विकम्।

अस्तं क्षिप्तेऽप्यवसिते त्रिषु ना पश्चिमाचले।
अन्तं स्वरूपे नाशे ना नस्त्री ग्रेऽन्तिके त्रिषु ॥२॥
आर्त्तिः पीडाधनुष्कोट्योः व्याप्तो लब्धे स्वसत्ययोः

आप्तिः स्त्री योगसम्प्राप्त्योरितं स्मृते गते त्रिषु॥३॥
ईतिर्डिम्बे प्रवासेऽतिवृष्ट्यादिषट्सु च स्त्रियाम्।
उक्तमेकाक्षरच्छन्दस्युक्तः स्याद् भाषिते त्रिषु॥४॥
ऊतिः स्त्री रक्षणे स्यूता वृतिः काल्याणवर्त्मनोः।
जुगुप्साघर्द्धयोः स्त्री स्यादृतमुञ्छशीले जले॥५॥
सत्ये दीप्ते पूजिते स्यादृतुर्वर्षादिषट्सु च।
आर्त्तवे भासि च पुमानेतः कर्व्वुर आगते॥६॥
क्षत्ता शूद्रात् क्षत्त्रियाजे प्रतीहारे च सारथौ।
भुजिष्यातनयेऽपि स्यात् नियुक्तवेधसोः पुमान्॥७॥
कर्त्ता तु कारके वाच्यलिङ्गो ना परमेष्ठिनि।
क्रतुर्यज्ञे मुनौ पुंसि कान्तिः शोभेच्छयोः स्त्रियाम्॥८॥
कान्ता नार्य्यां प्रियङ्गौ स्त्री शोभने त्रिषु माधवे।
लोहे च चन्द्रसूर्य्यायः पर्य्यायान्तःशिलासु च॥९॥
क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम्।
कीर्त्तिःप्रसादयशसोर्व्विपित्कुन्तोगवेधुकायां स्यात्॥१०
प्रासायुधे च कुन्ती गुग्गुलुपृथयोश्च शल्लक्याम्।
क्षतं युगेऽसमर्थेऽपि विदिते हिंसिते त्रिषु॥११॥
कृत्तन्तु वेष्टिते छिन्ने कृतिः करणहिंसयोः।
कृत्तिश्चर्म्मत्वचोर्भूर्जे कृत्तिकायां द्वयं स्त्रियाम्॥१२॥
केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्षणे।

गर्त्तस्त्रिगर्त्तभेदे स्यादवटे च कुकुन्दरे ॥१३॥
ग्रस्तं ग्रासीकृतेऽपि स्याल्लुप्तवर्णपदोदिते ।
गतिः स्त्री मार्गदशयोर्ज्ञाने यात्राभ्युपाययोः ॥१४॥
नाडीव्रणे सरण्याञ्च गतं विज्ञातयातयोः ।
गातु-र्ना कोकिले भृङ्गे गन्धर्व्वे त्रिषु रोषणे ॥१५॥
गीतिश्छन्दसि गाने स्त्री गीतं शब्दितगानयोः ।
गुप्तिः स्त्र्यवकरस्थाने कारागारे च रक्षणे ॥१६॥
गुप्तं स्याद् रक्षिते गूढे घातः काण्डप्रहारयोः ।
घृतमाज्ये जले क्लीव प्रदीप्ते त्वभिधेयवत् ॥१७॥
चितं छन्ने त्रिषु चिता चित्यायां सहतौ स्त्रियाम् ।
चितिश्चित्यावृन्दयोः स्त्री जात व्यक्तौघजन्मसु ॥१८॥
क्लीव त्रिलिङ्गमुत्पन्ने जातिः स्त्री गोत्रजन्मनोः ।
अश्मन्तिकामलक्योश्च सामान्यच्छन्दसोरपि ॥१९॥
जातीफले च मालत्या ज्ञातिस्तातसगोत्रयोः ।
पुमानथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम ॥२०॥
क्लीवं वीणादिवाद्ये स्यात् पुलिङ्गस्तु सदागतौ ।
तातोऽनुकम्प्येऽ जनके तिक्तो रसस्सुगन्धयोः ॥२१॥
तिक्ता तु कटुरोहिण्या पर्पटे तु नपुंसकम् ।
ध्वस्त धूलौ च पापे च जटायाञ्च नपुंसकम् ॥२२॥
त्रेता युगेऽग्नित्रितये दत्तं विश्राणितेऽवित्ते ।

दन्तोऽद्रिकटके कुञ्जे दशनेऽनैापधैा स्त्रियाम् ॥२३॥
दान्तस्तु दमितेऽपि स्यात् तपःक्लेशसहे त्रिषु ।
दिति दैत्यजनन्याञ्च खण्डनेऽपि च योषिति ॥२४॥
दीप्तं निर्भासिते दग्धे ज्वलितेऽथ द्रुतं त्रिषु । . .
शीघ्रे विलीने विद्रावे द्युतिः स्त्री रश्मिशोभयोः॥२५॥
इति चर्म्मपुटे मत्स्ये ना धातु र्नेन्द्रियेषु च ।
शब्दयोनिमहाभूततद्गुणेषु रसादिषु ॥२६॥
मनःशिलादौ श्लेष्मादौ विशेषाद् गैरिकेऽस्थ्नि च ।
धाता हिरण्यगर्भे ना पालके त्रिष्वथो धुतम्॥२७॥
त्यक्ते विधूते धूतन्तु कम्पिते भर्त्सिते त्रिषु ।
धूर्त्तन्तु खण्डलवणे धूस्तूरे ना विटे त्रिषु ॥२८॥
धृति र्नैष्टौ स्त्रियां तुष्टौ योगभिद्धैर्य्यधारणे ।
नतं तगरपाद्यां स्यात् क्लीवं कुटिलनम्रयोः ॥२९॥
त्रिषु नीति र्नयेऽपि स्यात् प्रापणेऽपि च योषिति ।
पक्तिः स्त्री गौरवे पाके पत्ति र्ना पदगे स्त्रियाम् ॥३०
गतावेकरथैकेभत्र्यश्वपञ्चपदातिके ।
पङ्क्ति र्दशाक्षरच्छन्दोदशसङ्ख्यालिषु स्त्रियाम् ॥ ३१ ॥
पति र्धवे ना त्रिष्वीशे प्राप्तं लब्धे समञ्जसे ।
पातोनायतने चाते त्रिषु प्राप्ति र्महोदये ॥३२॥
लाभेऽपि च स्त्रियां प्रीतिः पूर्त्तिप्रदेशयोः स्त्रियाम् ।

पीतिर्नाम्नि स्त्रियां पाने प्रीतं हृषितनर्म्मणोः ॥३३॥
पीतं पाने हरिद्रायां स्त्रियां गौरेऽभिधेयवत्।
प्रीति र्योगान्तरे प्रेम्णि स्मरपत्नीमुदोः स्त्रियाम् ॥३४॥
पुस्तं क्लीवं पुस्तके च लेप्यादिशिल्पकर्म्मणि।
प्रुतं तुरङ्गमगतौ क्लीवं पुंसि त्रिमात्रके ॥३५॥
पूतं त्रिषु पवित्रे च शठिते बहुलीकृते।
पूर्त्तं त्रिषु पूरिते स्यात् क्लीवं खातादिकर्म्मणि ॥३६॥
प्रोतं नपुंसकं वस्त्रे खचिते वाच्यलिङ्गकम्।
प्रेतो भूतान्तरे पुंसि मृते स्याद् वाच्यलिङ्गकः।
पोतः शिशौ वहित्रे च गृहस्थाने च वाससि ॥३७॥
वृतिस्तु वरणेऽपि स्याद् वेष्टनेऽपि च योषिति।
भर्त्ता स्वामिनि पुंसि स्यात् त्रिषु धातरि पोष्टरि॥३८॥
भक्ति र्विभागे सेवायां स्त्रियां भ्रान्तिस्तु योषिति।
मिथ्यामतौ च भ्रमणे भित्तिः कुड्यप्रदेशयोः ॥३९॥
भीतिर्भये स्त्रियां भीतं भयेऽथ भीयुते त्रिषु।
भूति र्भस्मनि सम्पत्तिहस्तिशृङ्गारयोः स्त्रियाम् ॥४०॥
भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते।
प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना ॥४१॥
कुमारेऽपि भृतिः स्त्री स्यान् मूल्येऽपि भरणेऽपि च।
मतन्तु सम्मते ज्ञाते मतिः स्त्रीच्छाधियोः स्मृतौ॥४२॥

मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ।
माता गौर्य्यादिजननी गोब्राह्मण्यादिभूमिषु ॥४३॥
मितिर्मानेऽप्यवच्छेदे मुक्ति र्मोचे च मोचणे।
मोचादयः स्त्रियां मुक्तः प्राप्तमोक्षे च मोचिते ॥४४॥
त्रिषु स्त्री मौक्तिके मूर्त्तिः कायकाठिन्ययोःस्त्रियाम्।
मूर्त्तं स्यात् त्रिषु मूर्च्छाले कठिने मूर्त्तिमत्यपि ॥४५॥
मृतन्तु याचिते मृत्यौ क्लीवं मृत्युमति त्रिषु।
यतिः स्त्री पाठविच्छेदे निकारयतिनोः पुमान् ॥४६॥
यन्ता हस्तिपके सूते युक्तिः स्त्री न्याययोगयोः।
युतो युक्तोऽपृथग्भूते क्लीवं हस्तचतुष्टये ॥४७॥
रक्तोऽनुरक्ते नील्यादिरञ्जिते लोहिते त्रिषु।
क्लीवन्तु कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि ॥४८॥
रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः।
रथ्या वर्त्मनि नद्यां स्त्री रतं सुरतगुह्ययोः ॥४९॥
रतस्त्रिष्वनुरक्ते स्यात् तत्परे चाभिधेयवत्।
रिक्तं शून्ये वने रीतिः स्त्रियां स्यन्दप्रचारयोः ॥५०॥
पित्तले लोहकिट्टे च लता प्रियङ्गुशाखयोः।
पृक्काज्योतिष्मतीवल्लीलता कस्तूरिकासु च ॥५१॥
माधवीदूर्व्वयो र्लिप्तं विलिप्तविषदिग्धयोः।
भक्ते लूता तन्तुनाभे पिपीलिकागदान्तरे ॥५२॥

वप्ता तु जनके पुंसि वापकेऽप्यभिधेयवत् ।
वक्ता तु पण्डितेऽपि स्याद् वाग्मिन्यप्यन्यलिङ्गकः ॥५३॥
व्यस्तस्तु व्याकुले व्याप्ते व्यक्तः स्फुटमनीषिणोः ।
वस्ति र्द्वयो र्निरूहे नाभ्यधो भूम्नि दशासु च ॥५४॥
वर्त्ति र्भेषजनिर्म्माणे नयनाञ्जनलेखयोः ।
गात्रानुलेपनीदीपदशादीपेषु योषिति ॥५५॥
वार्त्ता तु वर्त्तने वातिङ्गणे कृष्याद्युदन्तयोः ।
निःसारारोग्ययोः क्लीवं वृत्तिमन्नीरुजोस्त्रिषु ॥५६॥
व्याप्त ख्याते समाक्रान्ते व्याप्ति र्व्यापनलब्धयोः ।
स्त्रियां वित्ति र्विचारे च लाभसम्भावयोः स्त्रियाम्॥५७॥
वित्तं क्लीवं धने वाच्यलिङ्गं ख्याते विचारिते ।
वीतमसारगजे स्यादङ्कुशकर्म्मण्यसारतुरगे च॥५८॥
वीति र्गतौ च दीप्तौ प्रजनाशनधावनेषु स्त्री ।
वृत्ति र्विवरणाजीवकौशिक्यादिप्रवर्त्तने ॥५९॥
वृन्तं प्रसवबन्धेऽस्त्री घटीधाराकुचाग्रयोः ।
वृत्तोऽधीतेऽप्यतीतेऽपि वर्त्तुलेऽपि वृते मृते ॥६०॥
दृढेऽन्यलिङ्गवान् क्लीवं छन्दस्यारिचवृत्तिषु ।
शक्तिरस्त्रान्तरे गौर्य्यामुत्साहादौ बले स्त्रियाम्॥६१॥
शस्तं चेम प्रशस्ते च शान्तिः स्त्री सङ्गले शमे ।
शास्ता समन्तभद्रे ना शासके पुनरन्यवत् ॥६२॥

शान्तोऽभियुक्तरसयोः पुंसि त्रिषु शमान्विते।
अव्ययं वारणे शान्तं शान्तं शितञ्च दुर्बले॥६३॥
निशिते च शिति भूर्जे ना सितासितयोस्त्रिषु।
शीतं हिमगुणे क्लीवं शीतलालसयोस्त्रिषु॥६४॥
वानीरे बहुवारे ना शुक्तं पूताम्लनिष्ठुरे।
श्रुतिः श्रोत्रे च तत्कर्म्मण्याम्नायवार्त्तयोः स्त्रियाम्॥६५॥
शुक्तिः कपालशकले शङ्खे शङ्खनखेऽपि च।
नख्य आवर्त्तदुर्नाम मुक्तास्फोटेषु च स्त्रियाम्॥६६॥
श्रुतमाकर्णिते शास्त्रे श्वेतो द्वीपाद्रिभेदयोः।
श्वेता वराटिकाकाष्ठपाटलाशङ्खिनीषु च॥६७॥
क्लीवं रूप्येऽन्यवत् शुक्ले सन् साधौ धीरशस्तयोः।
मान्ये सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियाम्॥६८॥
साति र्दानेऽवसाने स्त्री स्वान्तं चेतसि गह्वरे।
स्थितं प्रतिज्ञातवति चोर्द्धनिश्चलयोस्त्रिषु॥६९॥
स्थितिः स्त्रियामवस्थाने मर्य्यादायाञ्च सीमनि।
सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री॥७०॥
सीता लाङ्गलपद्धतिर्वैदेहीस्वर्गगङ्गयोः।
सुतस्तु पार्थिवे पुत्रे त्वपत्ये तु सुता स्मृता॥७१॥
सुतिः सार्गाजतानिद्राविश्रम्भे शयने स्त्रियाम्।
सूतस्तु सारथौ तक्ष्णि क्षत्रियाद् ब्राह्मणीसुते॥७२॥

वन्दिपारदयोः पुंसि प्रसृते प्रेरिते त्रिषु।
सूतिः सीवनसन्तत्योः स्त्रियां सूतः प्रसेवके ॥७३॥
ना त्रिपूते स्मृति धर्मशास्त्रस्मरणयोः स्त्रियाम्।
सृतिः स्त्री गमने मार्गे सेतु र्नालौ कुमारके ॥७४॥
हस्तः करे करिकरे सप्रकोष्टकरेऽपि च।
हस्ते केशात्परो व्राते हित पथ्ये गते धृते ॥७५॥
हेतिः स्यादायुधज्वालाद्दर्य्यतेजःसु योषिति।

तत्रिकस्।

अमृत यज्ञशेषे स्यात् पीयूषे सलिले घृते ॥७६॥
अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः।
अमृता मागधीपथ्यागुडूच्यामलकीषु च ॥७७॥
अमृत क्षपावसत्येऽप्यजितो ना हरौ त्रिषु।
अनिर्ज्जिते चाच्युतस्तु हरौ पुंसि त्रिषु स्थिरे ॥७८॥
अर्हितं याचितेऽपि स्यात् वातव्याधौ च हिंसिते।
अक्षतं न द्वयोः षण्डे लाजेषु त्रिष्वहिंसिते ॥७९॥
यवेऽपि क्वचिदव्यक्तो हरौ सारहरे पुमान्।
परमात्ममहदाद्योः क्लीव स्यादस्फुटे त्रिषु ॥८०॥
अनन्तः केशवे शेषे पुमाननवधौ त्रिषु।
अनन्ता च विशल्याया शारिवादूर्व्वयोरपि ॥८१
कणादुरालभापथ्यापार्व्वत्यामलकीषु च।

विश्वम्भरागुडूच्योः स्यादनन्तं सुरवर्त्मनि ॥८२॥
असन्तमशुभे चुल्ल्यां मरणेऽनवधावपि ।
क्षेत्रेऽप्यथायतिः पुंसि हिमदीधितिकालयोः ॥८३॥
अर्हंस्तु क्षपणे बुद्धे पुंसि मान्येऽन्यलिङ्गकः ।
अर्हन्तश्चापि सुगते क्षपणेऽपि च दृश्यते ॥८४॥
अगस्तिः कुम्भयोनौ च वङ्गसेनतरौ पुमान् ।
अर्व्वती कुम्भदास्याञ्च वडवायाञ्च योषिति ॥८५॥
अङ्गतिः पुंस्यग्निहोत्रब्रह्मवह्निष्वथादितिः ।
भूदेवमात्रोरंहतिस्त्यागे रोगेऽप्युभे स्त्रियौ ॥८६॥
आपातः पुंसि पतने तदात्वे च प्रकीर्त्तितः ।
आघ्रातं शिङ्घिते क्रान्तेऽप्याख्यातं भाषिते तिङि ॥८७॥
आध्मातः शब्दिते दग्धे वातरुग्भेदसंयुते ।
आप्लुतः स्नातके स्नातेऽप्यादृतः सादरेऽर्च्चिते॥८८॥
आचितः शकटोन्मेये पलानामयुतद्वये ।
पुंलिङ्गः सङ्कुचितेऽपि च्छन्नेऽपि स्यात् त्रिलिङ्गकः ॥८९॥
आहतं गुणिते चापि ताड़िते च मृषार्थके ।
स्यात् पुरातनवस्त्रेऽपि नववस्त्रे च नाऽऽनके ॥९०॥
आनर्त्तो देशभेदेऽपि नृत्यस्थाने जले रणे ।
आवर्त्तश्चिन्तने वारिभ्रमे चावर्त्तने पुमान् ॥९१॥
आस्फोतस्तु पुमानर्कपत्रे स्यात् कोविदारके ।

आस्फोता गिरिकर्ण्यास्त्र वनमल्ल्यास्त्र योषिति॥९२॥
आयस्तस्तेजिते क्षिप्ते क्रोधिते कुपिते हते ।
आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः ॥९३॥
आयत्तिस्तु स्त्रियां स्नेहे वशित्वे वासरे बले ।
आकृतिस्तु स्त्रियां रूपे सामान्यवपुषोरपि ॥९४॥
आसत्तिः सङ्गमे लाभे स्त्रियामापत्तिरापदि ।
प्रापणेऽपि च योषित् स्यादुदन्तः साधुवार्त्तयोः ॥९५॥
उषितं व्युषिते दग्धेऽप्युदात्तस्तु स्वरान्तरे ।
दयात्यागादिसम्पन्ने काव्यालङ्कारकृत्ययोः ॥९६॥
उत्तप्तं शुष्कमांसेऽथ त्रिषु तप्ते परिप्लुते ।
उचितन्तु भवेन् न्यस्ते मिते ज्ञाते समञ्जसे ॥९७॥
उद्वृत्तं स्यात् त्रिपूल्क्षिप्ते परिभुक्तोज्झितेऽपि च ।
उत्थितं स्यात् त्रिपूत्पन्ने प्रोद्यते वृद्धिमत्यपि ॥९८॥
उद्घातस्तु पुमान् पादस्खलने समुपक्रमे ।
पवनाभ्यासयोगाय कुम्भकादित्रयेऽपि च ॥९९॥
उत्तुङ्गे मुद्गरेऽपि स्यादुदितन्तूक्त उद्गते ।
उच्छ्रितं त्रिषु सञ्जाते समुन्नतप्रवृद्धयोः ॥१००॥
उन्मत्त उन्मादवति धूस्तूरमुचुकुन्दयोः ।
उद्वान्तो निर्मदगजे पुमानुद्वमिते त्रिषु ॥१०१॥
एधतुः पुरुषेऽग्नौ ना कथित विदिताप्तयोः ।

कपोतः स्याच् चित्रकण्ठपारावतविहङ्गयोः ॥१०२॥
अथ क्रन्दितमाह्वाने रुदितेऽपि नपुंसकम्।
चारितः स्राविते चारे चाभिशस्तेऽपि च त्रिषु ॥१०३॥
कापोतो रुचके क्लीवे कपोतो वेऽञ्जनान्तरे।
किरातो म्लेच्छभेदे स्याद् भूनिम्बेऽल्पतनावपि ॥१०४॥
स्त्रियां चामरधारिण्यां कुट्टिनीदुर्गयोरपि।
कृतान्तो यमसिद्धान्त दैवाकुशलकर्मसु ॥१०५॥
गर्जितं वारिवाहादिध्वनौ ना मत्तकुञ्जरे।
ग्रथितं गुम्फिते क्रान्ते हिंसिते च त्रिलिङ्गकम् ॥१०६॥
गभस्तिः किरणे सूर्ये ना स्वाहायान्तु योषिति।
गर्मुत स्त्री स्वर्णनड्यो र्गोपतिः शिवषण्डयोः॥१०७॥
नृपभास्करयोः पुंसि चेष्टितं गतिचेष्टयोः।
जगत्स्यात् पिष्टपे क्लीवं वायौ ना जङ्गमे त्रिषु॥१०८॥
जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च।
जयन्ती वृक्षभिद्गौर्य्योरिन्द्रपुत्त्रीपताकयोः ॥१०९॥
पुमानैन्द्रौ हरे भीमे ज्वलितं दग्धउज्वले।
जामाता दुहितुः पत्यौ सूर्य्यावर्त्ते धवे पुमान्॥११०॥
जीमूतोऽद्रौ धृतिकरे देवताडे पयोधरे।
जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे ॥१११॥
जीवन्ती जीवनीशम्यो र्गडूची वन्दयोरपि।

जृम्भितं करणे स्त्रीणामीहा स्फुटितयोरपि ॥११२॥
त्वरितं प्रजवे शीघ्रे त्रिगर्त्तौ गणितान्तरे ।
देशेऽपि ना घुर्घुरिका कामुकाङ्गनयोः स्त्रियाम् ।
तृणता धनुषि तृणत्वे दंशितमपि जातदंशे स्यात्॥११३॥
कवचार्चिते द्विजाति विंप्राण्डजयोश्च पुंलिङ्गः ।
दुर्ज्जातं व्यसने क्लीवेऽसम्यग् जातेऽन्यलिङ्गकम्॥११४॥
दुर्गतिर्नरके नैःस्व्ये स्त्री दृष्टान्त उदाहृतौ ।
शास्त्रे च मरणे धीमान् पण्डिते च बृहस्पतौ ॥११५॥
निर्ऋतिः स्यादलक्ष्म्यां स्त्री दिशाम्पालान्तरे पुमान्
निकृतं विप्रलब्धे स्यात् शठे विप्रकृते त्रिषु ॥११६॥
निर्मुक्त त्यक्तसङ्गे स्यान् मुक्तकञ्चुकभोगिनि ।
निरस्त स्त्रिषु निष्ठ्यूते प्रेषितेषौ द्रुतोदिते ॥११७॥
सन्त्यक्ते च प्रतिहते निमित्तं हेतुलक्ष्मणोः ।
निवातो दृढसन्नाहे वातशून्येऽपि चाश्रये ॥११८॥
निशान्त स्त्रिषु शान्ते स्यात् क्लीवन्तु भवनोषसोः ।
निकृति भर्त्सने क्षेपे शठे शाठ्येऽपि च स्त्रियाम् ॥११९॥
निर्वृतिः स्वस्थितावस्तं गमने च सुखे स्त्रियाम् ।
नियति र्नियमे दैवे स्त्री पतत् पातुके खगे ॥१२०॥
प्रहतं वितते क्षुण्णे पर्य्यस्तः पतिते हते ।
प्रभूतमुद्गते प्राज्ये पण्डितः सिह्लके कवौ ॥१२१॥

पलितं शैलजे तापे केशपाके च कर्द्दमे।
प्रहतः सम्प्रचारे स्याद् विनीते वेगिते त्रिषु ॥१२२॥
अर्द्धाञ्जलौ तु पुंलिङ्गो जङ्घायां प्रहता मता।
प्रहतं कुसुमे क्लीवं त्रिषु सञ्जातहतयोः ॥१२३॥
प्रणीतः संस्कृताग्नौ ना यज्ञपात्रान्तरे स्त्रियाम्।
त्रिषु क्षिप्तोपसम्पन्नविहितेषु प्रवेशिते ॥१२४॥
प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोस्त्रिषु।
प्रमीतं वाच्यलिङ्गं स्यात् प्रोक्षितेऽपि मृतेऽपि च॥१२५॥
परेतो वाच्यलिङ्गः स्यान् मृते भूतान्तरे पुमान्।
पर्व्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः ॥१२६॥
देवमुन्यन्तरे शैले प्रपातो निर्झरेऽतटे।
पर्य्याप्तन्तु यथेष्टे स्यात् तृप्तौ शक्ते निवारणे ॥१२७॥
पञ्चता पञ्चभावेऽपि मरणेऽपि च योषिति।
पद्धतिस्तु भवेत् पक्षमूले च प्रतिपत्तिथौ ॥१२८॥
प्रसूतिरुद्भवेऽपि स्यात् तनये दुहितर्य्यपि।
प्रततिर्विस्तृतौ वल्ल्यां पद्धतिः पङ्क्तिवर्त्मनोः ॥१२९॥
प्रवृत्तिस्तु प्रवाहे स्यादुदन्ते च प्रवर्त्तने।
अवन्त्यादौ च पर्य्याप्तिः प्रकामप्राप्तिरक्षणे ॥१३०॥
प्रकृतिर्गुणसाम्ये स्यादमात्यादि स्वभावयोः।
योनौ लिङ्गे पौरवर्गेऽमी पञ्चत्यादयः स्त्रियाम् ॥१३१॥

पार्व्वती शल्लकी दुर्गा गोपालपुत्रिकासु च ।
प्रार्थितं याचिते शत्रुसरुद्धेऽभिहिते त्रिषु ॥१३२॥
पित्सन् विहङ्गमे पुंसि पतनेच्छौ पुनस्त्रिषु ।
पिशित मासे मांस्या स्त्री पिण्डितं गणिते घने॥१३३॥
पीडितं करणे स्त्रीणां यन्त्रिते बाधितेऽपि च ।
पुटितं स्याद् हस्तपुटे पाटितस्यूतयोरपि ॥१३४॥
पृषन्मृगे पुमान् विन्दौ न दयोः पृषतोऽपि ना ।
अनयोश्च त्रिषु श्वेतविन्दुयुक्तेऽप्युभावपि ॥ १३५ ॥
प्रोषित निहते सिक्ते बृहती वसनान्तरे ।
छन्दोभित् क्षुद्रवार्त्ताकी वारिधानीषु वाचि च ॥१३६॥
कण्टकारी महत्योश्च भवत् युष्मत सतो स्त्रिषु ।
स्त्री वाणभेदे भरतो नाट्यशास्त्रे मुनौ नटे ॥१३७॥
रामानुजे च दौष्मन्तौ भास्वान् भास्करसूर्य्ययोः ।
भारतं ग्रन्थभेदे स्याद् वर्षभेदेऽथ भारती ॥१३८॥
वचने च सरस्वत्या पक्षिवृत्तिप्रभेदयो ।
भासन्त सुन्दराकारे त्रिषु ना भासपक्षिणि ॥१३९॥
भावित वासिते प्राप्ते भूभृत् नाऽद्रौ महीपतौ ।
महती वल्लकीभेदे राज्ये स्यात् तु नपुंसकम् ॥१४०॥
तत्त्वभेदे पुमान् वद्धे वाच्यवन्मथित पुनः ।
क्लीव निर्ज्जलघोले स्यात् त्रिष्वालोडितघृष्टयोः ॥१४१॥

मरुद्देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्।
लुपितं हृतखण्डितयोर्मूर्च्छितमपि सोच्छ्रये च मूढे च॥१४२॥
रजतं त्रिषु शुक्ले स्यात् क्लीवं हारे च दुर्वर्णे।
रमति र्नायके नाके पुंसि स्याद्रेसितं पुनः॥१४३॥
रुतस्तनितयोः क्लीवं स्वर्णादिखचिते त्रिषु।
रेवती हलिपत्न्यां स्यात् ताराभिन्मातृभेदयोः॥१४४॥
रैवतस्तु सुवर्णाली शैलभेदेऽपि शङ्करे।
रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने॥१४५॥
पुंसि स्यान् मीनभृगयोर्भेदे रोहितकद्रुमे।
रोहित् मृग्यां लताभेदे स्त्री नाऽर्के ललितं त्रिषु॥१४६॥
ललिते चेष्टितेऽपि स्याद् हारभेदे तु न द्वयोः।
लोहितं रक्तगोशीर्षे कुङ्कुमादिकुचन्दने॥१४७॥
पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वति।
वर्द्धितं प्रसृते छिन्ने पूरिते वहति र्गवि॥१४८॥
सचिवे पुंसि वहतुः पथिके वृषभे पुमान्।
वनिता जातरागस्त्रीस्त्रियोः स्त्री त्रिषु याचिते॥१४९॥
सेविते वापितं बीजाकृतमुण्डितयोस्त्रिषु।
वसतिः स्यात् स्त्रियां वासे यामिन्यां च निकेतने॥१५०॥
व्यायत व्यापृते दीर्घे दृढे चातिशयेऽन्यवत्।
व्याघातो योगभेदे स्यादन्तरायप्रहारयोः॥१५१॥

॥सिता करिणीनाम्न्यां वासित भाविते कृते।
॥सन्ती माधवीयूथ्योरुद्रे नाऽवहिते त्रिषु ॥१५२॥
विविक्तं त्रिष्वसम्पृक्ते रहःपूतविवेकिषु।
॥सुनन्दे ना विहस्तं पण्डे ना व्याकुले त्रिषु ॥१५३॥
विनीतः सुवहाश्वे स्याद् वणिज्यपि पुमान् त्रिषु।
जितेन्द्रियेऽपनीते च निभृते विनयान्विते ॥१५४॥
विश्वस्तो जातविश्वासे विश्वस्ता विधवास्त्रियाम्।
विद्युत् तडिति सन्ध्यायां स्त्रिया त्रिषु तु निष्प्रभे॥१५५॥
विवृता क्षुद्ररुग्भेदे विस्तृते त्वभिधेयवत्।
विनेताऽऽदेशके राज्ञि ना विधाता तु वेधसि ॥१५६॥
स्मरे ना विनता ताक्ष्यजनन्यां पिटकाभिदि।
विनतः प्रणते भुग्ने शिक्षिते चाभिधेयवत् ॥१५७॥
विकृत त्रिषु बीभत्से रोगितेऽसस्कृतेऽपि च।
विच्छित्ति रङ्गरागे च विच्छेदे हारभेदे स्त्री ॥१५८॥
विदित बुधितार्थितयो विपत्तिरपि यातनापदोर्योषित्।
वृत्तान्त-प्रक्रियया स्यात्कात्स्न्र्यवार्त्ताप्रभेदयोः॥१५९
प्रस्तावे वेष्टित रुद्धे शालके करणान्तरे।
वेल्लित गमने क्लीव कुटिले विधुते त्रिषु ॥१६०॥
शकुन्त कीटभेदे स्यात् भासपक्षिविहङ्गयोः।
श्रीमान् तिलकवृक्षे ना मनोज्ञे धनिके त्रिषु ॥१६१॥

श्रीपतिः पुंसि पृथिवीनाथे च मधुसूदने ।
शुद्धान्तोऽन्तःपुरे क्ष्माभृद्वृत्तः कक्षान्तरेऽपि च॥१६२॥
स्रवन्ती तु तरङ्गिण्यां गुल्मस्थानौषधीभिदोः ॥
संवर्त्तः प्रलये मुन्यन्तरे कर्षफलेऽपि च ॥१६३॥
स्खलितं चलिते भ्रंशे संवृतं सङ्गते दृढे ।
संस्कृतः कृत्रिमे शस्ते भूषितेऽप्यन्यलिङ्गकः ॥१६४॥
क्लीवन्तु लक्ष्मणोपेते स्थपतिः कञ्चुकिन्यपि ।
जीवेष्टि याजके शिल्पिभेदे ना सत्तमे त्रिषु ॥१६५॥
सङ्घातः स्यात् पुंसि घाते संहतौ नरकान्तरे ।
संवित्तिः प्रतिपत्तौ स्यादविवादे जनस्य च ॥१६६॥
सन्ततिः स्यात् पङ्क्तौ गोत्रे पारम्पर्ये च पुत्रयोः ।
समितिः सम्पराये स्यात् सभायां सङ्गमेऽपि च॥१६७॥
समाप्तिरवसाने स्यात् समर्थनेऽथ सम्मतिः ।
अभिलापेऽप्यनुज्ञायां संवित्त्याद्यास्तु योषिति ॥१६८॥
स्थापितं निश्चिते न्यस्ते स्तिमितौ निश्चलार्द्रयोः ।
सिकता स्त्री सिकतिले वालुकायान्तु भूमनि ॥१६९॥
सुरतं स्यान्निधुवने देवत्वे सुरता मता ।
सुकृतन्तु शुभे पुण्ये क्लीवं सुविहिते त्रिषु ॥१७०॥
सुमता सुखसन्दोह्याशोभनमतयोरपि ।
सुनीतिः शोभननये ध्रुवमातरि योषिति ॥१७१॥

हनूतं मङ्गलेऽपि स्यात् प्रियसत्यवचस्यपि ।
हरित् दिशि स्त्रियां पुंसि हयवर्णविशेषयोः ॥१७२॥
अस्त्रियां स्यात् तृणे चाथ हर्मितं क्षिप्तदग्धयोः ।
हरिता स्त्री च दूर्व्वायां हरिद्वर्णयुतेऽन्यवत् ॥१७३॥
हसन्त्यङ्गारधान्याञ्च मल्लिकाशाकिनीभिदोः ।
हारीतः पक्षिभेदे स्यान् मुनिभेदे च कैतवे ॥१७४॥
हृषितं विस्मिते प्रीते प्रहते हृष्टरोमणि ।

तचतुष्कम् ।

अवसितमृद्धेज्ञातेऽप्यवसानगतेचवाच्यलिङ्गंस्यात्१७५
अर्थपतिः पुंल्लिङ्गो धनाधिनाथे च नरनाथे ।
अवदातं सिते गौरे विशुद्धेऽप्यन्यलिङ्गकम् ॥१७६॥
अवगीतन्तु निर्व्वादे दुष्टगर्हितयोरपि ।
अन्तर्गत विस्मृते स्यान् मध्यप्राप्ते च वाच्यवत् ॥१७७॥
अङ्गारितन्तु दग्धे स्यात्पलाशकलिकोद्गमे ।
अपावृतस्तु पिहिते स्वतन्त्रे चापि वाच्यवत् ॥१७८॥
अत्याहित महाभीतौ जीवनापेक्षकर्मणि ।
अभिनीतस्त्रिषु न्याय्ये संस्कृतामर्षिणोरपि ॥१७९॥
अभिजातः कुलीने स्यान् न्याय्यपण्डितयोरपि ।
अभियुक्तः परै रुद्धे तत्परेऽप्यभिधेयवत् ॥१८०॥

अतिमुक्तस्तु निःसङ्गे वासन्त्यां तिनिशेऽपि च।
अपध्वस्तः परित्यक्ते निन्दितेऽप्यवचूर्णिते ॥१८१॥
अधिक्षिप्तः प्रणिहिते कुत्सिते भर्त्सिते त्रिषु।
अंशुमान् भास्करे शालपर्ण्यामंशुमती स्मृता ॥१८२॥
भवेदपचितिः पूजाव्ययनिष्कृतिहानिषु।
अथानुमतिरूनेन्दुपूर्णिमानुज्ञयोरपि ॥१८३॥
अभिशस्तिः प्रार्थनापवादयोश्च त्रयं स्त्रियाम्।
आयुष्मानुयोगभेदे ना वाच्यवच्चिरजीविनि ॥१८४॥
उपाहितोऽनलोत्पाते पुमानारोपिते त्रिषु।
उपाकृतोऽध्वरहतपशौ नोपद्रुते त्रिषु ॥१८५॥
उदास्थितः प्रतीहारे प्रव्रज्यावसिते चरे।
स्यादुल्लिखितमुत्कीर्णे तनूकृते च वाच्यवत् ॥१८६॥
उद्ग्राहितमुदीर्णे स्याद् बद्धग्राहितयोस्त्रिषु।
भवेदुपचितं दिग्धे समृद्धे चान्यलिङ्गकम् ॥१८७॥
उज्जृम्भितं त्रिपूत्फुल्ले चेष्टायाञ्च नपुंसकम्।
उपरक्तो व्यसनार्त्ते राहुग्रस्तेन्दुसूर्य्ययोः ॥१८८॥
उपसत्तिः सङ्गमात्रे सेवायामपि योषिति।
ऋष्यप्रोक्ता शतावर्य्यतिबलाशूकशिम्बिषु ॥१८९॥
ऐरावतोऽभ्रमातङ्गे नारङ्गे लकुचद्रुमे।
नागभेदे च पुंसि स्याद् विद्युत्तडेदयोः स्त्रियाम् ॥१९०॥

नपुंसकं महेन्द्रस्य ऋजुदीर्घशरासने ।
कलधौतं सुवर्णे स्याद् रजते च नपुंसकम् ॥१८१॥
भवेत् कुहरितं क्लीवं पिकालापे रतध्वनौ ।
कुमुदान् कुमुदप्राये देशे स्याद् वाच्यलिङ्गकः ॥१८२॥
कुमुद्वती कुमुद्विन्यां कुशपत्न्याञ्च योषिति ।
कृष्णवृन्ता पाटलायां माषपर्ण्याञ्च योषिति ॥१८३॥
अथ गन्धवती पृथ्वी पुरीभिद् व्यासमातृषु ।
सुरायाञ्च गरुत्मांस्तु पक्षिमात्रे खगाधिपे ॥१८४॥
भवेद् गृहपतिः पुंसि गृहस्थेऽपि च सत्रिणि ।
चन्द्रकान्तस्तु पुंसि स्यान् मणिभेदे च कैरवे ॥१८५॥
चर्म्मण्वती नदीभेदे कदलीपादपे स्त्रियाम् ।
चित्रगुप्तस्तु पुंसि स्याद् यमे तस्य च लेखके ॥१८६॥
दिवाभीतः कुम्भिले स्याद् उलूके कुमुदाकरे ।
दिवाकीर्त्तिस्तु पुंसि स्यान् नापितान्तावसायिनोः ॥१८७॥
दीपवान् सिन्धुनद्योर्द्वीपवत्यापगाभुवोः ।
दृषद्वती नदीभेदे कात्यायन्यामपि स्त्रियाम् ॥१८८॥
स्याद् धूमकेतुरुत्पातभेदे वैश्वानरे पुमान् ।
नन्द्यावर्त्तः पुमान् वेश्मप्रभेदे तगरद्रुमे ॥१८९॥
नदीकान्तः समुद्रे स्यान् हिज्जले सिन्धुवारके ।
नदीकान्ता स्त्रियां जम्ब्वां काकजङ्घौपधावपि ॥२००॥

नागदन्तो द्विपरदे गृहान्निर्गतदारुणि ।
नागदन्ती तु कुम्भायां श्रीहस्तिन्यामपि स्त्रियाम्॥२०१
निष्कासितो निर्गमितेऽप्याहिते धिक्कृतेऽपि च ।
अथ निस्तुषितं त्यक्ते त्वग्विहीने लघूकृते ॥२०२॥
निराकृतिरनाकारेऽस्वाध्याये त्रिषु वारणे ।
स्त्रियां परिगतं प्राप्ते विस्मृतज्ञातचेष्टिते ॥२०३॥
अथ प्रणिहितं न्यस्ते प्राप्तेऽपि च समाहिते ।
अथ पल्लवितं लाक्षारक्ते सपल्लवे तते ॥२०४॥
भवेत् प्रतिहतं द्विष्टे प्रतिस्खलितरुद्धयोः ।
प्रतिक्षिप्तं वारिते स्यात् प्रेषिते पञ्चकं त्रिषु ॥२०५॥
परिवर्त्तो विनिमये कूर्म्मराजे ऽपवर्त्तने ।
परिस्नुता स्त्री वारुण्यां स्यन्दे स्यादभिधेयवत् ॥२०६॥
प्रधूपिता क्लेशितायां सूर्य्यगन्तव्यदिश्यपि ।
पर्य्युषितः पुंसि प्रेते प्रत्यक्तवस्तुनि त्रिषु ॥२०७।
पञ्चगुप्तस्तु चार्व्वाकदर्शने कमठे पुमान् ।
प्रजापति र्ना दक्षादौ महीपाले विधातरि ॥२०८॥
प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि च ।
सम्प्राप्तौ च प्रबोधे च पदप्राप्तौ च योषिति ॥२०९॥
अथ प्रव्रजिता मांसी मुण्डीरी तापसीषु च ।
प्रतिकृतिरर्च्चायां प्रतिनिधिप्रतिकारयोश्च स्त्री ॥२१०॥

पाशुपतो वकपुष्पे पशुपत्यधिदैवते च तद्भक्तो।
पारिजातः सुरतरौ पारिभद्रतरावपि ॥२११॥
पारावती गोपगीति नदीभिल्लवल्ली फले।
पारावतः कलरवे तथा मर्कटतिन्दुके ॥२१२॥
पुष्पदन्तस्तु दिङ्नागभेदे विद्याधरान्तरे।
पुरस्कृतोऽभिशस्तारिग्रस्ताग्रे कृतपूजिते ॥२१३॥
भगवान् ना जिने गौर्य्यां स्त्रियां पूज्ये तु वाच्यवत्।
अथ भोगवती नागपुरी नद्योरहौ पुमान् ॥२१४॥
रक्तमाता तु कुट्टन्यां वृत्तरोगान्तरे पुमान्।
लक्ष्मीपतिः पुमान् वासुदेवे नरपतावपि ॥२१५॥
व्यतीपातो महोत्पाते योगभेदापमानयोः।
वनस्पति र्ना द्रुमात्रे विना पुष्पं फलिद्रुमे ॥२१६॥
विनिपातो निपाते स्याद् दैवादिव्यसने पुमान्।
विजृम्भितन्तु चेष्टाया क्लीवं त्रिषु विकस्वरे ॥२१७॥
विवस्वांस्तु सुरे स्वर्य्ये तन्नगर्य्यां विवस्वती।
वैजयन्तो महेन्द्रस्य ध्वजप्रासादयोः पुमान् ॥२१८॥
वैजयन्ती पताकायां जयन्तीपादपे स्त्रियाम्।
भवेत् शतधृतिः पुंसि शक्रे च परमेष्ठिनि ॥२१९॥
शुभदन्ती सुदत्यां स्यात् पुष्पदन्तिभयोषिति।
समुद्धतं समुद्गीर्णेऽप्यविनीते च वाच्यवत् ॥२२०॥

सदागतिर्नार्कवातनिर्व्वाणेषु सदीश्वरे।
सरस्वांस्तु नदे चाब्धौ नान्यवद् रसिके स्त्रियाम् ॥२२१॥
वाणी स्त्री रत्नवाग्देवी गोनदीषु नदीभिदि।
मनुपत्न्यामपि सत्यवती व्यासस्य मातरि ॥२२२॥
नारदर्च्चीकयोः पत्न्यां स्त्रियां पुंसि नृपान्तरे।
समुद्रान्ता तु कार्पासी पृक्कादुरालभासु च ॥२२३॥
समाहितः समाधिस्थेऽप्युक्तसिद्धान्त आहिते।
निर्विवादीकृतेऽपि स्यात् प्रतिज्ञाते च वाच्यवत् ॥२२४॥
समाघातो वधे युद्धे सङ्ख्यावान् पण्डिते पुमान्।
सङ्ख्यायुक्तेऽन्यलिङ्गोऽथ सुधाहृतिः पुमान् मखे ॥२२५॥
चन्द्रे सुभाषितो बुद्धे पुमान् सूक्ते नपुंसकम्।
सूर्य्यभक्तस्तु बन्धूके पुंसि त्रिष्वर्कपूजके ॥२२६॥
सेनापतिः कार्त्तिकेयेऽप्यनीकाधिकृते पुमान्।
हिमारातिः पुमान् वीतिहोत्रे किरणमालिनि ॥२२७॥
हैमवत्यभया स्वर्णक्षीर्य्योः श्वेतवचो मयोः।

नपञ्चकम्।

अवलोकितो ना लोकनाथे त्रिषु निरीक्षिते ॥२२८॥
अपराजित ईशाजिष्णुरुद्रे नाऽजिते त्रिषु।
गिरिकर्णी जयादुर्गासनपर्णीषु योषिति ॥२२९॥

उपधूपित आसन्नमरणे परिधूपिते ।
स्याद् गणाधिपतिः पुंसि शङ्करेऽपि गजानने ॥२३०॥
भवेत् पिपतिषन् पित्सौ त्रिषु पुंसि विहङ्गमे ।
पृथिवीपतिस्तु भूपे ऋषभाख्यौषधौ पुमान ॥२३१॥
मूर्द्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि च ।
यादसाम्पतिरम्भोधौ पश्चिमाशापतौ पुमान ॥२३२॥
वसन्तदूतश्चूते स्यात् पिकपञ्चमरागयोः ।
वसन्तदूती पाटल्यामतिमुक्ते च योषिति ।

तषट्कम् ।

अर्द्धपारावतश्चित्रकण्ठे तित्तिरपक्षिणि ॥२३३॥

नसप्तकम ।

समुद्रनवनीतं स्यात् क्लीवं पीयूषचन्द्रयोः ।

नान्तवर्गः समाप्तः ।

यैककम् ।

य रक्षणे मङ्गले च साध्वसे च नपुंसकम् ।
शिलोच्चये पुमानेव क्वचित्तु भयरक्षके ॥१॥

यद्विकम् ।

अर्थो विषयार्थनयो र्धनकारणवस्तुषु ।
अभिधेये च शब्दाना निवृत्तौ च प्रयोजने ॥२॥

आस्थालाम्बनास्थानयत्नापेक्षासु योषिति।
कन्था मृन्मयभित्तौ स्यात् तथा प्रावरणान्तरे ॥३॥
क्वाथः स्यादतिदुःखेऽपि निष्पाके च द्रवस्य च।
कुथः स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषि ॥४॥
कोथो ना नेत्ररोगस्य भेदे च शटिते त्रिषु।
ग्रन्थो ग्रन्थनधनयोः स्यात् शास्त्राक्षरसङ्ख्ययोः ॥५॥
ग्रन्थिस्तु ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्व्वणोः।
गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः ॥६॥
तीर्थं शास्त्राध्वरक्षेत्रोपाय नारीरजःसु च।
अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु ॥७॥
तुत्थमञ्जनभेदे स्यान् नीलीसूक्ष्मैलयोः स्त्रियाम्।
दुःस्थः स्याद् दुर्गते मूर्खे दुःखेन तिष्ठति त्रिषु॥८॥
प्रस्थोऽस्त्रियां मानभेदे सानावुन्नितवस्तुनि।
पाथोऽर्केऽग्नौ जले क्लीबं पृथुः स्यान् महति त्रिषु॥९॥
त्वक्पर्ण्यां कृष्णजीरे स्त्री पुमानग्नौ नृपान्तरे।
प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु॥१०॥
मन्थः स्यात् पुंसि मन्थाने साक्तवे च दिवाकरे।
यूथं तिर्य्यक् समूहेऽस्त्री पुष्पभेदे तु योषिति ॥११॥
रथः पुमानवयवे स्यन्दने वेतसेऽपि च।
वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः ॥१२॥

संस्थसरेऽवस्थिते स्त्री स्थितौ सादृश्यनाशयोः ।
सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके ॥१३॥
सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम् ।

थत्रिकम् ।

अतिथिः कुशपुत्रे स्यात् पुमानागन्तुके त्रिषु ॥१४॥
अश्वत्थः पिप्पलद्रौ स्यादश्वत्था पूर्णिमातिथौ ।
अव्यथो निर्व्यथे सर्पे चारटीपथ्ययोः स्त्रियाम् ॥१५॥
उन्माथः कूटयन्त्रे स्यान्मारणे घातके पुमान् ।
उपस्थः शेफसि क्रोडे तथा मदनमन्दिरे ॥१६॥
उद्रथो रथकीले स्यात् ताम्रचूडाख्यपक्षिणि ।
चवथु र्ना क्षुते कासे कायस्थः परमात्मनि ॥१७॥
नरजातिविशेषे ना हरितक्यान्तु योषिति ।
कापथः कुत्सितपथे उशीरे क्लीवमिष्यते ॥१८॥
गोग्रन्थि र्नाकरीषे स्याद् गोष्ठे गोजिह्विकौषधौ ।
दमथस्तु पुमान् दण्डे दमे च परिकीर्त्तितः ॥१९॥
निशीथस्तु पुमानर्द्धरात्रे स्याद् रात्रिमात्रके ।
निर्ग्रन्थो नग्नकेऽपि स्यान् निःस्वबालिशयोरपि ॥२०॥
प्रमथा स्यात् हरीतक्यां हरपारिषदे पुमान् ।
वरूथो रथगुप्तौ स्यात् वरूथं चर्मवेश्मनोः ॥२१॥

मन्मथः कामचिन्तायां कपित्थे कुसुमायुधे।
वयःस्था तु स्त्रियां ब्राह्मीगुडूच्यामलकीषु च ॥२२॥
हस्वैलायाञ्च काकोल्यां पथ्यायां तरुणे त्रिषु।
वमथुः पुंसि वमने गजस्य करशीकरे ॥२३॥
विदिशे। योगिकृतिनोः शमथः शान्तिमन्त्रिणोः।
षड्ग्रन्थातु वचायां स्त्री स्यात्करञ्जान्तरे पुमान्॥२४॥
समर्थस्तु हिते शक्ते सम्बद्धेऽप्यन्यलिङ्गकः।
सिद्धार्थस्तु पुमान् शाक्यसिंहे च सितसर्षपे ॥२५॥

थचतुष्कम्।

अनीकस्थो रणगते हस्तिशिक्षाविचक्षणे।
राजरक्षिणि चिह्ने च वीरमर्द्दनकेऽपि च ॥२६॥
भवेदिति कथाऽपार्थवाच्यश्रद्धेयनष्टयोः।
चतुष्पथं चतुर्मार्गे सङ्गमे ब्राह्मणेऽपि ना ॥२७॥
अथ चित्ररथः सूर्य्यगन्धर्व्वान्तरयोः पुमान्।
दशमीस्थो नष्टवीर्य्ये स्थविरेऽप्यलिङ्गकः ॥२८॥
वाणप्रस्थो मधूकेऽपि स्यात् तृतीयाश्रमे पुमान्।
भवेदुदरथिः पुंसि समुद्रे च विवस्वति ॥२९॥

थान्तवर्गः समाप्तः।

दैककम्।

दः पुमानचले दत्ते स्त्रियां शोधनदानयोः।
क्वे दोपतापरचासु पुमांस्तु दातरि स्मृतः॥१॥

ददिकम्।

अब्दः संवत्सरे वारिवाहमुस्तकयोः पुमान्।
अन्दः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च॥२॥
कन्दोऽस्त्री सूरणे शस्यमूले जलधरे पुमान्।
कुन्दो माघ्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना॥३॥
चोदः स्यात् पुंसि रजसि पेषणे च प्रकीर्त्तितः।
गदो भ्रातरि विष्णोः स्यादामये नाऽऽयुधे गदा॥४॥
छदः पलाशे गरुति ग्रन्थिपर्णतमालयोः।
छन्दो वशेऽभिप्राये धीदा पुत्रीमनीषयोः॥५॥
नन्दिर्द्यूताङ्ग आनन्देऽस्त्री नन्दिकेश्वरे पुमान्।
नदी सरिति शोणादौ ना नन्दा स्यादलिञ्जरे॥६॥
गौर्य्यां तिथिविशेषे स्त्री निधिराजभिदोः पुमान्।
निन्दा स्यादपवादेऽपि कुत्सायामपि योषिति॥७॥
पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः।
पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः॥८॥
श्लोकपादेऽपि च क्लीबं पुलिङ्गः किरणे पुनः।
पादो ब्रध्ने तुरीयांशे शैलप्रत्यन्तपर्व्वते॥९॥

चरणे च मयूखे च वन्दा लतान्तरे स्मृता।
भिक्षुक्यामपि वन्द्याञ्च बिन्दुर्दन्तक्षतान्तरे ॥१०॥
भ्रुवोर्मध्ये रूपकार्थप्रकृतौ पृषते पुमान्।
वेदितर्य्यन्यलिङ्गः स्याद् भद्रं कल्याणशर्म्मणोः॥११॥
भेदो द्वैधे विशेषे स्यादुपजापे विदारणे।
मदो रेतसि कस्तूर्य्यां गर्व्वे हर्षेभदानयोः ॥१२॥
मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः।
अल्पे च त्रिषु पुंसि स्यात् हस्तिजात्यन्तरे शनौ॥१३॥
मृदुः स्यात् कोमलेऽतीक्ष्णे रदो दन्ते विलेखने।
विद्या ज्ञाने च निर्दिष्टा मनीषायाञ्च योषिति ॥१४॥
वेदः श्रुतौ च वृत्ते च वेदिः स्यात् पण्डिते पुमान्।
स्त्रियामङ्गुलिमुद्रायां स्यात् परिष्कृतभूतले ॥१५॥
शादः स्यात् कर्द्दमे शष्पे स्वादुर्मिष्टमनोज्ञयोः।
सूदस्तु कथितः सूपकारे च व्यञ्जनान्तरे॥१६॥
स्वेदस्तु स्वेदने घर्म्मे हृद् क्लीवं बुक्कचित्तयोः।

दत्रिकम्।

अङ्गदः कपिभेदे ना केयूरे तु नपुंसकम् ॥१७॥
अङ्गदा याम्यदिग्दन्तिहस्तिन्यामपि योषिति।

अर्द्धेन्दुः स्यादतिप्रौढस्त्रीयोन्यङ्गुलियोजने ।
अर्ब्बुदो मांसपुरुषे दशकोटिषु न स्त्रियाम् ॥१९॥
महीधरविशेषे नाऽथास्पदं पदकृत्ययोः ।
आसन्दो वासुदेवे स्यात् खट्वाभेदे च योषिति ॥२०॥
आक्रन्दः क्रन्दने ह्वाने मित्रदारुणयुद्धयोः ।
भ्रातर्य्यपि च पुंसि स्यादामोदो गन्धहर्षयोः ॥२१॥
ककुद् स्त्री ककुदोऽप्यस्त्री वृषाङ्के राड्ध्वजे वरे ।
क्षणदो गणके रात्रौ क्षणदा क्षणदं जले ॥२२॥
कपर्द्दः खण्डपरशो जटाजूटे वराटके ।
कर्णान्दुरुन्त्विन्निकायां कर्णपाश्यामपि स्त्रियाम् ॥२३॥
क्रव्याद् रक्षसि पुंसि स्यान्-मांसाशिन्यन्यलिङ्गकः ।
कामदा कामधेनौ स्त्री कामदातरि वाच्यवत् ॥२४॥
कुमुद् त्रिषु स्यात् कृपणे कैरवे तु नपुंसकम् ।
कुमुदं कैरवे रक्तपद्मे स्त्री कुम्भिकौषधौ ॥२५॥
गाम्भार्य्यां पुंसि दिङ्नागे नागे शाखामृगान्तरे ।
कुसीदं जीवने वृद्ध्या क्लीबं त्रिषु कुसीदिके ॥२६॥
कौमुदः स्यात् कार्त्तिकिके चन्द्रिकायान्तु कौमुदी ।
गोष्पदं गोपदश्वभ्रे गवाञ्च गतिगोचरे ॥२७॥
गोविन्दो वासुदेवे स्याद् गवाध्यक्षे वृहस्पतौ ।
गोनर्दमपि कैवर्त्तीमुस्तके पुंसि सारसे ॥२८॥

जलदो मुस्तके मेघे जीवदो वैद्यविद्विषोः।
नरद् स्त्रियां भवेऽपि स्यात् कारण्डवविहङ्गमे ॥२९॥
तोयदो मुस्तके मेघे पुमानाज्ये नपुंसकम्।
दरद् स्त्रियां प्रपातेऽपि भयपर्व्वतयोरपि ॥३०॥
दारदो विषभेदे स्यात् पारदे हिङ्गुले पुमान्।
दायादस्तु भवेत्पुंसि सपिण्डे तनयेऽपि च ॥३१॥
दृषद् निर्घ्यपणशिलापट्टप्रस्तरयोः स्त्रियाम्।
धनदस्तु कुवेरे स्यात् पुंलिङ्गो दातरि त्रिषु ॥३२॥
नलदं स्यात् पुष्परसोशीरमांसीषु न दयोः।
नर्म्मदः केलिसचिवे नर्म्मदा सरिदन्तरे ॥३३॥
निर्व्वादः स्यात् लोकवादपरिनिष्ठितवादयोः।
निषादः स्वरभेदे स्यात् चण्डाले धीवरान्तरे ॥३४॥
प्रमदः सम्मदे मत्ते स्त्रियामुत्तमयोषिति।
प्रसादोऽनुग्रहे काव्यगुण स्वास्थ्यप्रसत्तिषु ॥३५॥
प्रणादस्तु पुमान् तारशब्दे च श्रवणामये।
प्रासादो देवनृपयो-र्गृहेऽथ वरदा स्त्रियाम् ॥३६॥
कन्यायां वाच्यलिङ्गस्तु प्रसन्ने च समर्द्धके।
भसद् स्त्री भासुरे योनौ मर्य्यादा सीमनि स्थितौ ॥३७॥
माकन्दः सहकारे स्त्री धात्रीनगरभेदयोः।
मकन्दो निधिभिद्विष्णु रत्नभेदेषु कुन्दुरौ ॥३८॥

मेनादस्तु पुमान् केकिमार्ज्जारछागलेषु च।
विशदः पाण्डरे व्यक्ते शरद् स्त्री वत्सरेऽप्यृतौ ॥३९॥
शारदोऽब्दे स्त्रियां तोयपिप्पलीसप्तपर्णयोः।
शस्ये क्लीबं शरज्जाते नूतना प्रतिभे त्रिषु ॥४०॥
षड्विन्दुः स्यात्कीटभेदपुण्डरीकाख्ययोः पुमान्।
सम्पद् भूतौ गुणोत्कर्षे हारभेदेऽपि च स्त्रियाम्॥४१॥
संविद् स्त्रियां प्रतिज्ञायामाचारज्ञानसङ्गरे।
सम्भाषणे क्रियाकारे सङ्केते नाम्नि तोषणे ॥४२॥
सम्भेदः स्फुटने सङ्गे सुनन्दा रोचनोमयोः।

दचतुष्कम्।

अभिष्यन्दोऽतिवृद्धौ स्यादास्रवेऽक्षिगदेऽपि च ॥४३॥
अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च।
अष्टापदी चन्द्रमल्यां शरभे मर्कटे पुमान् ॥४४॥
अपवादस्तु निन्दायामाज्ञाविश्रम्भयोरपि।
अभिमर्दस्तु पुंसि स्यादवमर्दे सम्पराये च ॥४५॥
एकपदं तत्काले नपुंसकं वर्त्मनि स्त्री स्यात्।
कटुकन्दः पुमान् शिग्रौ शृङ्गवेररसोनयोः ॥४६॥
कुरुविन्द रत्नभेदे मुस्ताकुल्माषयोः पुमान्।
अथ कोकनदं रक्तकुमुदे रक्तपङ्कजे ॥४७॥
चतुष्पदी तु पद्ये ना पशौ च करणान्तरे।

भवेज्जनपदो जानपदोऽपि जनदेशयोः ॥४८॥
तमोनुदग्नीन्द्वर्के ना प्रतिपद् स्त्री तिथौ मतौ।
परिवादोऽपवादे स्यात् वीणावादनवस्तुनि ॥४९॥
प्रियंवदः खेचरे ना प्रियवाचि तु वाच्यवत्।
पीठमर्द्दोऽतिधृष्टे स्यान् नायकस्य प्रियेऽपि च ॥५०॥
पुटभेदो नदीवक्रे पत्तनातोद्ययोरपि।
महानादः कुञ्जरे स्याद् वर्षुकाब्दे महास्वने ॥५१॥
मुचुकुन्दो वृक्षभेदे मान्धातृतनयेऽपि च।
मेघनादस्तु वरुणे तनये रावणस्य च ॥५२॥
विशारदः पण्डितेऽपि धृष्टे विष्णुपदन्तु खे।
क्षीरोदे च स्त्रियां गङ्गारविसंक्रान्तिभेदयोः ॥५३॥
शशबिन्दुः पुमान् वासुदेवे राजान्तरेऽपि च।
शतानन्दो मुनेर्भेदे देवकीनन्दनेऽपि च ॥५४॥
शतह्रदा स्त्रियां वज्रे सौदामन्याञ्च कीर्त्तिता।
समर्य्यादः समीपे ना मर्य्यादासहिते त्रिषु ॥५५॥

दपञ्चकम्।

भवेदुपनिषद् धर्मे वेदान्ते विजने स्त्रियाम्।
सहस्रपादः कारण्डे मार्त्तण्डे यज्ञपूरुषे ॥५६॥

दान्तवर्गः समाप्तः।

घैककम्।

धो ना धर्म्मे कुवेरे च क्लीवन्तु वस्तुनि स्मृतम्।
धो धा च ब्रह्मणि ख्यातो धा च स्याद् धारकेऽपि च॥१॥
धी र्ज्ञानभेदे बुद्धौ च धुः स्मृता धूनने स्त्रियाम्।*

धद्विकम्।

अर्द्धं समांशे खण्डे नाऽब्धि-र्ना सरसि वारिधौ ॥२॥
अन्ध स्यात् तिमिरे क्लीव चक्षुर्हीनेऽभिधेयवत्।
आधिः पुमांश्चित्तपीडा प्रत्याशा वन्धकेषु च ॥३॥
व्यसने चाप्यधिष्ठानेऽपीद्धमातपदीप्तयोः।
ऋद्धं सम्पन्नधान्ये च सुसमृद्धे च वाच्यवत् ॥४॥
ऋद्धिः स्यादोषधीभेदे समृद्धावपि योपिति।
गन्ध. प्रति वेश्याऽऽमोदलेशसम्बन्धगन्धके ॥५॥
गाध. स्थाने च लिप्सायां गोधा तलनिहाकयो.।
दधि चीरान्तरावस्थाभावे श्रीवासवासयोः ॥६॥
दग्धः स्पृष्टेऽन्यलिङ्गः स्यात् स्विनार्कदिशि च स्त्रियाम।
दिग्धो विषाक्तवाणे स्यात् पुंसि लिप्तेऽन्यलिङ्गक. ॥७॥
दुग्ध प्रपूरिते चीरे दुग्धो चीराविकौषधौ
दोग्धाऽर्थोपजीविकवौ वत्सगोपालयोः पुमान् ॥८॥
नद्धो वद्धे तथोद्वृत्ते वस्वस्त्राधौ च वन्धने।
वन्धु. स्यात् पुंसि वन्धूके मित्रे भ्रातरि वान्धवे ॥८॥

बाधा दुःखे निषेधे च बुधः सौम्ये च पण्डिते।
बुद्धो जिने लब्धवर्णे पुंसि स्याद् बुधितेऽन्यवत् ॥१०॥
बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे।
मधु पुष्परसक्षौद्रमद्ये ना तु मधुद्रुमे ॥११॥
वसन्तदैत्यभिच्चैत्रे स्याज् जीवन्त्यान्तु योषिति।
मिद्धं चित्ताभिसङ्क्षेपे क्लीवमालस्यनिद्रयोः ॥१२॥
मुग्धस्तु सुन्दरे मूढे मेधा बुद्धौ क्रतौ पुमान्।
राधो मासान्तरे राधा चित्रभेदे च धन्विनाम् ॥१३॥
गोपी विशाखामलकीविष्णुकान्तासु विद्युति।
लुब्ध आकाङ्क्षिणि व्याधे वधूः स्त्री सारिवौषधौ। ॥१४॥
स्नुषाशटीनवोढासु भार्य्याषृक्काङ्गनासु च।
व्याधिः कुष्ठे च रोगे ना व्याधो मृगयुदुष्टयोः ॥१५॥
ताराभयेन्द्रे च विधुर्ना कर्पूरेन्दुविष्णुषु।
विद्धं स्याद् वेधिते क्षिप्ते सदृशे बाधिते त्रिषु ॥१६॥
विधिर्ना नियतौ काले विधाने परमेष्ठिनि।
विधा गजान्ने ऋद्धौ च प्रकारे वेतने विधौ ॥१७॥
वृद्धो जीर्णे प्रवृद्धे ज्ञे त्रिषु क्लीवन्तु शैलजे।
वृद्धिस्तु वर्द्धने योगेऽप्यष्टवर्गौषधान्तरे ॥१८॥
कलान्तरे चाभ्युदये सम्पद्धावपि योषिति।
श्रद्धाऽऽदरे च काङ्क्षायां श्राद्धं श्रद्धान्विते त्रिषु ॥१९॥

हव्यकव्यविधौ क्लीबं शुद्धं स्यात् त्रिषु केवले।
निर्दोषे च पवित्रे च सन्धा स्थितिप्रतिज्ञयोः ॥२०॥
स्पर्द्धा संहर्षणेऽपि स्यात् साम्ये क्रमसमुन्नतौ।
सन्धिः पुमान् सुरङ्गायां भगे सङ्घटनेऽपि च ॥२१॥
रूपकाणां मुखाद्यङ्गेऽप्यवकाशे च कीर्त्तितः।
स्कन्धः स्यान् नृपतावंशे सम्परायसमूहयोः ॥२२॥
काये तरुप्रकाण्डे च भद्रादौ छन्दसो भिदि।
साधु र्वार्द्धुषिके चारौ सज्जने चाभिधेयवत् ॥२३॥
सिद्धो व्यासादौ भेदे योगस्य दैवयोनिषु।
त्रिषु निष्पन्ने स्निग्धं स्नेहयुक्ते चिक्कणेऽपि स्यात् ॥२४॥
सिन्धु र्वमथुदेशाब्धिनदे ना सरिति स्त्रियाम्।
सिद्धिः स्त्री योगनिष्पत्तिपादुकान्तर्द्धिवृद्धिषु ॥२५॥
सुधा स्त्री लेपने मूर्व्वायां स्नुहीगङ्गेष्टकाम्रते।

धन्तिकम्।

अवधिस्त्ववधाने स्यात् सीम्नि काले बिले पुमान् ॥२६॥
अगाधमतलस्पर्शे त्रिषु श्वभ्रे नपुंसकम्।
आनद्धं मुरजादौ च क्लीबं स्यात् सन्दिते त्रिषु ॥२७॥
आविद्धो यावत्क्रिङ्गः स्यात् कुटिले च पराहते।
आयत्तो दृढयत्ने स्यात् प्रेमसन्त्कारयोर्त्रयोः ॥२८॥

उत्सेधस्तूच्छ्रये न स्त्री क्लीवं संहननेऽपि च ।
उपाधि र्धर्मचिन्तायां कुटुम्बव्यापृते छले ॥२९॥
विशेषणे पुंस्युपधिः पुंसि व्याजरथाङ्गयोः ।
कबन्धोऽस्त्री क्रियायुक्तापमूर्द्धकलेवरे ॥३०॥
क्लीवं जले पुंस्युदरे वाऽदरचाविशेषयोः ।
दुर्विधो वाच्यलिङ्गः स्याद् दुर्गतेऽपि खलेऽपि च ॥३१॥
न्यग्रोधस्तु पुमान् व्यामवटयोश्च शमीतरौ ।
न्यग्रोधी त्वपचित्रायां निरोधो नाशरोधयोः ॥३२॥
निषधः कठिने देशे तद्राजे पर्व्वतान्तरे ।
परिधिर्ना यज्ञियद्रुशाखायामुपसूर्य्यके ॥३३॥
प्रसिद्धो भूषिते ख्याते प्रणिधि र्नार्थने चरे ।
मागधी स्त्री कणायूथ्यो र्वाच्यवत् मगधोद्भवे ॥३४॥
पुंसि वैश्यात् क्षत्रियाजे शुक्लजीरकबन्दिनोः ।
विवधोवीवधश्चापि पर्य्याहारेऽध्वभारयोः ॥३५॥
विश्रब्धोऽनुद्भटेऽपि स्याद् गाढविश्वस्तयोस्त्रिषु ।
विबुधो ज्ञे सुरे वीरुध् लताविटपयोः स्त्रियाम् ॥३६॥
सन्नद्धो वर्म्मिते व्यूढे सम्बाधः सङ्कटे भगे ।
सन्निधिस्तु पुमान् सन्निधानेऽपीन्द्रियगोचरे ॥३७॥
संसिद्धिः प्रकृतौ सिद्धौ मदोद्यायामपि स्त्रियाम् ।
सम्बोधो बोधने चैव समाधि र्ना समर्थने ॥३८॥

ध्याननीवाकनियमे काव्यस्य च गुणान्तरे।
सुगन्धिः स्यादिष्टगन्धे त्रिषु क्लीवन्तु वालुके ॥३९॥

धचतुष्कम्।

अवरोधस्तिरोधाने राजदारेषु तद्गृहे।
अवष्टब्धोऽविदूरे स्यादाक्रान्ते चावलम्बिते ॥४०॥
अनुबन्धः शिशौ दोषोत्पादे मुख्यानुयायिनि।
विनश्वरे प्रकृत्यादौ प्रवृत्तस्यानुवर्त्तने ॥४१॥
अनुबन्धी तु हिक्कायां तृष्णयामपि योषिति।
अनिरुद्ध उषानाथे पुंसि चानर्गलेऽन्यवत् ॥४२॥
आशाबन्धः समाश्वासे तथा मर्कटजालके।
इष्टगन्धः सुगन्धौ स्यात् त्रिषु क्लीवन्तु वालुके ॥४३॥
इक्षुगन्धा कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे।
उपलब्धि र्मतौ प्राप्तावपि ज्ञाने च योषिति ॥४४॥
उग्रगन्धाऽजमोदायां वचायां छिक्कनौषधौ।
कालस्कन्धस्तमाले स्यात् तिन्दुके जीवकद्रुमे ॥४५॥
तीक्ष्णगन्धा वचाराजिकयोः शोभाञ्जने पुमान्।
तृणगोधा चित्रकोले कृकलासेऽपि योषिति ॥४६॥
परिव्याधस्तु पुंसि स्याद् वेतसे च द्रुमोत्पले।
ब्रह्मबन्धुरधिक्षिप्ते निर्देशे ब्राह्मणस्य च ॥४७॥

महौषधन्तु शुण्ठ्यां स्याद् विषायां लशुनेऽपि च।
समुन्नद्धः समुद्भूते पण्डितम्मन्यगर्व्विते ॥४८॥

धपञ्चकम्।

योजनगन्धा कस्तूर्य्यां सितायां व्यासमातरि ॥

धान्तवर्गः समाप्तः।

नैकाकम्।

नः पुमान् सुगते बन्धे हिरण्डे प्रस्तुतेऽपि च।

नद्विकम्।

अग्निं वैश्वानरेऽपि स्यात् चित्रकाख्यौषधौ पुमान्॥१
अन्नं भुक्ते च भक्ते स्याद् इनः पत्यौ नृपार्कयोः।
उन्नं क्लिन्ने च सुरते ह्यातन्नं सर्व्वाम्बुकुक्षिषु ॥२॥
घनं स्यात् कांस्यतालादिवाद्यमध्यमनृत्ययोः।
ना मुस्ताब्दौघदार्ढ्येषु विस्तारे लोहमुद्गरे ॥३॥
त्रिषु सान्द्रे दृढे चाघ चिह्नं लक्ष्मपताकयोः।
चीनो देशांशुकव्रीहिभेदे तन्तौ मृगान्तरे ॥४॥
छन्नन्तु रहसि क्लीवं छादिते वाच्यलिङ्गकम्।
छिन्नं हृते त्रिलिङ्गं स्याद् गुडूच्यामपि योषिति ॥५॥
जनो लोके महर्लोकात् परलोके च पामरे।
सीम[illegible] नीवर्ध्मोकतयत्तावौषधीभिदि ॥६॥

जह्नुः स्यात् पुंसि राजर्षिभेदे च मधुसूदने।
ज्यानिर्जीर्णौ च हानौ च तटिन्यामपि योषिति ॥७॥
जिनोऽर्हति च बुद्धे च पुंसि स्याज् जित्वरे त्रिषु।
ज्योत्स्ना चन्द्रातपेऽपि स्यात्ज्योत्स्नायुक्तनिशि स्मृता॥८॥
ज्योत्स्नीपटोलिकायां स्याज्ज्योत्स्नायुक्तनिशि स्त्रियाम्।
तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे॥९॥
दान गजमदे त्यागे पालनच्छेदशुद्धिषु।
दानुर्दातरि विक्रान्ते दीना स्त्री मूषिकस्त्रियाम्॥१०॥
वाच्यवद् दुर्गते भीते द्युम्नं वित्ते बलेऽपि च।
धनुः पुमान् पियालद्रौ राशिभेदे शरासने ॥११॥
धन् स्याद् गोधने वित्ते धाना भ्रष्टयवे स्त्रियाम्।
धन्याकेऽभिनवोद्भिन्ने धुनी नद्यां नदे पुमान् ॥१२॥
नग्नो वन्दिक्षपणयोः पुंसि त्रिषु विवाससि।
न्यून गर्ह्योनयोः पानं पीतिभाजनरक्षणे ॥१३॥
भानुर्ना किरणे सूर्येऽभिन्नं स्यात् त्रिषु दारिते।
सङ्गतेऽन्यत्र फुल्ले च मानश्चित्तोन्नतौ ग्रहे ॥१४॥
क्लीव प्रमाणे प्रस्थादौ मीनो राश्यन्तरे झषे।
मुनिः पुंसि वशिष्ठादौ वकसेनतरौ जिने॥१५॥
म्लतुस्ना म्लस्नातुवर्य्योः स्त्री यानं स्याद् वाहने गतौ।
योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे ॥१६॥

रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम् ।
रास्ना तु स्याद् भुजङ्गाख्यामेलापर्ण्यामपि स्त्रियाम् ॥१७॥
लग्नं राश्युदये क्लीवं सक्तलज्जितयोस्त्रिषु ।
वस्त्रस्ववक्रये पुंसि वेतने स्यान् नपुंसकम् ॥१८॥
वनं नपुंसकं नीरे निवासालयकानने ।
वह्निर्वैश्वानरेऽपि स्याच् चित्रकाख्यौषधौ पुमान् ॥१९॥
वानं शुष्कफले शुष्के स्यूतिकर्मकटे गतौ ।
विन्नं विचारिते लब्धे बुघ्नो ना मूलरुद्रयोः ॥२०॥
श्वा पुमान् कुक्कुरे स्वानः स्थानभेदे च वासुनः ।
शीनो मूर्खे चाजगरे श्येनः पक्षिणि पाण्डरे ॥२१॥
स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान् ।
सानुरस्त्री वने प्रस्थे वात्यामार्गाग्रकोविदे ॥२२॥
स्थानं सादृश्येऽवकाशे स्थितौ वृद्धिक्षयेतरे ।
स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि ॥२३॥
स्नानं स्नानीयेऽभिषवे सूनं प्रसवपुष्पयोः ।
सूना पुत्र्यां वधस्थानगलशुण्डिकयोः स्त्रियाम् ॥२४॥
सूनुः पुत्रेऽनुजेऽर्के ना स्यूनः किरणसूर्य्ययोः ।
हनु र्हट्टविलासिन्यां मृत्यावस्त्रे गदे स्त्रियाम् ॥२५॥
हनुः कपोलावयवे हीनं गर्ह्योनयोस्त्रिषु ।

अञ्जनं कज्जले चाक्तौ सौवीरे च रसाञ्जने ॥२६॥
पुंसि ज्येष्ठादिग्गजयो रञ्जना वानरीभिदि ।
अञ्जनी लेपनार्य्याञ्चावनं प्रीतौ च रक्षणे ॥२७॥
अयनं पथि भानोरप्युदग्दक्षिणतो गतौ ।
अपानन्तु गुदे क्लीवं पुंसि स्यात् तस्य मारुते ॥२८॥
असनं क्षेपणे क्लीवं पुंसि स्याज्जीवकद्रुमे ।
अङ्गनं प्राङ्गणे याने कामिन्यामङ्गना मता ॥२९॥
अर्ज्जुनः ककुभे पार्थे कार्त्तवीर्य्यमयूरयोः ।
मातुरेकसुतेऽपि स्यात् पुंलिङ्गो धवलेऽन्यवत् ॥३०॥
नपुंसकं तृणे नेत्रगदे चाप्यर्ज्जुनी गवि ।
उषायां बाहुदानद्यां कुट्टिन्यामपि च क्वचित् ॥३१॥
अम्लानो महासहायां नाऽन्यलिङ्गस्तु निर्म्मले ।
अर्शोघ्नी तालमूल्यां स्यादर्शोघ्नः शूरणेऽपि च ॥३२॥
असिक्नी स्यादवृद्धान्तःपुरप्रेष्यानदीभिदोः ।
अशनिः स्त्रीपुंसयोः स्यात् चञ्चलायां पवावपि ॥३३॥
अरत्निर्ना सप्रकोष्ठततकुलिकरेऽपि च ।
कफोणावप्ययाऽली स्याद् वृश्चिके भ्रमरेऽपि च ॥३४॥
अर्थी पुमान् याचके स्यात् सेवके च विवादिनि ।
अध्वा ना पथि संस्थाने स्यादवस्कन्दकालयोः ॥३५॥

B °प्यश्चावनं, P °प्यशो रूसोई for

अर्व्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः।
आसनं द्विरदस्कन्धे पीठे यात्रानिवर्त्तने ॥३६॥
आसनी विपणौ स्त्रियामासनो जीरकद्रुमे।
आदानं ग्रहणेऽपि स्यादलङ्कारे च वाजिनाम् ॥३७॥
आपन्नः सविपत्तौ च प्राप्ते वाच्यवदीरितः।
आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि ॥३८॥
धृतावपि मनीषायां शरीरब्रह्मणोरपि।
आलानं करिणां बन्धस्तम्भे रज्जौ च न स्त्रियाम् ॥३९॥
ईशानं ज्योतिषि क्लीवं पुंलिङ्गः स्यात् त्रिलोचने।
उत्तानमगभीरे स्यादूर्द्धास्यशयिते त्रिषु ॥४०॥
उत्थानमुद्यमे तन्त्रे पौरुषे पुस्तके रणे।
प्राङ्गणोद्गमहर्षेषु मलवेगेऽपि न द्वयोः ॥४१॥
उद्यानं स्यान् निःसरणे वनभेदे प्रयोजने।
उदानोऽप्युदरावर्त्ते वायुभेदे भुजङ्गमे ॥४२॥
उड्डानमुन्नते वाच्यलिङ्गं चुल्ल्यां नपुंसकम्।
ओदनं न स्त्रियां भक्ते बलायामोदनी स्त्रियाम् ॥४३॥
कमनः कामुके कामेऽभिरूपेऽशोकपादपे।
कम्पनं न द्वयोः कम्पे कम्रे स्यादभिधेयवत् ॥४४॥
कठिनमपि निष्ठुरे स्यात् स्तब्धेऽपि त्रिषु नपुंसकं स्थाल्याम्।
कठिनी खटिकायामपि कठिना गुडशर्करायाञ्च ॥४५॥

क्रन्दनं रोदनेऽपि स्याद्दाह्वानेऽप्यथ कल्पना ।
करिणः सज्जनायां स्त्री क्लीवं क्लृप्तौ च कर्त्तने ॥४६॥
कर्त्तनं न द्वयोश्छेदे नारीणां सूत्रनिर्म्मितौ ।
कर्म्माऽस्त्री व्याप्यक्रिययोः कदनं मर्द्दपापयोः ॥४७॥
काञ्चनः काञ्चनाले स्याच् चम्पके नागकेशरे ।
उदुम्बरे च धुस्तूरे हरिद्रायाञ्च काञ्चनी ॥४८॥
क्लीवेऽब्जकेशरे हेम्नि कामिनी भीरुवन्दयोः ।
कामी तु कामुके चक्रवाके पारावतेऽपि च ॥४९॥
कानीनः कन्यकाजाततनये व्यासकर्णयोः ।
काकिनी पणपादेऽपि मानपादे वराटके ॥५०॥
काननं विपिने गेहे परमेष्ठिमुखेऽपि च ।
कुहनं मृत्तिकाभाण्डविशेषे काचभाजने ॥५१॥
कुहना दम्भचर्य्यायामीर्ष्यालौ कुहनस्त्रिषु ।
कृती स्यात् पण्डिते योग्ये केतनन्तु निमन्त्रणे ॥५२॥
गृहे केतौ च कृत्येऽथ केशी केशवति त्रिषु ।
दृत्ये ना चौरपुष्प्यां स्त्री कौलीनं गुह्यजन्ययोः ॥५३॥
कुकर्म्माणि कुलीनत्वे युद्धे पश्वहिपक्षिणाम् ।
कौपीनं स्यादकार्य्येऽपि चीरगुह्यप्रदेशयोः ॥५४॥
खलिनी खलवृन्दे स्यात् तालपर्ण्यामपि स्त्रियाम् ।
खञ्जनः खञ्जरीटे स्त्री सर्षप्यां खञ्जनं गतौ ॥५५॥

खड्गी ना गण्डके मञ्जुघोषे खड्गधरे त्रिषु।
गर्ज्जनं निनदे कोपे गहनं कलिले त्रिषु ॥५६॥
नपुंसकं गह्वरे स्याद् दुःखकाननयोरपि।
गन्धनमुत्साहे स्यात् प्रकाशने सूचने च हिंसायाम् ॥५७॥
ग्रामीणः शुनि काके पुंसि त्रिषु सम्भृते ग्राम्यैः।
ग्रावा तु प्रस्तरे पृथ्वीधरे पुंस्यथ गृञ्जनम् ॥५८॥
विषदिग्धपशोर्मांसे क्लीवं पुंसि रसोनके।
गोस्तनो हारभेदे ना द्राक्षायां गोस्तनी स्त्रियाम् ॥५९॥
गोमी शृगाले पुंसि स्यात् त्रिषु गोमत्युपासके।
घट्टना चलनावृत्त्यो श्चन्दनी तु नदीभिदि ॥६०॥
चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकम्।
चलनं भ्रमणे कम्पे कम्रे तु वाच्यलिङ्गकम् ॥६१॥
चलनी वस्त्रघर्घर्य्यां वारीभेदेऽपि च क्वचित्।
चक्री तैलिकभित्-कोककुलालाजाऽहि सूचके ॥६२॥
चर्म्मी फलकपाणौ स्याद् भूर्ज्जे भृङ्गरिटावपि।
चर्म्मकृत्तौ च फलके चेतना संविदि स्त्रियाम् ॥६३॥
वाच्यवत् प्राणयुक्तेऽथ छद्म शाठ्यापदेशयोः।
छर्द्दनं वमने क्लीवं निम्बालम्बुषयोः पुमान् ॥६४॥
छदनञ्च दले पक्षेऽपिधाने छेदनं भिदि।
कर्त्तने च जनुः पुंसि जन्तौ वैश्वानरेऽपि च ॥६५॥

जवनं स्यात्तु वेगेऽपि हये ना वेगिनि त्रिषु।
जननी तु दयामात्रोर्जननं वंशजन्मनोः॥६६॥
जयनं स्यात् तुरङ्गादिसन्नाहे विजयेऽपि च।
जघनन्तु स्त्रियाः श्रोणिपुरोभागे कटावपि॥६७॥
ज्ञानी स्यात् पुंसि दैवज्ञे ज्ञानयुक्तोऽन्यलिङ्गकः।
जीवनं वर्त्तने जीवप्राणधारणयोर्जले॥६८॥
जीवनी जीवनाचापि जीवन्तीमेदयोः क्रमात्।
तपनोऽरुष्करेऽपि स्याद् भास्करे निरयान्तरे॥६९॥
तलुनः पवने यूनि युवत्यां तलुनी स्मृता।
तलिनं विरले स्तोके स्वच्छेऽपि वाच्यलिङ्गकम्॥७०॥
तमोघ्नः सूर्यवह्नीन्दुबुद्धशङ्करविष्णुषु।
त्यागी दातरि शूरेऽथ तेवनं केलिकानने॥७१॥
क्रीडायां तेमनन्त्वार्द्रीकरणे व्यञ्जनेऽपि च।
तेजनः पुंसि वंशे स्यात् तेजनी तृणपूलके॥७२॥
तोदनं व्यथने तोत्रे दंशनं दंशवर्म्मणोः।
दर्शनं नयनस्वप्नबुद्धिधर्म्मोपलब्धिषु॥७३॥
शास्त्रदर्पणयोश्चाथ दमनः पुष्पवीरयोः।
दशनः शिखरे दन्ते कवचे तु नपुंसकम्॥७४॥
दहनश्चित्रके भल्लातकेऽग्नौ दुष्टचेष्टिते।
दशानं ज्योतिषि क्लीबं पुंलिङ्गः स्याद् विरोचने॥७५॥

देवनं व्यवहारे स्यात् जिगीषाक्रीड़योरपि।
देवनोऽचेषु पुंसि स्याद् ध्वजीतु पृथिवीधरे ॥७६॥
रथब्राह्मणयोश्चापि भुजङ्गमतुरङ्गयोः।
धन्वी धनुर्धरेऽपि स्यादर्ज्जुने ककुभद्रुमे ॥७७॥
धन्वा तु मरुदेशे ना क्लीवं चापे स्थलेऽपि च।
धमनो नाऽनले भस्त्राधमापकक्रूरयोस्त्रिषु ॥७८॥
धमनी तु शिराहट्टविलासिन्योश्च योषिति।
धावनं गमने शुद्धौ पृश्निपर्ण्यान्तु धावनी ॥७९॥
धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः।
नन्दनं वासवोद्याने नन्दनो हर्षके सुते ॥८०॥
नन्दी हरप्रतीहारे गर्दभाण्डे वटद्रुमे।
नन्दिन्युमायां गङ्गायां ननान्दृधेनुभेदयोः ॥८१॥
नलिनी पद्मिनी व्योमनिम्नगाकमलाकरे।
नपुंसकं नीलिकायां न पुंसि सरसीरुहे ॥८२॥
निदानं कारणे वत्सदामादिकारणत्रये।
निधनं स्यात् कुले नाशे प्रधनं दारणे रणे ॥८३॥
पवनं कुम्भकारस्य पाकस्थाने नपुंसकम्।
निष्पावमरुतोः पुंसि प्रधानं बुद्धिचिह्नयोः ॥८४॥
प्रधानं स्यान् महामात्रे प्रकृतौ परमात्मनि।
प्रमायामपि च क्लीवमेकत्वे ट्युत्तमे सदा ॥८५॥

पद्मिनी पद्मसङ्घाते स्त्रीविशेषे सरोऽम्बुजे ।
प्रसन्ना स्त्री सुरायां स्यादच्छसन्तुष्टयोस्त्रिषु ॥८६॥
प्रश्नं । वाच्यवज्जाते क्लीवन्तु फलपुष्पयोः ।
पत्री श्येने पत्ररथे काण्डदूरथिकादिषु ॥८७॥
पर्व्व क्लीवं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे ।
दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि ॥८८॥
पक्ष्म सूत्रादिसूक्ष्मांशे किञ्जल्के नेत्रलोमनि ।
पाठीनो मीनभेदे स्यात् पाठके गुग्गुलद्रुमे ॥८९॥
पावनन्तु जले क्लच्छ्रे ना व्यासे पावके त्रिषु ।
पाचनं दण्डमुख्यादौ प्रायश्चित्ते च नाऽनले ॥९०॥
वाच्यवत् पाचयितरि हरीतक्यान्तु योषिति ।
पाशी व्याधे च वरुणे पिशुनं कुङ्कुमे स्मृतम् ॥९१॥
कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिषु ।
पृक्कायां पिशुना स्त्री स्यात् पीतनं पीतदारुणि ॥९२॥
कुङ्कुमे हरिताले च पुमानाम्रातके मतः ।
पूतना तु हरीतक्यां दानवीरोगभेदयोः ॥९३॥
पृतना तु स्त्रियां सेनामात्रसेनाविशेषयोः ।
प्रेमा ना वासवे वाते प्रेमाऽस्त्री स्नेहनर्म्मणोः ॥९४॥
फलिन्यग्निशिखायाञ्च फल्ग्यां स्त्रीफलिनि त्रिषु ।
फाल्गुनस्तु गुडाकेशे नदीजार्ज्जुनभूरुहे ॥९५॥

तपस्यसंज्ञमासे तत्-पूर्णिमायान्तु फाल्गुनी।
ब्रह्म तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि ॥९६॥
ऋत्विग्योगभिदोर्विप्रे वन्धनं बधबन्धयोः।
वन्दनी नतिजीवातुकटी याचनकर्म्मसु ॥९७॥
वाहिनी स्यात् तरङ्गिण्यां सेनासैन्यप्रभेदयोः।
वाणिनी नर्त्तकी मत्ताविदग्धवनितासु च ॥९८॥
बुधानस्तु गुरौ विज्ञे बोधनं गन्धदीपने।
बोधनी बोधपिप्पल्यो भेसु स्यात् काञ्चने भूतौ॥९९॥
भण्डनं कवचे युद्धे खलीकारेऽपि न द्वयोः।
भट्टिनी द्विजभार्य्यायां नाट्योक्त्या राजयोषिति ॥१००॥
भवनं स्याद् गृहे भावे भाजनं योग्यपात्रयोः।
भावना तु न ना ध्याने पर्य्यालोचेऽधिवासने॥१०१॥
भुवनं विष्टपेऽपि स्यात् सलिले गगने जने।
भोगी भुजङ्गमेऽपि स्याद् ग्रामपात्रे नृपे पुमान्॥१०२॥
विहाय महिषीमन्यराजयोषिति भोगिनी।
मदनः स्मरवसन्तद्रुभेदधत्तूरसिक्थके ॥१०३॥
मलनः पटवासे ना कर्दमे तु नपुंसकम्।
मलिनं दूषिते कृष्णे ऋतुमत्यान्तु योषिति ॥१०४॥
मण्डनं भूषणे क्लीवं स्यात् त्रिष्वलङ्करिष्णुनि।
मनं गण्डगोत्रे स्यात् तपस्ये परमेष्ठिनि ॥१०५॥

मङ्गुनं तार्किके रम्ये गृहे देवे जलाशये।
मद्गनोऽस्त्री जित्वरे स्यान् मेषादौ मद्यपेऽपि च ॥१०६॥
मार्ज्जनं न पुमान् मार्ष्टौ पुंसि स्याल्लोध्रशाखिनि।
मालिनी मातृकावृत्तभिदो र्मालिकयोपिति ॥१०७॥
गौरी चम्पा नगर्य्योश्च मन्दाकिन्यां नदीभिदि।
माधुनोऽस्त्री कलङ्के स्यादिन्दौ विपथगामिनि ॥१०८॥
मानिनी तु स्त्रियां फल्यां मानी मानवति त्रिषु।
मिथुनं न द्वयोः राशिभेदे स्त्रीपुंसयुग्मके ॥१०९॥
मुण्डनं वपने त्राणे मेचनं मूत्रशिश्नयोः।
मैथुनं सुरतेऽपि स्यात् सङ्गतेऽपि नपुंसकम् ॥११०॥
यमनं बन्धने चोपरतौ क्लीवं यमे पुमान्।
यवनो देशभेदे ना वेगवेगाधिकाश्वयोः ॥१११॥
यवन्योषधिभेदे स्त्री वाच्यवद् वेगिनि स्मृता।
यापनं वर्त्तने कालक्षेपे निरसनेऽपि च ॥११२॥
युवा स्यात् तरुणे श्रेष्ठे निसर्गवलशालिनि।
युञ्जानः सारथौ विप्रे योजनं परमात्मनि ॥११३॥
चतुष्क्रोश्याञ्च योगेऽथ रसनं स्वदने ध्वनौ।
जिह्वायाञ्च नपुंसि स्याद् रास्नायां रसना स्त्रियाम् ॥११४॥
रञ्जनो रागजनके रञ्जनं रक्तचन्दने।
प्रुण्डारोचनिकानीली मञ्जिष्ठासु च रञ्जनी ॥११५॥

रजनी नीलनीराज्विहरिद्राजतुकासु च।
राधनं साधने प्राप्तौ राधना भाषणे स्त्रियाम्॥११६॥
राजाप्रभौ च नृपतौ क्षत्रिये रजनीपतौ।
यक्षे शक्रे च पुंसि स्याद् रागो रक्तविकामुके ॥११७॥
रेचनी त्रिवृतादन्त्योः रोचनी कर्कशे स्मृता।
गोचना रक्तकह्लारे गोपित्तवारयोषितोः ॥११८॥
रोचनः कूटशाल्मल्यां पुंसि स्याद् रोचके त्रिषु।
रोदनं क्रन्दनेऽस्रेऽपि दुरालभौषधौ स्त्रियाम् ॥११९॥
रोही रोहितकेऽश्वत्थवटपादपयोः पुमान्।
लङ्घनं तूपवासे स्याच् चङ्क्रमे प्लवनेऽपि च ॥१२०॥
ललना कामिनी नारीभेदजिह्वासु योषिति।
लक्ष्म चिह्ने प्रधानेऽथ लाञ्छनं नामचिह्नयोः ॥१२१॥
लेखनं छर्दने भूर्जे लिपिन्यासेऽथ वर्ज्जनम्।
हिंसात्यागयोर्वपनं वीजाधाने च मुण्डने ॥१२२॥
वसनं छादने वस्त्रे वमनं छर्दनेऽर्दने।
वर्द्धनं वृद्धिवर्द्धिष्णु च्छेदे घव्यान्तु वर्द्धनी ॥१२३॥
व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽक्षनि।
व्यसनन्त्वशुभे सक्तौ पानस्त्रीमृगयादिषु ॥१२४॥
दैवानिष्टफले पापे विपत्तौ निष्फलोद्यमे।
वर्त्तनो वामने क्लीवं वृत्तौ स्त्री पेषणाध्वनोः ॥१२५॥

न पुंसि तूलनालायां तर्कुपिण्डे च जीवने।
वर्त्तिष्णौ त्रिषु वज्रो तु वृद्धे देवाधिपे पुमान् ॥१२६॥
वचक्नुस्तु पुमान् विप्रे वावदूकेऽभिधेयवत्।
वर्णी स्याल्लेखके चित्रकरेऽपि ब्रह्मचारिणि ॥१२७॥
वर्ष्म देहप्रमाणातिसुन्दराकृतिषु स्मृतम्।
वर्त्म नेत्रच्छदे मार्गे वाजी वाणाश्वपक्षिषु ॥१२८॥
वामनो नीचे खर्व्वे च त्रिषु पुंसि तु दिग्गजे।
चराङ्कोटवृक्षेऽथ वासनं धूपनेऽपि च ॥१२९॥
वारिधान्याञ्च वस्त्रे च प्रत्याशाज्ञानयोः स्त्रियाम्।
वाग्मी पटौ सुराचार्य्ये विज्ञानं ज्ञानकर्म्मणोः ॥१३०॥
वितुन्नं सुनिषण्णे च शैवाले च नपुंसकम्।
वितानो यज्ञ उल्लोचे विस्तारे पुन्नपुंसकम् ॥१३१॥
क्लीवं वृत्तविशेषे स्यात् त्रिलिङ्गो मन्दतुच्छयोः।
विमानं व्योमयाने च सार्व्वभौमगृहेऽपि च ॥१३२॥
घोटके यानमात्रे च पुन्नपुंसकयोर्मतम्।
विक्लिन्नो जरया जीर्णे शीर्णे चार्द्रे च वाच्यवत् ॥१३३॥
विपन्नं विपदाक्रान्ते त्रिषु पुंसि भुजङ्गमे।
विच्छिन्नञ्च समालब्धे विभक्ते चाभिधेयवत् ॥१३४॥
विलग्नं न स्त्रियां मध्ये त्रिषु स्यात् लग्नमात्रके।
विषघ्नस्तु शिरीषे ना गुडूची त्रिवृतोः स्त्रियाम् ॥१३५॥

व्युत्थानं स्वातन्त्र्यकृत्ये विरोधाचरणेऽपि च ।
वृजिनं कल्मषे क्लीवं केशे ना कुटिले त्रिषु ॥१३६॥
वृषा कर्णे महेन्द्रे ना वेदना ज्ञानदुःखयोः ।
वेष्टनं कर्णशष्कुल्यामुष्णीषे मुकुटे वृतौ ॥१३७॥
व्योम वारिणि चाकाशे भास्करस्यार्चनाश्रये ।
शकुनिः पुंसि विहगे सौबले करणान्तरे ॥१३८॥
शयनं सुरते निद्राशय्ययोश्च नपुंसकम् ।
शमनं शान्तिवधयोः शमनः श्राद्धदैवते ॥ १३९ ॥
श्वसनं श्वसिते पुंसि मारुते मदनद्रुमे ।
शकुनस्तु पुमान् पक्षिमात्रपक्षिविशेषयोः ॥१४०॥
शुभाशंसिनिमित्ते च शकुनं स्यान् नपुंसकम् ।
शङ्खिनी श्वेतवृन्दायां चौरपुष्प्यां वधूभिदि ॥१४१॥
शङ्खी हरौ समुद्रे ना शङ्खवत्यभिधेयवत् ।
शतघ्नी शस्त्रभेदे स्याद् वृश्चिकाल्यां करञ्जके ॥१४२॥
शासनं राजदत्तोर्व्यां लेखाज्ञाशास्त्रशास्तिषु ।
शाखी स्यात्पादपे वेदे तुरुष्काख्यजनेपुमान्॥१४३॥
शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे ।
मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः ॥१४४॥
शिल्पी तु वाच्यवत् कारौ स्त्रियां कोलदलौषधौ ।
शृङ्गी शृङ्गयुते नागे वृक्षपर्वतयोरपि ॥१४५॥

शूली स्याच्छङ्करे पुंसि शूलरोगिणि वाच्यवत्।
श्लेष्मघ्नीमल्लिकायाञ्च ज्योतिष्मत्याञ्च योषिति॥१४६॥
शोभनो योगभेदे ना सुन्दरे वाच्यलिङ्गकः।
सवनन्त्वध्वरे स्नाने सोमनिर्दलनेऽपि च ॥१४७॥
स्तननं ध्वनिमात्रे स्यात् मेघशब्दे च कुन्थिते।
समानः सत्समैकेषु त्रिषु ना नाभिमारुते ॥१४८॥
सन्तानः सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे।
स्पर्शनो मारुते पुंसि दाने स्पर्शे नपुंसकम्॥१४९॥
संस्थानमाकृतौ मृत्यौ सन्निवेशे चतुष्पथे।
स्यन्दनन्तु स्रुतौ नीरे तिनिशे ना रथेऽस्त्रियाम्॥१५०॥
सञ्जनन्तु भवेत् क्लीवमुपरक्षणघट्टयोः।
वाच्यलिङ्गं कुलीने स्यात् कल्पनायान्तु योषिति॥१५१॥
सन्धानं स्यादभिषवे तथा सङ्घटनेऽपि च।
सम्पन्नं साधितेऽपि स्यात् सम्पत्तिसहितेऽन्यवत्॥१५२॥
सन्धिनी वृषभाक्रान्ताऽकालदुग्धे गवोः स्त्रियाम्।
सद्म स्यात् मन्दिरे नीरे संव्यानं छादनेंऽशुके॥१५३॥
सदनं मन्दिरे तोये स्वामी प्रभुविशाखयोः।
सादी तुरङ्गमातङ्गरथारोहिषु दृश्यते ॥१५४॥
स्थापनं रोपणे पुंसवने पाठौषधौ स्त्रियाम्।
सावनो यज्ञकर्मान्ते यजमानप्रचेतसोः ॥१५५॥

साधनं मृतसंस्कारे सैन्ये सिद्धौपधौ गतौ।
निवर्त्तनोपाय भेदे दापनेऽनुगमे धने ॥१५६॥
साम क्लीवमुपायस्य भेदे वेदान्तरेऽपि च।
सीमाऽघाटस्थितिक्षेत्रेष्वण्डकोपेऽपि च स्त्रियाम्॥१५७॥
सूचना व्यधने दृष्टौ गन्धनेऽभिनयेऽपि च।
सेचनं रक्षणे सेके नौकायाः सेकभाजने ॥१५८॥
सेनानीः स्यात् पुमान् कार्त्तिकेये सेनापतावपि।
सेवनं क्लीवनोपास्त्योर्हली रामे च कर्षके ॥१५९॥
हस्तिनी गजयोषायां जातिभेदे च योषितः।
हसनं न द्वयोर्हासेऽङ्गारधान्याञ्च योषिति ॥१६०॥
हायनो न स्त्रियां वर्षे पुंस्यर्च्चिर्व्रीहि भेदयोः।
ह्रादिनी वज्रतड़ितो र्हिण्डनं भ्रमणे रते ॥१६१॥

नचतुष्कम्।

अवलग्नोऽस्त्रियाम् मध्ये त्रिषु स्यात् लग्नमात्रके।
अनूचानो विनीते स्यात् साङ्गवेदविचक्षणे ॥१६२॥
अपाचीनोऽवागर्थे विपर्य्यस्ते च वाच्यवत्।
अभिपन्नोऽपराद्धेऽभियस्तेचापद्गते त्रिषु ॥१६३॥
अवदानं खण्डने स्यादतिवृत्ते च कर्म्मणि।
अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ॥१६४॥

अनीकिनी स्त्रियां सेनामात्रसेनाप्रभेदयोः।
अधिष्ठानं पुरे चक्रे प्रभावेऽध्यासनेऽपि च ॥१६५॥
अन्वासनं स्नेहवस्तावुपास्तावनुशोचने।
अर्य्यमा तु पुमान् स्वर्थ्ये पितृदेवान्तरेऽपि च ॥१६६॥
अथर्व्वा ब्राह्मणे पुंसि वेदे तु स्यान्नपुंसकम्।
अभिजनः ख्यातौ जन्मभूम्यां कुलध्वजे ॥१६७॥
कुलेऽपि च पुमानायोधनं युद्धे वधेऽपि च।
स्यादाकलनमाकाङ्क्षा परिसङ्ख्यानबन्धने ॥१६८॥
आतञ्चनं प्रतीवापजवनाप्यायनेषु च।
आराधनञ्च पचने प्राप्तौ सन्तोषणेऽपि च ॥१६९॥
आच्छादनं सम्पिधाने वस्त्रे प्रवृत्तिमात्रके।
आस्कन्दनं तिरस्कारे रणे संशोषणेऽपि च ॥१७०॥
आवेशनं शिल्पिशाले भूतावेशप्रवेशयोः।
आत्मयोनिः पुमान् कामदेवे च परमेष्ठिनि ॥१७१॥
उपधानं विषे गण्डौ प्रणयेऽपि नपुंसकम्।
उत्पादनं समुल्लेखोद्दापनोद्दर्त्तनेषु च ॥१७२॥
स्यादुत्पतनमुत्पत्तौ तथोर्द्ध्वगमनेऽपि च।
उद्वर्त्तनमुत्पतने विलेपने घर्षणे क्लीवम् ॥१७३॥
उदयनमुदये क्लीवं वत्सराजस्ययोः पुंसि।
उद्घाटनं दिसीत्ये स्याद्रज्जावुद्घाटिनी मता ॥१७४॥

उपासनं शराभ्यासेऽप्युपास्तावासनेऽपि च।
कपोतनो गर्दभाण्डशिरीषाम्रातकेषु च ॥१७५॥
अश्वत्थे च कलापी तु प्लक्षवर्हिणयोः पुमान्।
कलध्वनिः पुमान् पारावते पिकमयूरयोः ॥१७६॥
कञ्चुकयन्तःपुराध्यक्षे पिङ्गेऽश्वे जोङ्गकद्रुमे।
कात्यायनो वररुचौ विशेषे च मुनेः पुमान् ॥१७७॥
कापायवस्त्रे विधवार्द्धजरत्युमयोः स्त्रियाम्।
कुम्भयोनिरगस्त्ये स्याद् वशिष्ठद्रोणयोः पुमान्॥१७८॥
कुचन्दनन्तु पत्राङ्गे द्रुमेदे रक्तचन्दने।
कुण्डली वरुणे केकिभोगिनोश्च सकुण्डले ॥१७९॥
केशरी तुरगे सिंहे पुन्नागे नागकेशरे।
कौम्बादनस्तु पिप्पल्यां चिञ्चोटकमृणालयोः॥१८०॥
खङ्गधेनुः स्त्रियां खङ्गपुत्रिकागण्डकस्त्रियोः।
गवादनीन्द्रवारुण्यां गवां घासादनाश्रये॥१८१॥
गदयित्नुः पुमान् कामे जल्पके कामुकेऽपि च।
घनाघनो वर्षुकाब्दे मत्तघातुककुञ्जरे ॥१८२॥
शक्रे च घोषयित्नुस्तु विप्रकोकिलयोः पुमान्।
चित्रभानुः पुमान् वैश्वानरे चाहस्करेऽपि च ॥१८३॥
चोलकी तु करीरे स्यात् नारङ्गे किष्कुपर्व्वणि।
जलाटनो लोहपृष्ठे जलौकायां जलाटनी ॥१८४॥

तपस्वी तापसे चानुकम्प्ये चिष्वथयोषिति।
मांसिका कटुरोहिण्यो स्तरस्वी शूरवेगिनोः ॥१८५॥
तपोधनस्तापसे स्यात् मुण्डिर्यान्तु तपोधना।
द्विजन्मा दशने विप्रे दुर्नाम क्लीवमर्शसि ॥१८६॥
स्याद् दीर्घकोषिकायां स्त्री देवसेना तु वज्रिणः।
सुतायामपि सेनायां देवतानाञ्च योषिति ॥१८७॥
नागञ्जनेभ सुन्दर्यां नागयष्टौ च योषिति।
भवेन् निधुवनं कम्पे सुरते च नपुंसकम् ॥१८८॥
निर्वासनं हिंसने स्यात् नगरादे र्बहिष्कृतौ।
निर्भर्त्सनं खलीकारेऽलक्तकेऽपि नपुंसकम् ॥१८९॥
निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च।
निशामनं दर्शने स्यादालोचने च नद्वयोः ॥१९०॥
निशमनमुक्तं दृष्टौ श्रुतौ निरसनं वधे प्रतिक्षेपे।
निष्ठीवने प्रजननं योनौ जन्मन्यपि क्लीवम् ॥१९१॥
प्रसदनमपि भङ्गे स्यात् चेपे पञ्चाननः शिवे सिंहे।
प्रहसनमपि प्रहासे रूपभेदे च परिहासे ॥१९२॥
प्रणिधानं प्रयत्ने स्यात् समाधौ च प्रवेशने।
प्रयोजनं कार्य्यहेत्वोः पलाशी वृत्तरक्षसोः ॥१९३॥
अथ प्रवचनं वेदे प्रकृष्टवचनेऽपि च।
प्रतिपन्नोऽन्यलिङ्गः स्याद् विज्ञानेऽङ्गीकृतेऽपि च ॥१९४॥

प्रस्फोटनन्तु शूर्पे स्यात् ताडने च विकासने।
प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोः ॥१९५॥
प्रतियत्नस्तु संस्कारलिप्सोपग्रहणेषु च।
प्रत्यर्थी वाच्यलिङ्गः स्यात् शत्रौ च प्रतिवादिनि॥१९६॥
परिज्ञा तु पुमानिन्द्रौ याज्ञिके परिचारके।
प्रसाधनी तु कङ्कत्यां सिद्धौ वेशे प्रसाधनम् ॥१९७॥
पयस्विनी नदीधेन्वोः विभावर्य्याञ्च योषिति।
अथ पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च ॥१९८॥
पृथग्जनस्तु पुलिङ्गः कथितो नीचमूर्खयोः।
फलकी मत्स्यभेदे ना वाच्यवत् फलकान्विते ॥१९९॥
वारकी शत्रुचित्राश्वपर्णजीविपयोधिषु।
भूतात्मा पुंसि निर्दिष्टो देहे च परमेष्ठिनि ॥२००॥
महाधनं महामूल्ये सुवस्त्रे सिह्लकेऽपि च।
महासेनः कार्त्तिकेये महासेनापतावपि ॥२०१॥
मदयित्नुः कामदेवे पुमान् मद्ये नपुंसकम्।
महामुनिरगस्त्ये ना कुस्तुम्बुरुणि नद्वयोः ॥२०२॥
मातुलानी कलाये स्याद् भङ्गायां मातुलस्त्रियाम्।
मालुधानो मातुलाहौ मालुधानी लतान्तरे ॥२०३॥
मेधावी ना शुके वाल्लयां स्त्रियां मेधान्विते त्रिषु।
रसायनं विषेऽपि स्याज्ज जराव्याधिजिदौषधे ॥२०४॥

पुलिङ्गः पक्षिराजे च विडङ्गाख्यौषधेऽपि च।
राजादनं क्षीरिकायां पियाले किंशुकेऽपि च ॥२०५॥
ललाम स्यात् प्रभावे च लाञ्छनध्वजवाजिषु।
शृङ्गे प्रधाने भूषायामपि वालधिपुण्ड्रयोः ॥२०६॥
लाङ्गली नारिकेलद्रौ रेवतीरमणे पुमान्।
वनस्था गन्धमार्ज्जारे वञ्चक-व्याघ्रयोः पुमान् ॥२०७॥
वर्द्धमानः प्रस्नभेदे शरावैरण्ड विष्णुषु।
विस्मापनः स्यात् कुहके गन्धर्व्वनगरे स्मरे ॥२०८॥
विसर्ज्जनं परित्यागे दाने सम्प्रेषणेऽपि च।
विरोचनः प्रह्लादस्य तनयेऽर्केऽग्निचन्द्रयोः ॥२०९॥
विहेठनन्तु हिंसायां मर्द्दने च विडम्बने।
भवेद् विहनन विघ्नहिंसयो स्तूलपिञ्जने ॥२१०॥
विषयी विषयासक्ते वाच्यवत् क्लीवमिन्द्रिये।
पुंसि स्यान् नृपतौ कामदेवे वैषयिकेऽपि च ॥२११॥
विष्वक्सेना फलिन्यां स्याद् विष्वक्सेनो जनार्द्दने।
विलेपनी सुवेशस्त्री यवाग्वोरपि योषिति ॥२१२॥
विनाशी भोगिनि व्याले विश्वप्सा नाग्निचन्द्रयोः।
वृन्दादनी तु वन्दायां विदारीकन्दकेऽपि च ॥२१३॥
वैरोचनस्तु सुगते बलिदैत्यार्कपुत्रयोः।
शिखरी स्यादपामार्गे शैलपादपयोः पुमान् ॥२१४॥

शिखण्डी ना कलापे स्याद् गाङ्गेयारिमयूरयोः ।
शिखण्डिनी यूथिकायां गुञ्जायामपि योषिति॥२१५॥
शृङ्गारी पूगगजयोः सशृङ्गारसुवेशयोः ।
अथ स्नेहघनामल्यां केतक्यामपि योषिति ॥२१६॥
सम्मार्च्छनमभिव्याप्तौ वृच्छ्रायमोच्चयोरपि ।
समुत्थानं समुद्योगे व्याधीनां निर्णयेऽपि च ॥२१७॥
सदादानोऽभ्रमातङ्गे हेरम्बे गन्धहस्तिनि ।
स्यात् संवदनमालोचे वशीकारे नपुंसकम् ॥२१८॥
समादानं समीचीनग्रहणे सौगताह्निके ।
संवाहनं वाहने स्याद् भारादेरङ्गमर्द्दने ॥२१९॥
समापनं परिच्छेदे समाप्तिवधयोरपि ।
सनातनः शाश्वतेऽजे पितृनिघ्यन्तरे हरे ॥२२०॥
स्तनयित्नुः पुमान् वारिधरेऽपि स्तनितेऽपि च ।
सरोजिनी तु कमलाकरे पद्मे च योषिति ॥२२१॥
समापन्नं समाप्ते स्यात् प्राप्ते क्लिष्टे वधेऽपि च ।
सम्बाधनं द्वाःसदने शूलाग्रद्वारपालयोः ॥२२२॥
सयमनी यमपुर्यां संयमनं बन्धने व्रतेऽपि स्यात् ।
सारसनमप्युरस्त्रे तनुत्रिणां मेखलायाञ्च ॥२२३॥
सामिधेनी तु धाय्यायां समिध्यपि च योषिति ।
सामयोनिस्तु सामोत्थे ब्रह्मकुञ्जरयोरपि ॥२२४॥

सुदर्शनो हरेश्चक्रे मेरुजम्बुद्रुमे पुमान्।
न दयोः शक्रनगरे आज्ञोपधिभिदोः स्त्रियाम्॥२२५॥
सुयामुनो वत्सराजे प्रासादेऽभ्रान्तरेऽच्युते।
सुकर्म्मा तु पुमान् योगभेदे स्याद् देवशिल्पिनि॥२२६॥
सुधन्वा प्रौढ़धानुष्के त्रिषु ना विश्वकर्म्मणि।
सुपर्व्वा ना शरे वंशे पर्व्वधूमन्तरेष्वपि॥२२७॥
सुदामा तु पुमान् वारिधरपर्व्वतभेदयोः।
सौदामन्यप्सरोभेदे तडित्तद्भेदयोः स्त्रियाम्॥२२८॥
दर्पयित्नुः पुमान पुत्रे काञ्चने च नपुंसकम्।

नपञ्चकम्।

अथातिसर्ज्जनं दाने वधेऽपि च नपुंसकम्॥२२९॥
अपवर्ज्जनन्तु दाने निर्व्वाणत्यागयोरपि।
अपसर्ज्जनमाम्नाते परिवर्ज्जनदानयोः॥२३०॥
अग्रजन्मा द्विजे ज्येष्ठे भ्रातरि ब्रह्मणि स्मृतः।
अथानुवासनं स्नेहवस्तिधूपनयोरपि॥२३१॥
अभिनिष्ठानोऽप्यक्षरमात्रे विसर्ज्जनीयेऽपि च।
अन्तेवासी शिष्येऽपि स्यात् चण्डालेप्रान्तगेऽपि च॥२३२॥
स्यादुपस्पर्शनं स्पर्शे स्नानाचमनयोरपि।
उपसम्पन्नमुद्दिष्टं निहते च सुसंस्कृते॥२३३॥

कारन्धमी कांस्यकारे धातुवादरतेऽपि च।
कामचारी कामुके स्यात् स्वच्छन्दकलविङ्कयोः ॥२३४॥
किष्कुपर्व्वा पुमानिक्षौ वेणौ पोटगलेऽपि च।
कृष्णवर्त्मा पुमानग्नौ दुराचारे विधुन्तुदे ॥२३५॥
स्याद् गन्धमादनो भृङ्गे गन्धके वानरान्तरे।
स्त्री सुरायां नगे न स्त्री चिरजीवी क्रकाकयोः ॥२३६॥
तिक्तपर्व्वा हिलमोची गुडूची यष्टिषु स्त्रियाम्।
दन्तधावनः खदिरे दन्तशुद्धौ नपुंसकम् ॥२३७॥
स्याद् धूमकेतनः पुंसि केतुप्रत्युक्तताशयोः।
स्यान्-नन्दिवर्द्धनो भर्गे पक्षान्ते तनयेऽपि च ॥२३८॥
प्रतिपादनन्तु दाने प्रतिपत्तौ च बोधने।
स्यात् पृष्ठवायनो धान्यविशेषे च मतङ्गजे ॥२३९॥
प्रचलाकी मयूरे स्याद् भुजङ्गे चापि दृश्यते।
स्यात् पद्मलाञ्छनो लोकेश्वरे ब्रह्मणि भास्करे ॥२४०॥
धनदे च स्त्रियां तारालक्ष्मीवाग्देवतासु च।
पीतचन्दनमुद्दिष्टं कालीयकहरिद्रयोः ॥२४१॥
पृष्ठशृङ्गी पुमान् दंशभीरौ षण्डे वृकोदरे।
वरचन्दनमाख्यातं कालीये देवदारुणि ॥२४२॥
वरवर्णिनी तु लाक्षाहरिद्रारोचनासु च।
स्त्रीरत्ने च फलिन्याञ्च साधीयस्यामपि स्त्रियाम् ॥२४३॥

मधुसूदनस्तु पुंसि भ्रमरे वनमालिनि ।
महारजनमुद्दिष्टं शातकुम्भकुसुम्भयोः ॥२४४॥
स्यान्-मृत्युवञ्चन' पुम्भौ श्रीफलद्रोणकाकयोः।
वनमाली च गोविन्दे वाराह्या वनमालिनी ॥२४५॥
विषयी स्यात् पुमान् राज्ञि वैषयिकजनेऽपि च ।
इन्द्रिये कामदेवे च विषयासक्तपूरुषे ॥२४६॥
विश्वकर्मा सहस्रांशौ मुनिभिद्देवशिल्पिनोः ।
विघ्नकारी स्मृतो घोरदर्शनेऽपि विघातिनि ॥२४७॥
वृषपर्व्वा पुमान् दैत्यभेदेऽप्यन्धकसूदने ।
व्योमचारी तु निर्द्दिष्टो देवतायां विहङ्गमे ॥२४८॥
शकुलादनी स्त्रियां कृष्णभेदीकटुकशाकयोः।
शालङ्कायन उद्दिष्टो मुनिभेदे च नन्दिनि ॥२४९॥
शिवकीर्त्तनस्तु पुंसि स्याद् भृङ्गरीटेऽसुरद्विषि।
श्वेतवाहन इत्येष सुधाधाम्नि धनञ्जये ॥२५०॥
श्वेतधामा पुमानिन्दौ घनसाराब्धिफेनयोः ।
स्यात् षष्टिहायनो धान्यविशेषे कुञ्जरे पुमान् ॥२५१॥
सम्प्रयोगी कलाकेलौ कामुके सम्प्रयोजके ।
हरिचन्दनमस्त्री स्याद् देवतानां महीरुहे ॥२५२॥
नपुंसकन्तु गोशीर्षे ज्योत्स्ना कुङ्कुमयोरपि ।
हरिवाहनस्तु पुंसि शचीपति-विवस्वतोः ॥२५३॥

नपञ्चम्।

अन्तावसायी श्वपचे मुनिभेदे च नापिते।
कलानुनादी रोलम्बे कलविङ्के कपिञ्जले ॥२५४॥
जायानुजीवी पुंसि स्यान्-नटे च वकपक्षिणि।
सहस्रवेधि क्लीवं स्याद् रामठे नाम्लवेतसे ॥१५५॥

नान्तवर्गः समाप्तः।

पैकाकम्।

पा ना वातापहपूतेषु पाने पातरि कीर्त्तितः।
स्त्रियान्तु रक्षणे पाने पूते पूरितके च सः॥१॥

पद्विकम्।

कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने।
कपिर्ना सिह्लके शाखामृगे च मधुसूदने ॥२॥
कूपः कूपकमृत्स्थाने गर्त्तामुगुणवृत्तके।
कूपो द्रोणश्यालके स्याद् द्रोणपत्न्यां कृपीमता॥३॥
कृपा दयायां क्षेपस्तु निन्दाविक्षेपलेपने।
विलम्बप्रेरणे गर्व्वे खप्पः क्रोधे बलात्कृतौ ॥४॥
गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि।
ग्रामौघाधिकृते पुंसि शारिवाख्यौषधौ स्त्रियाम्॥५॥

क्षुपः क्षुपस्पर्शनयोस्त्रपु सीसकरङ्गयोः।
तल्पमट्टे कलत्रे च शयनीये च न द्वयोः ॥६॥
त्रपा लज्जा कुलटयोस्तापः सन्तापकृच्छ्रयोः।
तापी नद्यन्तरे दर्पः कस्तूर्य्यामप्यहङ्कृतौ ॥७॥
नीपः कदम्बबन्धूकनीलाशोकद्रुमेष्वपि।
पुष्पं विकाशकुसुमस्त्रीरजःसु नपुंसकम् ॥८॥
रूपं स्वभावे सौन्दर्य्ये नाणके पशुशब्दयोः।
ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि ॥९॥
रेपः स्यान् निन्दिते क्रूरे रोपो रोपणबाणयोः।
लेपः प्रलेपने जग्धौ वपा विवरमेदसोः ॥१०॥
वाष्प ऊष्मणि नाऽस्रेऽथ शष्पं बालतृणे स्मृतम्।
पुंसि स्यात प्रतिभाहानौ शाप आक्रोशदिव्ययोः ॥११॥
शिल्पं स्रुवे क्रियायोग्ये स्वापः शयननिद्रयोः।
स्पर्शाज्ञतायामज्ञाने सूपो व्यञ्जनसूदयोः ॥१२॥

पत्रिकम्।

अनूपो महिषे नाऽम्बुप्रायदेशे तु वाच्यवत्।
असृपा तु जलौकाया डाकिन्या राक्षसे तु ना ॥१३॥
आवापो भाण्डे वपने परिक्षेपालवालयोः।
आक्षेपो भर्त्सनाकृष्टिकाव्यालङ्कृतिषु स्मृतः ॥१४॥

आकल्पः कल्पने वेशे उडुपन्तु प्लवेऽस्त्रियाम्।
चन्द्रे पुंस्युलपो न स्त्री गुल्मिन्यां ना तृणान्तरे ॥१५॥
कच्छपी वल्लकीभेदे द्वयोः क्षुद्रगदान्तरे।
पुंसि निध्यन्तरे कूर्मे मल्लबन्धान्तरेऽपि च ॥१६॥
कलापः संहतौ बर्हे काञ्च्यां भूषणतूणयोः।
चन्द्रे विदग्धे व्याकरणभेदेऽपि कथ्यते बुधैः ॥१७॥
कशिपु भक्ताच्छादनयोरेकोक्त्या पृथगुक्तयोः पुंसि।
कश्यप उक्तो मुनिस्तृगयोर्भेदे काश्यपी च्मायाम्॥१८॥
कुतपोऽस्त्रियां दौहित्रे वाद्ये छागजकम्बले।
कुशे दिनस्याष्टमांशे ना स्त्र्यां कुणपी पुनः ॥१९॥
विट्शारिकायां कुणपः पूतिगन्धौ शवेऽपि च।
जिह्मपः शुनि मार्ज्जारे प्रतापस्तापतेजसोः॥२०॥
पादपः पादपीठे द्वौ पादुकायान्तु पादपा।
रक्तपा स्याज्जलौकायां डाकिन्यां ना तु राक्षसे॥२१॥
विटपो न स्त्रियां स्तम्बशाखाविस्तारपल्लवे।
विटाधिपे ना विकल्पः पुंसि भ्रान्तौ च कल्पने ॥२२॥

पचतुष्कम्।

अभिरूपो बुधे रम्येऽपलापः प्रेमण्यपह्नवे।
अवलेपस्तु गर्व्वे स्याल्लेपने भूषणेऽपि च ॥२३॥

उपतापस्त्वराया स्यादुत्तापगदयोरपि।
जलकूपी कूपगर्त्ते पुष्करिण्याञ्च योषिति ॥२४॥
नागपुष्पस्तु पुन्नागनागकेशरचम्पके।
परिवापस्तु पर्य्युप्तौ जलस्थाने परिच्छदे ॥२५॥
परितापस्तु पुंसि स्यात् दुःखे च नरकान्तरे।
परिकम्पो भये कम्पे प्राप्तरूपो ज्ञरम्ययोः ॥२६॥
पिण्डपुष्पमशोके च जवायाञ्च कुशेशये।
वज्ररूपः शिवे विष्णौ धूनके सरटे स्मरे ॥२७॥
मेघपुष्प पिण्डाभ्राम्बुनादेये ना हरेर्हये।
विप्रलापो विरोधोक्तावपार्थवचनेऽपि च ॥२८॥
वीजपुष्प मरुवके तथा मदनकेऽपि च।
वृक्षधूपस्तु सरलद्रवकृत्रिमधूपयोः ॥२९॥
वृषाकपिः पुमान् कृष्णे शङ्करे जातवेदसि।
हेमपुष्पमशोकेऽपि जवापुष्पे नपुंसकम् ॥३०॥

पपञ्चकम्।

भवेच्चामरपुष्पन्तु पूगे काशाम्रकेतके।

पान्तवर्गः समाप्तः।

फैककम्।

फो यज्ञसाधने स्फाने झञ्झावाते च पुंस्ययम्।

फं रूक्षोक्तौ फुत्कारे च तथा निष्फलभाषणे ॥१॥

फद्विकम् ।

गुम्फस्तु गुम्फने बाहोरलङ्कारे च कीर्त्त्यते ।
रेफो वर्णे च पुंसि स्यात् कुत्सिते पुनरन्यवत् ॥२॥
शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च ।
शिफा जटायां सरिति मांसिकायाञ्च मातरि ॥३॥

फान्तवर्गः समाप्तः ।

वैककम् ।

वः पुमान् वरुणे सिन्धौ भगे तोये गतेऽपि च ।
गन्धने तन्तुसन्ताने पुंस्येव वपने स्मृतः ॥१॥

बद्विकम् ।

कम्बुः शङ्खेऽस्त्रियां पुंसि शम्बूके वलये गजे ।
कम्बिरंशे च वंशस्य खजाकायामपि स्त्रियाम् ॥२॥
क्लीवं स्यात् पण्डके न स्त्री वाच्यलिङ्गस्त्वविक्रमे ।
खर्व्वं सङ्ख्यान्तरे क्लीवं नीचे वामनके त्रिषु ॥३॥
गर्व्वोऽभिमानेऽवलेपे जम्बुः स्यात् पादपान्तरे ।
तथा सुमेरुसरिति द्वीपभेदेऽपि च स्त्रियाम् ॥४॥
डिम्बो भयध्वनावण्डे फुप्फुसप्लीहविप्लवे ।
दर्व्विः स्त्रियां खजाकायां फणायामुरगस्य च ॥५॥

पूर्व्वे तु पूर्व्वजेषु स्युः पूर्व्वाः प्रागाद्ययोस्त्रिषु ।
लम्बा पद्मालया-गौर्य्योस्तिक्तातुम्बयामपि स्त्रियाम् ॥६॥
बिम्बस्तु प्रतिबिम्बे स्यात् मण्डले पुन्नपुंसकम् ।
बिम्बिकायाः फले क्लीबं कृकलासे पुनः पुमान् ॥७॥
शम्बः स्यात् मुषलाग्रस्थलोहमण्डलके पवौ ।
शुभान्विते त्रिषु स्तम्बोऽप्रकाण्डद्रुमगुच्छयोः ॥८॥

वत्रिकम् ।

कदम्बं निकुरम्बे स्यात्-नीपसर्षपयोः पुमान् ।
कलम्बो शाकभेदे स्यात् कदम्बशरयोः पुमान् ॥९॥
कादम्बः स्यात् पुमान् पक्षिविशेषे शायकेऽपि च ।
गजाह्वा गजपिप्पल्यां गजाह्वं हस्तिनापुरे ॥१०॥
गन्धर्व्वः पशुभेदे स्यात् पुंस्कोकिलतुरङ्गयोः ।
अन्तराभवसत्वे च गायने खेचरेऽपि च ॥११॥
गोडुम्बः शीर्णवृन्ते च गयादन्यान्तु योषिति ।
द्विजिह्वस्तु खले सर्पे नितम्बः स्कन्धरोधसोः ॥१२॥
स्त्रियाः पश्चात् कटावर्टः कटके कटिमात्रके ।
प्रलम्बो दैत्यभेदे स्यात् त्रपुषेऽपि पयोधरे ॥१३॥
लताङ्कुरे च शाखायां हारभेदे प्रलम्बने ।
भूजम्बूरपि गोधूमे विकङ्कतफले स्त्रियाम् ॥१४॥
पेरम्बो विघ्नराजे स्यात्-मदिपे शौर्य्यगर्व्विते ।

वचतुष्कम्।

राजजम्बूस्तु जम्बूभित् पिण्डखर्ज्जूरयोः स्त्रियाम् ॥१५॥
ललजिह्वोऽन्यवत् हिंस्रे क्रमेलकश्वनोः पुमान्।
शतपर्व्वा तु दूर्व्वायां वचा भार्गवयोषितोः ॥१६॥

वपञ्चकम्।

धूलीकदम्बो नीपे स्यात् लिनिशे वरुणद्रुमे।
शृगालजम्बू र्गोडुम्बे तथा घोण्टाफले स्त्रियाम्॥१७॥

वान्तवर्गः समाप्तः।

भैककम्।

भं नक्षत्रे गभस्तौ स्त्री पुंसि स्याद् भृगुनन्दने।
भूः स्थानमात्रे कथिता धरण्यामपि योषिति ॥१॥

भद्विकम्।

कुम्भो राश्यन्तरे हस्तिमूर्द्धांशे राक्षसान्तरे।
कार्मुके वारनार्य्याञ्च घटे क्लीवन्तु गुग्गुलौ ॥२॥
स्त्रियामुखाकट्फलयोः पृश्निकायाञ्च पाटलौ।
गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके ॥३॥

दम्भस्तु कैतवे कल्के इन-भूः स्त्री सर्पचक्रयोः।
नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् ॥५॥
द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे।
निभस्तु कथितो व्याजे पुंलिङ्गः सदृशे त्रिषु॥६॥
रम्भा कदल्यप्सरसो ना वेणौ वानरान्तरे।
विभुः प्रभौ सर्व्वगत-शङ्करब्रह्मणोस्तु ना॥७॥
शम्भुः पुंसि महादेवे परमेष्ठिनि चार्हति।
शुभो योगे शुभं क्षेमे वाच्यवत् क्षेमशालिनि॥८॥
खसश्चारिपुरे स्त्री तु शोभा कान्तीच्छयो-र्मता।
सभा सामाजिके गोष्ठ्यां द्यूतमन्दिरयोरपि॥९॥
स्वभू-र्ना ब्रह्मणि हरौ स्तम्भः स्थूणाजड़त्वयोः।

भन्तिकम्।

आरम्भस्त्वरायां स्यादुद्यमे वधदर्पयोः॥१०॥
आत्मभू-र्ना विधौ कामेऽप्युपभस्त्वौपधान्तरे।
स्वरभिद्गृपयोः कर्णरन्ध्रकुम्भीरपुच्छयोः॥११॥
उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति।
शर्कशिम्ब्यां शिरालायां विधवायां क्वचिन-मता॥१२॥
ककुभ् स्त्रियां प्रवेणीदिक्शोभासु चम्पकस्रजि।
ककुभो रागभेदेऽपि वीणाङ्गेऽर्ज्जुनपादपे॥१३॥

कटभी वृक्षभेदेऽपि ज्योतिष्मत्यामपि स्त्रियाम् ।
करभो मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते ॥१४॥
कुसुम्भं हेमनि महारजने ना कमण्डलौ ।
गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि ॥१५॥
रासभे गर्दभी क्षुद्ररोगजन्तुविशेषयोः ।
दुर्लभस्त्रिषु दुष्प्रापे कर्चूरे दुन्दुभिः पुमान् ॥१६॥
वरुणे दैत्यभेर्योश्च स्यात्त्रिबिन्दुत्रिकाक्षये ।
निकुम्भः कुम्भकर्णस्य तनये दन्तिकौषधौ ॥१७।
वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरङ्गमे ।
वर्षाभूः स्त्री च शोथघ्न्यां भूलतामण्डयोः पुमान् ॥१८॥
विष्कम्भो योगभेदे स्याद् विस्तारप्रतिबन्धयोः ।
रूपकाङ्गप्रभेदे च बन्धभेदे च योगिनाम् ॥१९।
विस्रम्भः केलिकलहे विश्वासे प्रणयेऽपि च ।
विष्टम्भः प्रतिबन्धे स्यात् प्रभेदे चानयस्य च ॥२०॥
वृषभः श्रेष्ठवृषयोर्वैदर्भी रीतिभिद्यपि ।
वैदर्भं वाक्यपक्ष्त्वे शरभस्तु पशोर्भिदि ॥२१॥
करभे वानरभिदि सनाभिर्ज्ञातितुल्ययोः ।
सुरभिः शल्लकीमातृभिन्मुरागोषु योषिति ॥२२॥
चम्पके च वसन्ते च तथा जातीफले पुमान् ।
स्वर्णे गन्धोत्पले क्लीबं सुगन्धिकान्तयोस्त्रिषु ॥२३॥

विख्याते शचिवे धीरे चैत्रेऽपि च पुमानयम्।

भचतुष्कम्।

अनुष्टुभ् स्यात् सरस्वत्यां छन्दोभेदे च योषिति ॥२४॥
अवष्टम्भ सुवर्णे च स्तम्भप्रारम्भयोरपि।
शातकुम्भं सुवर्णे स्यात् शातकुम्भोऽश्वमारके ॥२५॥

भान्तवर्गः समाप्तः।

मैककम्।

मो यमे समयेऽपि स्याद् विषे च मधुसूदने।
मा स्त्री पद्मालयायां स्यात् पुलिङ्गश्चन्द्रशेखरे ॥१॥

मद्विकम्।

आमोरुक्तद्विदोः पुंसि स्यादपक्वोऽन्यलिङ्गकः।
उमाऽतसी हैमवती हरिद्राकीर्त्तिकान्तिषु ॥२॥
ऊर्म्मिः स्त्रीपुंसयो वीच्यां प्रकाशे वेगभङ्गयोः।
वस्त्रसङ्कोचरेखायां वेदनापीडयोरपि ॥३॥
क्रमस्यानुक्रमे शक्तौ कम्पे चाक्रमणेऽपि च।
क्षमा भूमौ तितिक्षायां स्त्रियां युक्ते नपुंसकम् ॥४॥
वाच्यवत् शक्तहितयोः कामः स्मरेच्छयोः पुमान्।
रेतस्यपि निकामे च काम्येऽपि स्यान् नपुंसकम् ॥५॥

कामि र्ना कामुके रत्यां स्त्री किम् क्षेपवितर्कयोः।
निन्दायाञ्च परिप्रश्ने वाच्यलिङ्गमुदाहृतम् ॥६॥
कृमि र्ना क्रिमिवत्कीटे लाक्षायां कृमिले खरे।
किर्म्मी पलाशे शालायां हेमपुत्याञ्च योषिति ॥७॥
क्षुमाऽतसीनीलिकयोः क्षेमं स्याल्लब्धरक्षणे।
चण्डायां ना शुभे न स्त्री कात्यायन्याञ्च योषिति॥८॥
क्षौममट्टे दुकूलेऽस्त्री क्षौमं वल्कलजांशुके।
शणजेऽतसीजे खर्मं पौरुषे कोपजांशुके ॥९॥
गमो नाऽध्वविवर्त्ते स्याद्पर्य्यालोचनेऽध्वनि।
ग्रामः स्वरे संवसथे ग्रीष्म उष्णर्त्तुभेदयोः ॥१०॥
गुल्मः सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः।
स्तम्बे स्त्रियामामलक्यां लावनीवस्त्रवेश्मसु ॥११॥
घर्म्मः स्यादातपे ग्रीष्मेऽप्युष्मस्वेदाम्भसोरपि।
चमूः सेनाविशेषे च सेनामात्रे च योषिति ॥१२॥
जाल्मः स्यात् पामरे क्रूरेऽसमीक्ष्यकारिणि त्रिषु।
जिह्मस्तु कुटिले मन्दे क्लीवं तगरपादपे॥१३॥
तोक्मं कर्णमले पुंसि हरिते च हरिद्यवे।
दमस्तु दमथे दण्डे कर्द्दमे दमने पुमान् ॥१४॥
दस्मस्तु यजमाने स्यादपि चौरे हुताशने।
द्रुमो महीरुहे पारिजाते किम्पुरुषेश्वरे ॥१५॥

धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयो: क्रतौ।
अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे ॥१६॥
ध्याम दमनके गन्धतृणेऽथ श्यामले त्रिषु।
नेमि ना तिनिशे कूपत्रिकाचक्रान्तयो: स्त्रियाम् ॥१७॥
नेम: कीलेऽवधौ गर्त्ते प्राकारे कैतवेऽपि च।
पद्मोऽस्त्री पद्मके व्यूहनिधिसङ्ख्यान्तरेऽम्बुजे ॥१८॥
नानागे स्त्री फञ्जिकाश्रीचारटीपन्नगेषु च।
ब्रह्मी तु फञ्जिकाया स्यात् शाकमत्स्यप्रभेदयो: ॥१९॥
ब्राह्मी तु भारती सोमवल्लरीब्रह्मशक्तिषु।
भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दभ्रमणयोरपि ॥२०॥
भाम: क्रोधे रवौ दीप्तौ भीष्मो गाङ्गेयघोरयो:।
भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे ॥२१॥
भूमि वसुन्धराया स्यात् स्थानमात्रेऽपि च स्त्रियाम्।
भौम: कुजे च नरके पुंसि भूमिभवे त्रिषु ॥२२॥
यमोऽन्यलिङ्गो यमजे ना काके शमने शनौ।
शरीरसाधनापेक्षनित्यकर्म्मणि संयमे ॥२३॥
यामस्तु पुंसि प्रहरे संयमे च प्रकीर्त्तित:।
यामि: कुलस्त्रीस्वसो: स्त्री युग्मो धनुषि संयुगे ॥२४॥
रश्मि पुमान् दीधितौ स्यात् पक्ष्मप्रग्रहयोरपि।
रमा लक्ष्म्या रम: कान्ते रक्ताशोकद्रुमे स्मरे ॥२५॥

रामा योषाहिङ्गुनद्योः क्लीबं वास्तककुष्ठयोः।
ना राघवे च वरुणे रैणुकेये हलायुधे ॥२६॥
हये च पशुभेदे च त्रिषु चारौ सितेऽसिते।
रुमा सुग्रीवदारेषु विशिष्टलवणाकरे ॥२७॥
रुक्मञ्च काञ्चने लोहे लक्ष्मीः सम्पत्तिशोभयोः।
ऋद्ध्यौषधे च पद्मायां वृद्धिनामौषधेऽपि च ॥२८॥
फलिन्यां स्त्रीवर्मि वान्तौ स्त्रियां पुंसि हुताशने।
वामं धने पुंसि हरे कामदेवे पयोधरे ॥२९॥
वल्गु प्रतीपसव्येषु त्रिषु नार्य्यां स्त्रियामथ।
वामी शृगाली वडवा रासभी करभीषु च ॥३०॥
शमी शक्तुफलायाञ्च शिम्बिकायाञ्च वाग्गुलौ।
श्यामो वटे प्रयागस्य वारिदे वृद्धदारके ॥३१॥
पिके च कृष्णहरितोः पुंसि स्यात् तद्वति त्रिषु।
मरीचे सिन्धुलवणे क्लीबं स्त्री शारिवौषधौ ॥३२॥
अप्रसूताङ्गनायाञ्च प्रियङ्गावपि वागुजौ।
यमुनायां त्रियामाया कृष्णत्रिवृतिकौषधौ ॥३३॥
नीलिकायामथ श्यामो मासे मण्डपकाल्नयोः।
शुर्या तेजसि सूर्य्ये ना समा सम्वत्सरे स्त्रियाम् ॥३४॥
सर्व्वसाधुसमानेषु समं स्यादभिधेयवत्।
सीमाऽऽघाटस्थिति क्षेत्रेष्वण्डकोषेऽपि च स्त्रियाम् ॥३५॥

सूक्ष्म स्यात् कैतवेऽध्यात्मे पुस्यणौ त्रिषु चाल्पके।
सूमं चीरे च नभसि सोमस्तु हिमदीधितौ ॥३६॥
वानरे च कुबेरे च पितृदेवे समीरणे।
वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ ॥३७॥
हिम तुषारमलयोद्भवयोः स्यान् नपुंसकम्।
शीतले वाच्यलिङ्गोऽथ होमि ना पावके घृते ॥३८॥

मत्रिकम्।

अधमः स्याद् गर्ह्यजनेऽप्यागमः शास्त्र आगतौ।
आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठे वने ॥३९॥
अस्त्रियामुत्तमा दुग्धिकायां स्त्री त्रिषु भद्रके।
उद्दामो बन्धरहिते स्वतन्त्रे च प्रचेतसि ॥४०॥
कलमः पुंसि लेखन्यां शालौ पटच्चरेऽपि च।
कुसुम स्त्री रजो नेत्ररोगयोः फलपुष्पयोः ॥४१॥
कृत्रिम लवणभेदे ना सिह्लके रचिते त्रिषु।
गोलोमी श्वेतदूर्वायां स्याद् वचाभूतकेशयोः ॥४२॥
गोधूमो नागरङ्गे स्यादोषधिव्रीहिभेदयोः।
गोतमो ना मुनौ बुद्धे रोचनी दुर्गयोः स्त्रियाम् ॥४३॥
तल्लिमं कुट्टिमे तल्पे चन्द्रहासे वितानके।
दाडिमस्तु त्रिलिङ्गः स्यादेलायां करके त्रिषु ॥४४॥
निष्क्रमो बुद्धिसम्पत्तौ निर्गमे दुष्कुलेऽपि च।

निगमो वाणिजे पुर्य्यां कटे वेदे वणिक्पथे ॥४५॥
नियमो मन्त्रणायाञ्च प्रतिज्ञानिश्चये व्रते ।
नैगमः स्यादुपनिषद्वणिजो नागरेऽपि च ॥४६॥
परमं स्यादनुज्ञायामव्ययं परमं परे ।
प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत् ॥४७॥
प्रतिमा गजदन्तस्य बन्धे चानुकृतावपि ।
पञ्चमो रागभेदे स्यात् स्वरभेदेऽथ पञ्चमी ॥४८॥
पाण्डवानाञ्च पत्नयां स्त्री पञ्चानां पूरणे त्रिषु ।
प्रक्रमः क्रमेऽवसरे मध्यमो मध्यजेऽन्यवत् ॥४९॥
पुमान् स्वरे मध्यदेशेऽप्यवलग्ने तु न स्त्रियाम् ।
स्त्रियां दृष्टरजोनार्य्यां कर्णिकाङ्गुलिभेदयोः ॥५०॥
व्यचरच्छन्दसि तथा ललामं लाञ्छने ध्वजे ।
शृङ्गे प्रधाने भूषायां तथा वालधिपुण्ड्रयोः ॥५१॥
तुरङ्गे च प्रभावेऽथ व्यायामः पौरुषे श्रमे ।
विषमे दुर्गसञ्चारे विभ्रमो भ्रान्तिहावयोः ॥५२॥
विद्रुमो रत्नवृक्षेऽपि प्रवालेऽपि पुमानयम् ।
विलोमस्तु प्रतीपे स्याद् भुजङ्गे वरुणे शुनि ॥५३॥
आमलक्यां विलोमी च विलोमञ्चारघट्टके ।
विक्रमस्तु पुमान् क्रान्तिमात्रे स्यात् शक्तिसम्पदि ॥५४॥
संक्रमः क्रमणे पुंसि न स्त्री स्याद् दुर्गसञ्चरे ।

सम्भ्रमः साध्वसेऽपि स्यात् सवेगादरयोरपि ॥५५॥
सत्तमः स्यात पूज्यतमे साधीयस्युत्तमे त्रिषु ।
सरमा कुक्कुरी देवशुन्योः स्याद् राक्षसीभिदि ॥५६॥
सुषमाऽत्यन्तशोभाया स्त्री चारौ च समे त्रिषु ।
सुषीमः शीतले चारौ त्रिषु ना पन्नगान्तरे ॥५७॥

मचतुष्कम् ।

भवेदनुपमा सुप्रतीकिन्या स्त्री त्रिपूत्तमे ।
अभ्यागमो विरोधाजिघाताभ्युद्गमनान्तिके ॥५८॥
उपक्रमस्तूपधाया ज्ञात्वारम्भे च विक्रमे ।
चिकित्सायामुपगम' स्वीकारेऽन्तिकसर्पणे ॥५९॥
जलगुल्मो जलावर्त्ते कच्छपे जलचत्वरे ।
दण्डयामस्तु कीनाशे दिवसे कुम्भसम्भवे ॥६०॥
प्लवङ्गमस्तु मण्डूके तथा शाखामृगेऽपि च ।
पराक्रमो विक्रमे स्यात् सामर्थ्योद्योगयोरपि ॥६१॥
महापद्मः पुमान् नागनिधिसङ्ख्यान्तरेषु च ।
यातयामोन्यवज् जीर्णे परिभुक्तोज्झितेऽपि च ॥६२॥
सार्व्वभौमस्तु दिङ्नागे सर्व्वपृथ्वीपतावपि ।
अभ्युपगमस्तु पुंसि स्वीकारे निकटगमने च ॥६३॥
नक्षत्रनेमिरुक्ता रेवत्या ना ध्रुवे चन्द्रे ।

सान्तवर्गः समाप्त' ।

यैकाकम्।

यो नावायौ यमने या याच्ञाप्तिधूमितत्यागेषु।
वारणयोगसमञ्जायानेषु पुमांस्तु गन्तरि विख्यातः॥१॥
ज्या मातरि वसुधायां मौर्व्यां द्यु क्लीवमह्नि गगने च।
ना ज्वलने द्यौः स्त्रिदशालयत्रिदशवर्त्मनो र्योषित्॥२॥

यद्विकम्।

अव्य. स्यात् पङ्कजे पुंसि त्रिषु रम्ये च नाविके।
अर्थ्यं शिलाजतुन्यार्थ्यें बुधे न्याय्ये च वाच्यवत् ॥३॥
अन्त्यस्तु पुंसि मुस्तायामन्त्योऽङ्गनेऽधमे त्रिषु।
अर्घ्यमर्घस्य योग्ये स्यात् अर्घार्थेऽपि च वाच्यवत्॥४॥
अन्योऽसदृशेतरयोरर्य्यः स्यात् स्वामिवैश्ययोः।
आस्य मुखे च तन्मध्ये तद्भवे च स्त्रियां स्थितौ ॥५॥
इज्या दानेऽध्वरेऽर्चायां सङ्गमे स्त्री गुरौ त्रिषु।
इभ्या करेणु शल्लक्योः स्त्रियामाढ्ये तु वाच्यवत् ॥६॥
कश्य त्रिषु कशार्हे स्यात् क्लीवं मद्याश्वमध्ययोः।
कन्या कुमारिकानार्य्यो रोपधीराशिभेदयोः ॥७॥
क्षयोरोगान्तरे वेश्मकल्पान्तापचयेषु च।
कल्य प्रभाते क्लीवं स्यात् कल्योवाक् श्रुतिवर्जिते ॥८॥
सज्जनीरोगदक्षेषु कल्याणवचनेऽपि च।
उपायवचनेऽपि स्यात् त्रिषु मद्येतु योषिति ॥९॥

कच्छा वृहतिकायां स्यात् कान्चयां मध्येभवन्धने।
चर्म्यादीनां प्रकोष्ठेऽपि कार्य्यं हेतौ प्रयोजने ॥१०॥
काव्य ग्रन्थे पुमान् शुक्रे काव्या स्यात् पूतनाधियोः।
कांस्यं वाद्यान्तरे पानपात्रे स्यात् तैजसान्तरे ॥११॥
कायः कदैवते मूर्त्तौ सङ्घे लक्ष्यस्वभावयोः।
मनुष्यतीर्थे कायं स्यात् क्रियारूपायचेष्टयो ॥१२॥
आरम्भे निष्कृतौ पूजासम्प्रधारणकर्म्मसु।
शिक्षाचिकित्साकरणे कृत्यं स्यात्तु नपुंसकम् ॥१३॥
विलेपने च भित्तौ च तथा कौतूहलेऽपि च।
कुल्यं स्यात् कीकसेऽप्यष्टद्रोणी शूर्पामिषेषु च ॥१४॥
कुल्या पयःप्रणाल्याञ्च नद्यां जीवन्तिकौषधौ।
कुलोद्भवे कुलहिते त्रिषु मान्ये पुनः पुमान् ॥१५॥
कृत्या क्रियादेवतयो स्त्रिषु विद्दिष्टकार्य्ययोः।
गयः स्यात् पशुराजर्षीभेदे तीर्थे पुनर्गया ॥१६॥
गव्य नपुंसकं ज्यायां रागद्रव्येऽप्यथ स्त्रियाम्।
गोसमूहे त्रिलिङ्गन्तु दुग्धादौ च गोहिते ॥१७॥
ग्राम्यं स्त्रीकरणे क्लीवेऽश्लीलप्राकृतयोस्त्रिषु।
गुह्य रहस्युपस्थे च गुह्यः कमठदम्भयोः ॥१८॥
गृह्यं गुदे ग्रन्थभेदे क्लीवं शाखापुरे स्त्रियाम्।
गृहासक्तौ मृगादौ ना त्रिषु चास्वैरिपक्षयोः ॥१९॥

गेयन्तु गीते गेयः स्याद् गातव्ये गायने त्रिषु।
गोप्यो दासीसुते पुंसि रक्षणीयेऽभिधेयवत् ॥२०॥
चव्यन्तु चविके क्लीवं वचायामपि योषिति।
चयः समूहे प्राकारे मूलबन्धे समाहृतौ ॥२१॥
चित्यं मृतकचैत्ये स्याच् चितामृत चितौ स्त्रियाम्।
चैत्यमायतने बुद्धबिम्बे नोद्देश्यपादपे ॥२२॥
चोद्यं स्यादद्भुते प्रश्ने चोदनार्हे तु वाच्यवत्।
छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः ॥२३॥
पालनोत्कोचयोर्दीप्तिसच्छोभापङ्क्तिषु स्त्रियाम्।
जया जयन्तीतिथिभित्पथ्योमातत्सखीषु च ॥२४॥
अग्निमन्थे ना जयन्ते विजये च युधिष्ठिरे।
जन्यं हट्टे परीवादे संग्रामे च नपुंसकम् ॥२५॥
जन्या मातृवयस्यायां जन्यः स्याज् जनके पुमान्।
त्रिपूत्पाद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः ॥२६॥
वरस्निग्धेऽथ जन्युः स्यात् पुंसि प्राण्यग्निधातृषु।
त्रयी त्रिवेद्यां त्रितये न ना तार्क्ष्योऽश्वशालयोः ॥२७॥
गरुडाग्रजे सुपर्णे पुंसि क्लीवं रसाञ्जने।
तिष्यो नक्षत्रभेदे स्यात् कलौ धात्याञ्च योषिति ॥२८॥
द्रव्यन्तु पित्तले वित्ते पृथिव्यादौ विलेपने।
क्लीवे च भेषजे भव्ये द्रुविकारे च वाच्यवत् ॥२९॥

दस्यु चौरे रिपौ पुंसि दायः सोऽमुख्यभाषणे।
विभक्तव्यपितृद्रव्ये तथा हरणदानयोः ॥३०॥
दिव्यं लवङ्गे धात्र्यां स्त्री वल्गौ दिवि भवे त्रिषु।
दूष्यं त्रिषु दूषणीये क्लीवं वस्त्रे च तद्गृहे ॥३१॥
दूत्यं दूतस्य भागे च भावे कर्मण्यपि स्मृतम्।
दैत्योऽसुरे सुरायान्तु दैत्या चण्डौषधावपि ॥३२॥
धन्या धात्र्यामलक्योः स्याद् धन्यं पुण्यवति त्रिषु।
धान्यं व्रीहिषु धन्याके विष्णुः स्यानाग्निसद्मसु ॥३३॥
शक्तावृषेऽप्यथ नयो नीतिद्यूतविशेषयोः।
नाव्यं नौर्व्यत्रिके त्वास्ये नित्यं स्यात् सततेऽपि च ॥३४॥
शाश्वते त्रिषु पथ्या स्त्री हरीतक्यां हिते त्रिषु।
पद्य श्लोके पुमान् शूद्रे पद्या वर्त्मनि कीर्त्तिता ॥३५॥
पाक्यं विटाख्यलवणे यवक्षारे पुनः पुमान्।
प्रायो मरणानशने मृत्यौ वाहुल्यतुल्ययोः ॥३६॥
प्रियो हृद्येऽन्यवत् पुंसि वृद्धिनामौषधे धवे।
पीयुः काले रवौ घूके ना पुण्य शोभने त्रिषु ॥३७॥
क्लीवं धर्मे च सुकृते पुष्यः कलियुगे स्मृतः।
नक्षत्रमासयोर्भेदे पूज्यः श्वशुरवन्द्ययोः ॥३८॥
पेयं पानव्यपयसोः पेयाश्राणाच्छमण्डयोः।
वन्ध्यस्त्वफलवृक्षादौ स्त्रियां स्यादप्रजः स्त्रियाम् ॥३९॥

वर्य्या पतिंवरायां स्त्री वरेण्ये त्रिषु ना स्मरे।
वल्यं प्रधानधातौ स्यात् क्लीवं वल्कके त्रिषु ॥४०॥
वीर्य्यं शुक्रे प्रभावे च तेजः सामर्थ्ययोरपि।
भयं प्रतिभये घोरे प्रसूने कुब्जकस्य च ॥४१॥
भव्यं शुभे च सत्ये च योग्ये भाविनि च त्रिषु।
कमरङ्गतरौ पुंसि स्त्रियां करिकणोमयोः ॥४२॥
क्लीवमस्थिनि भाग्यन्तु स्यात् शुभाशुभकर्म्मणोः।
भृत्यो दासे भृतौ भृत्या मयु र्ना किन्नरे मृगे ॥४३॥
मयः शिल्पिनि दैत्यानां करभेऽश्वतरेऽपि च।
मध्यं विलग्ने न स्त्री स्यात् न्याय्येऽन्तरेऽधमेऽन्यवत्॥४४॥
मत्स्यो मीनेऽथ पुंभूम्नि देशे मन्युः पुमान् क्रुधि।
दैन्ये शोके च यज्ञे च माल्यं कुसुमतत्स्रजोः ॥४५॥
माया स्यात् शांबरीबुद्धो मायः पीताम्बरेऽसुरे।
मूल्यं स्याद् वेतने प्रस्त्र मृत्यु र्ना मरणे यमे॥४६॥
मेध्यं त्रिषु शुचौ रक्तवचारोचनयोः स्त्रियाम्।
ययुः पुमानश्वमेधतुरङ्गे च तुरङ्गमे ॥४७॥
याप्यस्तु यापनीये स्यात् निन्दितेऽप्यभिधेयवत्।
याम्याऽप्राच्यां भरण्याञ्च पुस्यगस्त्ये च चन्दने ॥४८॥
योग्यः प्रवीणयोगार्होपायिशक्तेषु वाच्यवत्।
क्लीवन्त्वौषधे पुष्ये ना स्त्र्यभ्यामार्कयोपिताः ॥४९॥

रम्या रात्रौ चम्पके ना मनोज्ञे त्वभिधेयवत्।
नपुंसक पटोलस्य मूले स्हरिभिरिष्यते ॥५०॥
रथ्या रथौघविशिखावर्त्तनीषु च योषिति ।
रथवोढरि पुंलिङ्गो रूप्य' स्यात् सुन्दरे त्रिषु ॥५१॥
आहतस्वर्णरजते रजते च नपुंसकम।
लयो विनाशे सश्लेषे साम्ये तौर्य्यत्रिके मतम् ॥५२॥
लक्ष्य स्यादपदेशेऽपि शरव्येऽपि नपुंसकम्।
लभ्य युक्ते च लब्धव्ये लास्य तौर्य्यत्रिके मतम् ॥५३॥
नृत्ये च व्रज्या प्रस्थाने वर्गे पर्य्यटनेऽपि च ।
वन्य त्रिषु वनोद्भूते स्त्री वनाम्बुसमूहयोः ॥५४॥
वाच्यन्तु कुत्सिते हीने वचनार्हे च वाच्यवत।
विन्ध्या स्त्रियां लवल्यां स्यात् पुंसि व्याधाद्रिभेदयो'॥५५॥
वीक्ष्यन्तु विस्मये दृश्ये पुंसि लासकवाजिनो' ।
वेश्य वेश्यागृहे क्लीव गणिकायान्तु योषिति ॥५६॥
शल्यन्तु नस्त्रिया शङ्कौ क्लीवं स्वेड़ेषु तोमरे ।
मदनद्रुमाविधानो शयः शय्याहि पाणिषु ॥५७॥
शय्या स्यात् शयनीये च गुम्फनेऽपि च योषिति ।
शून्य स्यान् निर्ज्जने वाच्यलिङ्ग नल्यान्तु योषिति॥५८॥
शौर्य्यमारभटी शक्त्योः सह्य शैलान्तरे पुमान्।
सोढव्ये वाच्यलिङ्गः स्यादारोग्ये तु नपुंसकम् ॥५९॥

सङ्ख्यं समिति सङ्ख्या स्याद्देकाद्यदिविचारयोः।
सन्ध्या पितृप्रधनद्यन्तरयो र्युगसन्धिषु ॥६०॥
सत्यं कृते च शपथे तथ्ये त्रिषु तु तद्वति।
सव्यं वामे प्रतीपे च स्मयो नाऽद्भुतगर्व्वयोः ॥६१॥
सायः काण्डे दिनान्ते च साध्यो योगान्तरे शरे।
गणदेवविशेषे च साधनीये तु वाच्यवत् ॥६२॥
सूर्य्योऽर्कपर्णे तपने स्त्री तज्जायौषधीभिदोः।
स्थेयो विवादपत्तस्य निर्णेतरि पुरोहिते ॥६३॥
सेव्यं क्लीवमुशीरे स्यात् सेवार्हे पुनरन्यवत्।
सैन्यं क्लीवं बले सेनासमवेते तु वाच्यवत् ॥६४॥
सौम्यो ज्ञे ना त्रिष्वनुग्रे मनोज्ञे सोमदैवते।
हार्य्यो विभीतकतरौ हर्त्तव्ये पुनरन्यवत् ॥६५॥
हृद्यं जवनेऽथ त्रिषु हृज्जहृद्गितहृत्प्रिये।
वशकृद्वेदमन्त्रे ना वृद्धिनामौषधे स्त्रियाम् ॥६६॥

यत्रिकम्।

अनयस्तु विपद्दैवाशुभयोर्व्यसनेषु च।
अत्ययोऽतिक्रमे दण्ड विनाशे दोषकृच्छ्रयोः ॥६७॥
अश्वीयमश्वसङ्घाते क्लीवमश्वहितेऽन्यवत्।
अधप्या तटिनीभेदे प्रगल्भे वाच्यलिङ्गकः ॥६८॥

अभिख्या त्वभिधाने स्यात् शोभायाञ्च यशस्यपि ।
अभया तु हरितक्यामुशीरे तु नपुंसकम् ॥६९॥
निर्भये वाच्यलिङ्ग स्यादपत्य पुत्रयो मतम् ।
अगस्त्य स्यात् कुम्भयोनौ वङ्गसेनतरावपि ॥७०॥
अवध्यमवधार्हे स्यादनर्थकवचस्यपि ।
अव्ययोऽस्त्री शब्दभेदे ना विष्णौ निर्व्यये त्रिषु ॥७१॥
अहल्या त्वप्सरो भेदे भार्य्यायां गौतमस्य च ।
अहार्य्य पर्व्वते ना स्यादहर्त्तव्ये तु वाच्यवत् ॥७२॥
आशय स्यादभिप्राये पनसाधारयोरपि ।
स्यादातिथ्यमतिथ्यर्थे त्रिलिङ्गमतिथौ पुमान् ॥७३॥
आत्रेयी पुष्पवत्यां स्यात् नदीभेदे च ना मुनौ ।
आदित्यो भास्करे देवेऽप्याम्नायो निगमेऽपि च॥७४॥
उपदेशेऽपीन्द्रियन्तु हृषीके चेतसि स्मृतम ।
उदयस्तु पुमान पूर्व्वपर्व्वते च समुन्नतौ ॥७५॥
उपायः सामभेदादौ तथैवोपागतौ पुमान् ।
ऊर्णायु र्ना चणभङ्गे मेषकम्बलमेषयोः ॥७६॥
औचित्यमुचितत्वे स्यात् सत्येऽपि च नपुंसकम् ।
कषायो रसभेदेऽपि निर्य्यासे च विलेपने॥७७॥
अङ्गरागे च नस्त्री स्यात सुरभौ लोहिते त्रिषु ।
काळेयो दैत्यभेदे स्यात कालखण्डे नपुंसकम्॥७८॥

चिपण्युस्तु पुमान् देहे सुरभौ वाच्यलिङ्गकः।
कुलायस्तु पुमान् स्थानमात्रे स्यात् पक्षिवासके॥७९॥
क्षेत्रियं क्षेत्रजतृणे परदेहविकित्सयोः।
प्ररदाररतासाध्यरोगयोः क्षेत्रियः पुमान्॥८०॥
कौशल्यमनुतापे स्यादयुक्तकरणेऽपि च।
गाङ्गेयः स्यात् पुमान् भीष्मे क्लीवं स्वर्णकशेरुणोः॥८१॥
चक्षुष्यः केतकीपुण्डरीकसंज्ञकपादपे।
कुलत्थिका सुभगयोः स्त्रियामक्षिहितेऽन्यवत्॥८२॥
चाम्पेयश्चम्पके स्वर्णे किञ्जल्के नागकेशरे।
जघन्यं मेहने क्लीवं चरमे गर्हितेऽन्यवत्॥८३॥
जटायुः पुंसि सम्पातेः कनीयसि च गुग्गुलौ।
जरायुरपि तत्पक्षिराजे गर्भाशये पुमान्॥८४॥
तपस्या व्रतचर्य्यायां तपस्यः फाल्गुने पुमान्।
द्वितीया तिथिभित्पत्न्योः पूर्णे तूभयो स्त्रिपु॥८५॥
द्रेयस्तु वाच्यलिङ्गः स्याद् धार्म्मिके लोकयात्रिके।
नाटेयी नागरङ्गे स्याज् जयायामम्बुवेतसे॥८६॥
भूमिजम्बां जवायाञ्च व्यङ्गुष्ठेऽपि च योषिति।
निकायस्तु पुमान् लक्ष्ये सधर्म्मिप्राणिसंहतौ॥८७॥
समुच्चये संहतानां निलये परमात्मनि।
नैपथ्यं स्यादलङ्कारे रङ्गस्थायां नपुंसकम्॥८८॥

प्रणयः प्रश्रये प्रेम्णि याच्ञाविस्रम्भयोरपि ।
निर्व्वाणेऽप्यथ पर्य्यायः प्रकारेऽवसरे क्रमे ॥८९॥
प्रलयो मृत्युकल्पान्तमूर्च्छापायेषु पुंस्ययम् ।
प्रत्ययः प्रथितत्वे च मत्यादिज्ञानयोरपि ॥९०॥
आचारे शपथे रन्ध्रविश्वासाधीनहेतुषु ।
पर्य्यन्यो मेघशब्देऽपि ध्वनदम्बुदशक्रयोः ॥९१॥
प्रसव्यं वाच्यलिङ्गं स्यात् प्रतिकूलानुकूलयोः ।
प्रकीर्य्य पूतिकरजे विनिकीर्य्ये तु वाच्यवत् ॥९२॥
प्रणाय्योऽसम्मतेऽपि स्यादभिलापविवर्ज्जिते ।
पयस्यन्तु पयोजातहितयोर्वाच्यलिङ्गकम् ॥९३॥
दुग्धिकाक्षीरकाकोल्योः स्वर्णक्षीर्य्यामपि स्त्रियाम् ।
पारुष्यं परुषत्वे च दुर्व्वाक्ये पुंसि गीष्पतौ ॥९४॥
पानीयन्तु जले क्लीवं पातव्ये वाच्यलिङ्गकम् ।
पौलस्त्यस्तु कुवेरे स्याद् दशग्रीवेऽपि पुंस्ययम् ॥९५॥
वलयः कण्ठरोगे ना कटके पुन्नपुंसकम् ।
ब्रह्मण्यः स्याद् ब्रह्मसाधुब्रह्मदारुशनैश्वरे ॥९६॥
वालेयो गर्द्दभे पुंसि मृदौ वालहिते त्रिषु ।
ब्राह्मण्यं ब्राह्मणत्वे च समूहे च द्विजन्मानाम् ॥९७॥
भुवन्युः स्यात् पुमान् भानौ ज्वलने शशलाञ्छने ।
भुजिष्यस्तु स्वतन्त्रे च हस्तसूत्रकदासयोः ॥९८॥

स्त्रियां दासी गणिकयो र्मलयः पर्व्वतान्तरे।
शैलांशे देश आरामे त्रिवृतायान्तु योषिति ॥९९॥
मङ्गल्यः स्यात् त्रायमाणाश्वत्थविल्वमसूरके।
स्त्रियां शम्यामधः पुष्पीमिसीशुक्लवचासु च ॥१००॥
रोचनायामथो दूर्व्वा क्लीवं शिवकरे त्रिषु।
मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि ॥१०१॥
रहस्या स्त्री नदीभेदे गोपनीयेऽभिधेयवत्।
लौहित्यं लोहितत्वे च क्लीवं पुंसि नदान्तरे ॥१०२॥
वदान्यो दानशौण्डे च चारुवादिनि वाच्यवत्।
व्यवायः सुरतेऽन्तर्द्धौ पुंसि क्लीवन्तु तेजसि ॥१०३॥
वक्तव्यं कुत्सिते हीने वचनार्हे तु वाच्यवत्।
विजयः स्याज् जये पार्थे स्त्रियां तिथ्यन्तरे सुता ॥१०४॥
उमासख्यां विस्मयः स्यादाश्चर्य्ये गर्व्वयोः पुमान्।
विनया तु वलायां स्त्री शिक्षायां प्रणतौ पुमान् ॥१०५॥
विषयो गोचरे देशे तथा जनपदेऽपि च।
प्रबन्धादू यस्य यो ज्ञात स्तत्र रूपादिके पुमान् ॥१०६॥
विशल्याऽग्निशिखादन्ती गुडूची त्रिपुटासु च।
श्वशुर्य्यो देवरे श्याले शाण्डिल्यः पावकान्तरे ॥१०७॥
मुनिभेदे च मालूरे शालेयः स्याच् मिसौ पुमान्।
त्रिषु शाल्युद्भवे क्षेत्रे स्यात् शीर्षण्यन्तु शीर्षके ॥१०८॥

सुकेशे पुंसि शैलेयं तालपर्ण्याञ्च सैन्धवे।
शैलजे ना तु मधुपे शिलातुल्येऽन्यलिङ्गकम् ॥१०९॥
संस्त्यायः सन्निवेशे च संस्थाने विस्तृतावपि।
सन्नयः समवाये स्यात् पृष्ठस्थायि बले पुमान् ॥११०॥
समयः शपथाचारसिद्धान्तेषु तथा धियि।
क्रियाकारे च निर्द्दिशे सङ्केते कालभाषयोः ॥१११॥
सरण्युस्तु पुमान् वारिवाहे स्यान्मातरिश्वनि।
सामर्थ्यं योग्यतायां स्यात् शक्तावपि नपुंसकम् ॥११२॥
सौरभ्यन्तु मनोज्ञत्वे सौगन्ध्ये गुणगौरवे।
सौभाग्यं सुभगत्वे स्याद् योगभेदे नपुंसकम् ॥११३॥
हिरण्यं रेतसि द्रव्ये शातकुम्भवराटयोः।
अँक्षये मानभेदे स्यादकुप्ये च नपुंसकम् ॥११४॥
हृदयं मानसे वुक्कोरसोरपि नपुंसकम्।

यचतुष्कम्।

भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः ॥११५॥
अवश्याय स्तु नीहारेऽप्यभिमानेऽपि पुंस्ययम्।
अथावसायः शेषे स्यात् समाप्तौ निश्चयेऽपि च ॥११६
अपसव्यं विलिङ्गन्तु दक्षिणप्रतिकूलयोः।
अन्तशय्या मृतौ भूमिशय्यायां पितृकानने ॥११७॥

उपकार्य्या राजसद्मन्युपकारोचितेऽन्यवत् ।
जलाशयो जलाधारे स्यादुशीरे नपुंसकम् ॥११८॥
तण्डुलीयः शाकभेदे विडङ्गतरुतापयोः ।
तृणशून्यं मल्लिकायां तथा स्यात् केतकीफले ॥११९॥
दाक्षिणात्यो नारिकेले त्रिषु दक्षिणदिग्भवे ।
धनञ्जयोऽर्ज्जुने वह्निनागभिद्देहमारुते ॥१२०॥
निरामयस्तु पुंसि स्याद्डिङ्क्के त्रिषु नीरुजि ।
परिधायो जनस्थाने परिच्छेद नितम्बयोः ॥१२१॥
प्रतिश्रयः सभायाञ्चाश्रये प्रतिभयं भये ।
घोरेऽपि पाञ्चजन्य तु विष्णुशङ्खे हुताशने ॥१२२॥
प्रावृषेण्यः पुमान् नीपे प्रावृट्कालभवे त्रिषु ।
पौरुषेयः हते पुंसां विकारे पुरुषस्य च ॥१२३॥
त्रिषु ना सद्मवधयोः पुरुषस्य पदान्तरे ।
फलोदयः पुमान् लाभे त्रिदिवे शालयेऽपि च ॥१२४॥
भागधेयं मतं भाग्ये भागप्रत्याययोः पुमान् ।
महालयो विहारे स्यात् तीर्थे च परमात्मनि ॥१२५॥
महोदयः कान्यकुब्जे चाधिपत्यापवर्गयोः ।
महामूल्यः पद्मरागे ना महार्घेऽन्यलिङ्गकः ॥१२६॥
मार्ज्जारीयः स्मृतः शूद्रे विड़ाले कायशोधने ।
रौहिणेयोऽन्यवद् वत्से ना बुधे च हलायुधे ॥१२७॥

विलेशयस्तु पुलिङ्गो मूषिके च भुजङ्गमे ।
वैनतेय स्तु गरुडे स्यात् प्रभाकरसारयो ॥१२८॥
समवायः समीके स्यादापदुत्तरकालयो ।
समाह्वय स्तु पशुभिः खगै द्यूते च सङ्गरे ॥१२९॥
भवेत समुदयः सङ्घे सङ्गमे च समुद्गमे ।
समुदायः समूहे स्याद् युद्धे समुच्चयः पुमान् ॥१३०॥
विरोधोत्सेधयोः स्वलोच्चयोर्गण्डोपलेऽपि च ।
गजानां मध्यमगतिऽप्यसाकल्यवग्गडयोः ॥१३१॥
हिरण्मयः सुरज्येष्ठे ना सुवर्णमये त्रिषु ।

यपञ्चकम् ।

कालानुसार्य्य शलेये कालीये शिंशपाद्रुमे ॥१३२॥
दुग्धतालीयमित्येत् दुग्धाग्रक्षीरफेणयोः ।
अथ प्रवचनीयञ्च स्यात् प्रवक्तृप्रवाच्ययोः ॥१३३॥
वृषाकपायी श्रीगौरीवरो जीवन्तिकासु च ।

यषट्कम् ।

प्रत्युद्गमनीयमुपस्थेये धौतांशुकद्वये ॥१३४॥
विश्वक्सेनप्रिया लक्ष्मीं वाराह्यामपि योषिति ।

यान्तवर्गः समाप्तः ।

रैककम्।

रः स्मरः पावके तीक्ष्णे राः पुंसि स्वर्णवित्तयोः।
श्रीर्वेशरचनाशोभा भारतीसरलद्रुमे ॥१॥
लक्ष्म्यां त्रिवर्गसम्पत्तिविधोपकरणेषु च।
विभूतौ च मतौ च स्त्री स्रः स्त्रियां निर्झरे स्रवे॥२॥

रद्विकम्।

अरं शीघ्रे च चक्राङ्गे शीघ्रगे पुनरन्यवत्।
अग्रं पुरस्तादुपरि परिमाणे पलस्य च ॥३॥
आलम्बने समूहे च प्रान्ते च स्यान् नपुंसकम्।
अधिके च प्रधाने च प्रथमे चाभिधेयवत् ॥४॥
अस्रः कोणे कचे पुंसि क्लीबमस्रुणि शोणिते।
अस्त्रं प्रहरणे चापे करवाले नपुंसकम् ॥५॥
अभ्रं मेघे च गगने धातुभेदे च काञ्चने।
अद्रिः शैलद्रुमार्के ना अथाङ्घ्रि र्ना पादमूलयोः॥६॥
आरा चर्मप्रभेदिन्यां पुंसि भौमे शनैश्चरे।
आर्द्रा नक्षत्रभेदे स्यात् स्त्रियां क्लिन्नेऽभिधेयवत्॥७॥
आरुः पुंसि तरोर्भेदे तथा कर्कटदंष्ट्रिणोः।
इन्द्रः शक्रादित्यभेदे योगभेदान्तरात्मनि ॥८॥
इन्द्रा फणिज्झके स्त्री स्यादिरा भूवाक्सुराम्बुषु।
उग्रः शूद्रासुते क्षत्राद् रुद्रे पुंसि त्रिषूत्कटे ॥९॥

स्त्री वचात्तुद्रयो स्त्री कर्क्कर्य्या करभे पुमान् ।
उस्रो वृषे च किरणेऽप्युस्राऽर्ज्जुन्युपचित्रयोः ॥१०॥
ऐन्द्रिः काके जयन्ते नाऽथौड्राः पुंभूम्नि नीवृति ।
ओड्रस्तु तरुभेदे स्यात् चरं नीरे चरोऽम्बुदे ॥११॥
करो वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः ।
कद्रुस्त्रिषु स्वर्णपिङ्गे नागाना मातरि स्त्रियाम् ॥१२॥
करो वधे निश्चये च बलौ यत्ने यतावपि ।
तुषारशैलेऽपि पुमान् स्त्रिया दूत्या प्रसेवके ॥१३॥
सुवर्णकारिकायाञ्च बन्धनागारबन्धयोः ।
चारो रसान्तरे धूर्त्ते लवणे काचभस्मनोः ॥१४॥
कारिः स्त्रिया क्रियायां स्याद्वाच्यलिङ्गस्तु शिल्पिनि
कारुर्विश्वकर्म्मणि ना त्रिषु कारकशिल्पिनोः ॥१५॥
चीरं दुग्धे जले कीरः शुके पुंभूम्नि नीवृति ।
कुरुर्नृपान्तरे भक्ते पुमान पुंभूम्नि नीवृति ॥१६॥
क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् ।
क्षुद्रा व्यङ्गानटीकण्टकारिकासरघासु च ॥१७॥
चाङ्गेरी वेश्ययोर्हिंस्रामक्षिकामानयोरपि ।
क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे ॥१८॥
क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत् ।
कृष्णमारव्यातमाभोले पापसाक्तपनादिनोः ॥१९॥

क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः।
क्रोष्ट्री शृगालिकाकृष्णविदारी लाङ्गलीषु च ॥२०॥
क्षौद्रं मधुनि पानीये खरः स्यात् तीक्ष्णघर्म्मयोः।
गर्द्दभे स्त्री देवताड़े खरुर्दर्पे हरे हये ॥२१॥
दन्ते पुंसि त्रिषु श्वेते खुरः कोलदले शफे।
गरी खरायां करणे क्लीबं नोपविषे विषे ॥२२॥
गात्रं गजाग्रजङ्घादिभागेऽप्यङ्गे कलेवरे।
गीः स्त्री भाषासरस्वत्योर्गिरि र्ना नेत्ररुग्भिदि ॥२३॥
अद्रौ गिरियके योषिद् गीर्णौ पूज्ये पुनस्त्रिषु।
गुञ्जः शेजनके स्त्री तु प्रियङ्गौ भद्रमुस्तके ॥२४॥
गुरुस्त्रिलिङ्गयां महति दुर्ज्जरालघुनोरपि।
पुमान् निषेकादिकरे पित्रादौ सुरमन्त्रिणि ॥२५॥
गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके।
गोत्रा भूगव्ययो र्गोत्रः शैले गोत्रं कुलाख्ययोः॥२६॥
सम्भावनीयबोधे च कानने क्षेत्रवर्त्मसु।
गौरः श्वेतेऽरुणे पीते विशुद्धे चाभिधेयवत् ॥२७॥
ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेशरे।
गौरी त्वसञ्जातरजः कन्या शङ्करभार्य्ययोः ॥२८॥
रोचनी रजनी पिङ्गा प्रियङ्गुवसुधासु च।
आपगाया विशेषे च यादसां पतियोषिति ॥२९॥

घस्रस्तु दिवसे हिंस्रे घोरो भीमे हरेऽपि च ।
चरोऽक्षद्यूतभेदे च भौमे चारे त्रसे चले ॥३०॥
चन्द्रः कर्पूरकाम्पिल्लसुधांशुस्वर्णवारिषु ।
चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः ॥३१॥
राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः ।
जलावर्त्तेऽप्यथ चरुः पुमान् हव्यान्नभाण्डयोः ॥३२॥
चारः पियालवृक्षे स्याद् गतौ बन्धापसर्पयोः ।
चारु बृहस्पतौ पुंसि शोभने त्वभिधेयवत् ॥३३॥
चित्राऽऽखुपर्णी गोडुम्बा सुभद्रादन्तिकासु च ।
मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम् ॥३४॥
तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि ।
तद्युक्तयोस्त्वन्यलिङ्गं चीरी झिल्ल्यां नपुंसकम् ॥३५॥
गोस्तने वस्त्रभेदे च रेखालिखनभेदयोः ।
चुक्रः शुक्ले चाङ्गेर्यां स्त्री पुंस्यम्लेऽम्लवेतसे ॥३६॥
चैत्रः स्मृतदेवकुले ना भूभृन्मासभेदयोः ।
चौरः पाटच्चरेऽपिस्यात् चौरपुष्पौषधावपि ॥३७॥
छत्रा मिसावतिच्छत्रे कुस्तुम्बुरुशिलीन्ध्रयोः ।
नपुंसकस्त्वातपत्रे छिद्रं दूषणरन्ध्रयोः ॥३८॥
१ जारी स्यादोषधीभेदे स्त्रियामुपपतौ पुमान् ।
जोरस्तु जरणे खड्गे टारो नरतुरङ्गयोः ॥३९॥

तरस्तु तरणे पुंसि श्मशानौ पेटके तरी।
तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे ॥४०
प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे।
श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके ॥४१॥
इति कर्त्तव्यतायाञ्च तन्त्री वीणागुणे मता।
अमृतादेश्शिरयोस्तन्द्री निद्राप्रमीलयोः ॥४२॥
तारो वानरभिन्मुक्ताविशुद्धोः शुद्धमौक्तिके।
ना नक्षत्रेऽक्षिमध्ये च न ना रूप्ये नपुंसकम् ॥४३
स्त्री बुद्धदेवताभेदे वालिगोष्पतिभार्ययोः।
त्रिलिङ्गोऽत्युच्चशब्दे च तान्त्रं शृत्वेऽरुणेऽपि च।
तीव्रातु कटुरोहिण्यां राजिकागण्डदूर्व्वयोः।
त्रिष्वत्युष्णे नितान्ते च कटौ तीरन्तु रोधसि ॥४५॥
पुंसि त्रपुणि तोत्रन्तु प्राजने वेणुकेऽपि च।
दरोऽस्त्री साध्वसे गर्त्ते कन्दरेतु दरी मता ॥४६॥
दराऽव्ययं मनागर्थे दस्रः खरेऽश्विनीसुते।
दारुः स्यात् पित्तले काष्ठे देवदारौ नपुंसकम् ॥४
द्वारं निर्गमनेऽपि स्यादभ्युपाये धरो गिरौ।
कार्पासतूलके कूर्म्मराजे वसन्तगेऽपि च ॥४८॥
धरा विश्वम्भरायाञ्च स्त्री गर्भाशयमेदसोः।
धात्री जनन्यामलकीवसुमत्युपमातृषु ॥४९॥

धारा सैन्याग्रिमस्कन्धे तुरङ्गगतिपञ्चके।
घटादिच्छिद्रसन्तत्योः प्रपाते स्याद् द्रवस्य च ॥५०॥
खड्गादे र्निशितमुखे धारो ग्रावान्तरेऽप्यृणे।
धीरो धैर्य्यान्विते स्वैरे बुधे क्लीवन्तु कुङ्कुमे ॥५१॥
स्त्रियां श्रवणतुल्यायां नरोऽजे मनुजेऽर्ज्जुने।
क्लीवन्तु रामकर्पूरे नक्रं स्यादग्रदारुणि ॥५२॥
नासायां पुंसि कुम्भीरे नारस्तर्णकनीरयोः।
नीव्रं नेमौ वलीकेन्द्वोः रेवतीभेऽपि कानने ॥५३॥
नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च।
रथे चक्षुषि नद्याञ्च नेत्री नाड्याञ्च योषिति ॥५४॥
परः श्रेष्ठारिदूरान्योत्तरे क्लीवन्तु केवले।
पत्रन्तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोः ॥५५॥
पार परतटे प्रान्ते न स्त्री पारा नदीभिदि।
पारी पूरे च कर्क्कर्य्यां पादरज्जौ च दन्तिनः ॥५६॥
पात्रं स्रुवादौ पर्णे च भाजने राजमन्त्रिणि।
तीरद्वयान्तरे योग्ये पुरुः प्राज्येऽभिधेयवत् ॥५७॥
पुंसि स्याद् देवलोके च नृपभेदपरागयोः।
पुरं नपुंसकं गेहे देहपाटलिपुत्रयोः ॥५८॥
पुष्यादीनां दलावृत्तौ ना गुग्गुलौ न ना पुरि।
पुण्ड्रो दैत्यविशेषेक्षु भेदयोरतिमुक्तके ॥५९॥

चित्रे कूर्मे पुण्डरीके पुंभूम्नि नीवृदन्तरे ।
पूरो जलसमूहे स्याद् व्रणसंशुद्धिखाद्ययोः ॥६०॥
पोत्रं वज्रे मुखाग्रे च शूकरस्य हलस्य च ।
पौरं त्रिषु पुरोद्भूते कत्तृणे तु नपुंसकम् ॥६१॥
वरो जामातरि वृतौ देवतादेरभीप्सिते ।
षिड्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम् ॥६२॥
वरी प्रोक्ता शतावर्य्यां वरा च स्यात् फलत्रिके ।
मनागिष्टे वरं क्लीबे केचिदाहुस्तदव्ययम् ॥६३॥
बभ्रु वैश्वानरे शूलपाणौ च गरुडध्वजे ।
विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत् ॥६४॥
वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकम् ।
त्रिषु क्रूरे च कुटिले वारः सूर्य्यादिवासरे ॥६५॥
द्वारे हरे कुब्जवृक्षे वृन्दावसरयोः क्षणे ।
वारी स्याद् गजबन्धन्यां कलस्यामपि योषिति ॥६६॥
वारि वाग्गजबन्धन्योः स्त्री क्लीबेऽम्बुनि बालके ।
वीरो रसविशेषे पुंस्युत्तरे सुभटे त्रिषु ॥६७॥
स्त्री सुराचोरकाकोलीतामलक्येलवालुके ।
पतिपुत्रवतीरम्भागम्भारीदुग्धिकासु च ॥६८॥
मल्लपूर्वीरविदार्य्योः क्लीबं शृङ्गाटे नलेऽपि च ।
भरुः स्वर्णे हरे पुंसि भरोऽतिशयभारयोः ॥६९॥

भद्रः शिवे खञ्जरीटे वृषभे च कदम्बके ।
करिजातिविशेषे ना क्लीवं मङ्गलमुस्तयोः ॥७०॥
काञ्चने च स्त्रियां रास्नाकृष्णाव्योमनदीषु च ।
तिथिभेदे प्रसारिण्यां कटफलानन्तयोरपि ॥७१॥
त्रिषु श्रेष्ठे च साधौ स्यात् नपुंसि करणान्तरे ।
भारः स्याद् वीवधे विष्णौ पलानां द्विसहस्रके ॥७२॥
भीरुरार्त्ते त्रिलिङ्गः स्याद् वरयोषिति योषिति ।
भूरि र्ना वासुदेवे च हरे च परमेष्ठिनि ॥७३॥
नपुंसकं सुवर्णे च प्राज्ये स्याद् वाच्यलिङ्गकः ।
मन्त्रो वेदविशेषे स्याद् देवादीनाञ्च साधने ॥७४॥
गुह्यवादेऽपि च पुमान् मरु र्ना गिरिधन्वनोः ।
मात्रा कर्णविभूषायां वित्ते माने परिच्छदे ॥७५॥
अक्षरावयवे स्वल्पे क्लीवं कार्त्स्न्येऽवधारणे ।
मारो मृत्यौ स्मरे विघ्ने मारी चण्ड्यां जनक्षये ॥७६॥
मारिः स्त्री मारणे वर्षे मित्र सुहृदि न द्वयोः ।
सूर्य्ये पुंसि सुरा गन्धद्रव्ये दैत्यान्तरे पुमान् ॥७७॥
यात्रा तु यापनेऽपि स्याद् गमनोत्सवयोः स्त्रियाम् ।
रन्ध्रन्तु दूषणे छिद्रे राष्ट्रं स्यादुपवर्त्तने ॥७८॥
उपद्रवे क्लीवपुंसोः रुरु र्ना मृगदैत्ययोः ।
रेत्रं रेतसि पीयूषे पटवासे च सूतके ॥७९॥

रोध्रो ना सावरे क्लीवमपराधे च किल्विषे ।
रौद्रो घर्म्मे रसे चण्ड्यां स्त्री तीव्रे भीषणे त्रिषु ॥८
वज्रं स्याद् बालके धात्र्यां क्लीवं योगान्तरे पुमान् ।
वज्रा स्नुह्यां गुडूच्याञ्च वज्री स्नुह्यन्तरे स्मृता ॥८१।
दम्भोलौ हीरकेऽप्यस्त्री वध्रं त्रिपुवरत्रयोः ।
वप्र स्ताते पुमानस्त्री रेणौ क्षेत्रे चये तटे ॥८२॥
वक्रं मुखे वृत्तभेदे व्यग्रो व्यासक्त आकुले ।
वास्रो ना दिवसे क्लीवं मन्दिरे च चतुष्पथे ॥८३॥
व्याघ्रः स्यात् पुंसि शार्दूले रक्तैरण्डकरञ्जयोः ।
श्रेष्ठे नराद्युत्तरस्थः कण्टकार्य्यान्तु योषिति ॥८४॥
वृत्रो रिपौ घने ध्वान्ते शैलभेदे च दानवे ।
वेरं कलेवरे क्लीवं वार्त्ताकौ कुङ्कुमेऽपि च ॥८५॥
वोड्री स्त्री पणपादे ना गोनसाहेरपान्तरे ।
शर स्तेजनके वाणे दध्यग्रे ना शरं जले ॥८६॥
शस्त्रं लोहास्त्रयोः क्लीवं क्षुरिकायान्तु योषिति ।
शक्रः पुमान् देवराजे कुटजार्ज्जुनभूरुहोः ॥८७॥
शद्रि र्नाऽम्भोधरे जिष्णौ शरु र्ना कोपवज्रयोः ।
शारि र्नाऽक्षोपकरणे स्त्रियां शकुनिकान्तरे ॥८८॥
युद्धार्थगजपर्य्याणे व्यवहारान्तरेऽपि च ।
शारः स्यात् शबले वाच्यलिङ्गः पुंसि समीरणे ॥८९॥

अत्रोपकरणे शास्त्रं न द्वयोरागमाश्रयोः।
शिग्रु ना शाकमात्रे च शोभाञ्जनमहीरुहे ॥८०॥
शिरो ना पिप्पलीमूले स्याद् धमन्यां च योषिति।
शीघ्रं नलदे चक्राङ्गे क्लीवं द्रुतगतौ त्रिषु ॥८१॥
शुभ्रं स्यादभ्रके क्लीवमुद्दीप्तशुक्लयोस्त्रिषु।
शुक्रः स्याद् भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् ॥८२॥
रेतोऽक्षिरुग्भिदोः क्लीवं शूरः स्याद् यादवे भटे।
स्वरुः पुंसि यूपखण्डे भेदुरेऽप्यधरे शरे ॥८३॥
सत्र यज्ञे सदादानाच्छादनारण्यकैतवे।
स्वरोदध्ययगत्यो र्ना स्वरो नासासमीरणे ॥८४॥
उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमान्।
सारो बले स्थिरांशे च मज्ज्ञि पुंसि जले धने ॥८५॥
न्याय्ये क्लीवं त्रिषु वरे सान्द्रं वने घने मृदौ।
स्फारः स्यात् पुंसि विकटे कनकादेश्च वुद्बुदे ॥८६॥
सिप्रो निदाघसलिले सिप्रा तु सरिदन्तरे।
स्थिरा भूशालपर्ण्यो र्ना शनौ मोक्षेऽचले त्रिषु ॥८७॥
सीरोऽर्कहलयोः पुंसि सुरा चषकमद्ययोः।
पुलिङ्ग लिङ्गिवेशे स्यात् सूत्रं तन्तुव्यवस्थयोः ॥८८॥
शास्त्रादिसूत्रणाग्रन्थे स्वैरः स्वच्छन्दमन्दयोः।
हरिश्चन्द्रार्कवातारवशुकभेकयमादिषु ॥८९॥

कपौ सिंहे हरेऽजेऽंशौ शक्रे लोकान्तरे पुमान्।
वाच्यवत् पिङ्गहरितो हारो मुक्तावलौ युधि ॥१००॥
हारिः पथिकसन्तानद्यूतादिभङ्गयोः स्त्रियाम्।
हिंसा लेलावलीमांसोः स्त्रिया स्याद् धातुकेऽन्यवत् ॥
हीरा तैलाम्बुकालन्मेराः पुंसि शङ्करवज्रयोः।
होरा लग्नेऽपि राश्यर्द्धे रेखाशास्त्रभिदोरपि ॥१०२॥

रत्रिकम्।

अमरस्त्रिदशेऽप्यस्थिसंहारे कुलिशद्रुमे।
स्त्री गुडुच्यमरावत्योः स्थूणादूर्व्वाजरायुषु ॥१०३॥
अपरं गजपश्चार्द्धे स्याज्जरायौ तु योषिति।
इतरस्मिन्नपि तथाऽर्व्वाचीनेऽप्यन्यलिङ्गकम् ॥१०४॥
अधरस्तु पुमानोष्ठे हीनेऽनूर्द्धे तु वाच्यवत्।
अध्वरः सावधाने स्याद् वसुभेदे क्रतौ पुमान्॥१०५॥
अन्तरमवकाशावधि परिधानान्तर्द्धिभेदतादर्थ्ये।
छिद्रात्मीयविनावहिरवसरमध्यात्मसदृशेषु ॥१०६॥
अवरं गजान्त्यजङ्घादिदेशे चरमे त्रिषु।
अम्बरं नद्योर्व्योम्नि सुगन्ध्यन्तरवस्त्रयोः ॥१०७॥
अङ्गारमुल्मुके न स्त्री पुंलिङ्गस्तु महीसुते।
अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि॥१०८॥

अजिर प्राङ्गणे वाते विषये दर्दुरे तनौ।
स्त्री चण्डग्रामचर मत्स्यवर्णयोः पुंसि शङ्करे ॥१०९॥
अशिरो वीतिहोत्रे स्याद् राक्षसे भास्करे पुमान्।
अण्डीरः पुरुषे शक्तेऽरर कदकपाटयोः ॥११०॥
अवीराऽपतिपुत्राया स्त्री सत्त्वग्‌चिते त्रिषु।
अगुरुश्लीवजोङ्कशिंशपयो र्वाच्यवल्लघुनि॥१११॥
असुरा रजनीराश्योरसुरो देवारिभास्करयोः।
आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते ॥११२॥
आधारश्चाधिकरणेऽप्यालवालेऽम्बुधारणे।
आसार स्यात प्रसरणे वेगवृष्टौ सुहृद्बले ॥११३॥
आहार. स्यादाहरणे भोजने च पुमानयम्।
आशरस्तु पुमान् वैश्वानरे च रजनीचरे ॥११४॥
आकार इङ्गिताकृत्योरितरोऽन्यत्र पामरे।
इत्वर्थ्यसत्या पथिके क्रूरकर्म्मणि च त्रिषु ॥११५॥
ईश्वरो मन्मथे शम्भौ नाऽऽढ्ये स्वामिनि वाच्यवत।
ईश्वरी चेश्वरीमायायामुदर जठरे युधि ॥११६॥
उदारो दातृमहतो र्दक्षिणे चाभिधेयवत।
उर्व्वरा सर्व्वशस्याढ्यभूमौ स्याद् भूमिमात्रके॥११७॥
उत्तरा दिग्विशेषे च स्नुषायामर्ज्जुनस्य च।
विराटस्य सुते ना स्यादूर्द्ध्वोदीच्योत्तमे त्रिषु ॥११८॥

नपुंसकं प्रतिवाक्येऽयोद्गार श्चोद्गूतावृणे।
च्चत्तरं वारिधारायान्तरस्त्रलिजि स्मृतः ॥११९॥
एकाग्रमन्यलिङ्गं स्यादेकताने‌ऽप्यनाकुले।
श्चौशीरं शयनासनचामरदण्डेऽप्युशीरजेप्रोक्तम्॥१२०
ककरः करीरवृचे दीने क्रकचे च पचिभेदे च।
कदरः श्वेतखदिरे क्रकचव्याधिभेदयोः॥१२१॥
कर्व्बुरं सलिले हेम्नि कर्व्बुरः पापरचसोः।
कर्व्बुरा कृष्णवृन्तायां शवले पुनरन्यवत्॥१२२॥
कर्परः स्यात् कपाले च शस्त्रभेदकटाहयोः।
कन्धरो वारिवाहे स्याद् ग्रीवायां कन्धरा मता॥१२३॥
कर्व्वरः कथितो व्याघ्रे शिवायामपि कर्व्वरी।
कञ्जरो जठरे सूर्य्ये विरिञ्चौ वारणे मुनौ॥१२४॥
करीरो वंशाङ्कुरेऽस्त्री वृचभिद् घटयोः पुमान्।
करीरी चीरिकायाञ्च दन्तमूले च दन्तिनाम्॥१२५॥
कटित्रं रसनायाञ्च चर्म्माङ्गे कटिवाससि।
कच्छुरा शूकशिम्ब्याञ्च शटीदुष्पर्शयोरपि॥१२६॥
कच्छुरः पुंश्चले कच्छुयुक्ते च कवरी पुनः।
पृथ्वीतुङ्गीः केशवेशे कवरं लवणाम्लयोः॥१२७॥
कर्व्वुमायां ना रचःपापयो र्भेषजान्तरे।
कर्म्मारो जातिभेदे च त्वचिसारे च

कणेरुः कर्णिकारे च करिणीवेश्ययोः स्त्रियाम् ।
कत्त्वरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकम् ॥१२९॥
कर्करी भाण्डभेदे ना दर्पणे कठिने त्रिषु ।
कड़ारः पिङ्गले दासे कलत्रं श्रोणिभार्ययोः ॥१३०॥
दुर्गस्थाने नृपादीनां कटप्रूः पुंसि राक्षसे ।
विद्याधरे महादेवे तथा स्याद्‌द्यूतदेवते ॥१३१॥
कन्दर स्त्वङ्कुशे पुंसि गुहायां नपुंसकम् ।
कर्बूरः स्यात् पुमान् शट्यां सुवर्णे तु नपुंसकम् ॥१३२॥
काश्मीरं कुङ्कुमे ऽपिस्यात् टङ्कपुष्करमूलयोः ।
कावेरी स्यात् सरिद्भेदे पण्यनारी हरिद्रयो ॥१३३॥
कान्तारोऽस्त्री महारण्ये बिले दुर्गमवर्त्मनि ।
पुंसि स्यादिक्षुभेदेऽथ किशोरो ऽश्वस्य शावके ॥१३४॥
तैलपर्ण्यौषधौ च स्यात् तरुणावस्थसूर्ययोः ।
किर्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे ॥१३५॥
किंशारु र्ना शस्यशूके विशिखे कङ्कपक्षिणि ।
कुहर गह्वरे छिद्रे क्लीव नागान्तरे पुमान् ॥१३६॥
कुकुरः सारमेये ना ग्रन्थिपर्णे नपुंसकम् ।
कुर्परःस्यात्कफोणौ च जानुन्यपि च पुंस्ययम् ॥१३७॥
कुञ्जरोऽनेकपे केशे स्त्री धातक्याञ्च पाटलौ ।
कुमारः स्यात् शुके स्कन्दे युवराजेऽश्वचारके ॥१३८॥

वालके वरुणद्रौ ना न द्वयो र्जात्यकाञ्चने।
कुमारी शैलतनया नवमाल्यो र्नदीभिदि ॥१३९॥
सहाऽपराजिता कन्या जम्बूद्वीपेपु च स्त्रियाम्।
कुठारु र्ना द्रुमे कीशे कुट्टारं केवले रते ॥१४०॥
कुवेरः स्यात् पुंसि नन्दीवृत्ते पुण्यजनेश्वरे।
कूवरस्त्रिपु चारौ ना कुजके स्त्री युगन्धरे ॥१४१॥
केशरं हिङ्गुले क्लीवं किञ्जल्के न स्त्रियां पुमान्।
सिंहसटायां पुन्नागे वकुले नागकेशरे ॥१४२॥
केदारोऽद्रौ शिवे चेत्रे भूमिभेदालवालयोः।
केनारः कुम्भिनरके शिरः कपोलसन्धिपु ॥१४३॥
कोटिरः पुंसि नकुले शक्रगोपकशक्रयोः।
कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके ॥१४४॥
खपरः कामुके भद्रमुस्तके कलसेऽपि च।
खपर स्तस्करे धूर्त्ते भिक्षाभाण्डकपालयोः ॥१४५॥
खर्ज्जूरं रूप्यखलयो र्वृश्चिके ना द्रुमे द्वयोः।
खदिरी शाकभेदे स्त्री ना चन्द्रे दन्तधावने ॥१४६॥
खण्डाभ्रमभ्रलेशे स्यात् तथा दन्ताहतान्तरे।
खिङ्खिरस्तु शिवाभेदे खट्वाङ्गे वारिवालके ॥१४७॥
गणेरुः कर्णिकाराद्रौ करिणी वेश्ययोः स्त्रियाम्।
गर्गरो मीनभेदे स्त्री मन्यन्यामय गङ्गरम् ॥१४८॥

गुहागह्वरनद्भेषु निकुञ्जे तु पुमानयम्।
गान्धारः पुंसि सिन्दूरे रागदेशप्रभेदयोः ॥१४९॥
गायत्री त्रिपदादेवीच्छन्दोभिन् खदिरेषु च।
गोपुरं द्वारि पूर्द्वारि कैवर्त्तीमुस्तकेऽपि च ॥१५०॥
घर्घरो ना चलद्वारि ध्वानोलूक नदान्तरे।
स्त्री क्षुद्रघण्ट्यां वीणाया भेदे स्वरान्तरे त्रिषु ॥१५१॥
चमरं चामरे स्त्री तु मञ्जरी मृगभेदयो।
चन्दिरोऽनेकपे चन्द्रे चत्वरं स्थण्डिलेऽङ्गने ॥१५२॥
चङ्कुरः स्याद्रथे वृक्षे चातुरो नेत्रगोचरे।
चाटुकारि नियन्तोश्च त्रिषु दाक्ष्ये तु चातुरी ॥१५३॥
चक्रगण्डौ च पुंसि स्याच्च चामरं चमराऽपि च।
दण्डे च बालव्यजने चिकुर स्तरलागासौः ॥१५४॥
पक्षिवृक्षभिदोः केशे गृहवभ्रौ सरीसृपे।
छिदिरः पावके रज्जौ करवाले परश्वधे॥१५५॥
छिदुरश्छेदनद्रव्ये धूर्त्ते वैरिणि च त्रिषु।
जठरो न स्त्रियां कुक्षौ वृद्धकर्कटयोस्त्रिषु ॥१५६॥
जर्ज्जरः शैवले शक्रध्वजे त्रिषु जरातुरे।
जम्बीरः प्रस्थपुष्पे स्यात् तथा दन्तशठद्रुमे ॥१५७॥
जलेन्द्रः पुंसि वरुणे जम्भले च महोदधौ।
झर्झरः स्यात् कलियुगे वाद्यभाण्डे नदान्तरे ॥१५८॥

झर्झरी झर्झरो च द्वे ऊडुके वालचक्रके।
टट्टरी स्यान्मृषावादे लम्पापटहवाद्ययोः॥१५९॥
टङ्कारो विस्मये पुंसि प्रसिद्धौ शिञ्जिनीध्वनौ।
टगरष्टङ्कणक्षारे हेलाविभ्रमगोचरे॥१६०॥
नाऽन्यवत् केकराक्षे स्याद् डिङ्गरो डङ्गरेऽपि च।
क्षेपे तमिस्रं तिमिरे कोपे स्त्री तु तमस्ततौ॥१६१॥
कृष्णपक्षनिशायाञ्च त्वक्पत्रन्तु वराङ्गके।
स्त्री कारव्याञ्च तिमिरं ध्वान्ते नेत्रामयान्तरे॥१६२॥
तीवरो नाम्बुधौ व्याधे तुम्बुरी कुक्कुरस्त्रियाम्।
धन्याकेऽपि तुषारस्तु शीतले शीकरे हिमे॥१६३॥
तुवरस्तु कषाये स्यात् काञ्च्याढक्योस्तु वर्य्यपि।
तूवरो,श्मश्रुपुरुषेऽप्रौढशृङ्गगवेऽपि च॥१६४॥
पुरुषव्यञ्जनत्यक्ते स्यात् कषायरसेऽपि च।
दहरी भ्रातरि स्वल्पे भूषिकायाञ्च वालके॥१६५॥
दन्तुरस्त्वन्नतरदे तथोन्नतानते त्रिषु।
दर्द्दरः पर्व्वते पुंसि त्रिष्वीषद् भग्नभाजने॥१६६॥
दर्दुर स्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः।
दर्दुराचण्डिकायां स्याद् ग्रामजालेनपुंसकम्॥१६७॥
दण्डारो वहने मत्तवारणे शरयन्त्रके।
कुम्भकारस्य चक्रे च द्वापरः संशये युगे॥१६८॥

दासेरो दासिकापत्ये त्रिषु पुंसि क्रमेलके।
दुर्द्दरः पुंसि नरकान्तरे स्यादपभौपधे ॥१६९॥
दैत्यारिः पुंसि सामान्यदेवे च गरुड़ध्वजे।
धूसरी किन्नरीभेदे ना खरे त्रिषु पाण्डुरे ॥१७०॥
नरेन्द्रस्तु महीपाले विषवैद्ये च पुंस्ययम्।
नर्म्मरा तु दरीभस्त्रा सरला निष्कलासु च ॥१७१॥
नागरं मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे।
निकरो निवहे सारे न्यायदेयधने निधौ ॥१७२॥
निर्ज्जरः स्यात् पुमान् देवे जरात्यक्ते तु वाच्यवत्।
निर्जरा तु गुडुच्याञ्च तालपर्ण्यामपि स्त्रियाम् ॥१७३॥
निर्झरस्तु सहस्रांशुतुरङ्गे तुषपावके।
निकारस्यात् परिभवे धान्यस्योत्क्षेपणेऽपि च ॥१७४॥
निर्द्दरं निर्भरे सारेऽन्यवत्तु कठिनेऽत्रपे।
स्यान्नीवरो वाणिजके वास्तव्ये च पुमानयम्॥१७५॥
प्रवरं सन्ततौ गोत्रे क्लीव श्रेष्ठे तु वाच्यवत्।
प्रखरं हयसन्नाहे कुकुरेऽश्वतरेऽपि च ॥१७६॥
पुंसि त्रिष्वत्यन्तखरे पवित्रं वर्षणे कुशे।
ताम्रे पयसि च क्लीवं मेध्ये स्यादभिधेयवत् ॥१७७।
प्रदरो रोगभेदे स्याद् विदारे शरभङ्गयोः।
प्रकरः स्यात् पुमान् सङ्घे विकीर्णकुसुमादिषु ॥१७८॥

मकरो यादसोभेदे निधिराशिप्रभेदयोः।
मयूरो वर्हिचूडायामपामार्गे शिखण्डिनि ॥१९९॥
महेन्द्रः पर्व्वते शक्रे मधुद्रोऽलौ च कामुके।
मन्दुरा वाजिशालायां शयनीयार्थवस्तुनि ॥२००॥
मसूरामसुरा वा ना वेश्याव्रीहिप्रभेदयोः।
मसूरी पापरोगे स्यादुपधाने पुनः पुमान् ॥२०१॥
मर्म्मरो वस्त्रपर्णादि स्वने स्त्री पीतदारुणि।
मञ्जरी तिलकद्रुमुक्तयो र्व्वमरौ द्वयोः ॥२०२॥
मकुरः स्यात् मुकुरवद् दर्पणे वकुलद्रुमे।
कुलालदण्डे माठरो व्यासेऽर्कपारिपार्श्विके ॥२०३॥
मार्ज्जार श्चौतौ खट्टाशे मिहिरः सूर्य्यवृद्धयोः।
मुद्गरः कलिकाभेदे पुंसि लोष्ट्रादिभेदने ॥२०४॥
मुदिरः कामुके मेघे मुखिरः काममूर्खयोः।
मुर्म्मुरः तुषवह्नौ स्यात् मन्मथे रविवाजिनि ॥२०५॥
मृगारिः स्यात् पुंसि कण्ठीरशार्दूलयोरपि।
रुधिरोऽङ्गारके पुंसि क्लीवन्तु कुङ्कुमास्रजोः ॥२०६॥
वदरा सृष्टिकार्पास्यो रैलापर्ण्यां स्त्रियां पुमान्।
कार्पासस्यास्थ्नि वदरी कोलौ क्लीवन्तु तत् फले ॥२०७॥
वर्करः कुक्कुरे वस्ते पशौ च वर्ब्बरः पुमान्।
किनिही हस्तिपिप्पल्योः क्लीवेऽश्विलवणे स्मृतः ॥२०८॥

वर्व्वरः पामरे केशे चक्रले नीवृदन्तरे ।
फञ्जिकायां पुमान् शाकभेदेपुष्पभिदोः स्त्रियाम्॥२०९॥
वर्करः परिहासे स्यात् छागे युवपशावपि ।
वल्लुरं स्याद् वनक्षेत्रे गहनोषरयोरपि ॥२१०॥
वल्लुरा त्रिषु संशुष्कमांसशूकरमांसयोः ।
वार्ईरं कृष्णलावीजदक्षिणावर्त्तशङ्खयोः ॥२११॥
नीरे च काकचिञ्चायां भारत्याञ्च नपुंसकम् ।
वागरस्तु गतातङ्के मुमुक्षौ वानवेष्टके ॥२१२॥
विशारदे विषाणेऽपि निर्णये वारकेऽपि च ।
वासरस्तु पुमान् नागविशेषे दिवसेऽस्त्रियाम्॥२१३॥
वासुरा वासितायां स्याद् वासतेयभुवि स्त्रियाम् ।
विष्टरः कुशमुष्टौ स्यादासने च महीरुहे ॥२१४॥
विस्तरो वाक्प्रपञ्चे स्याद् विस्तारे प्रणयेऽपि च ।
विदुरो नागरे धीरे कौरवाणाञ्च मन्त्रिणि ॥२१५॥
विधुरं स्यात् प्रविश्लेषे न द्वयो र्विकले त्रिषु ।
रसालायां स्त्री विदारी जलोच्छ्वासाजिदारणे ॥२१६॥
विदारी शालपर्ण्याञ्च रोगभेदेसुगन्धयोः ।
विवरं दूषणे गर्त्ते विसरः प्रसरे व्रजे ॥२१७॥
विस्तारो विस्तृतौ स्तम्बे विकारो विकृतौ रुजि ।
विहारो भ्रमणे स्कन्धे लीलायां सुगतालये ॥२१८॥

शवरो म्लेच्छभेदे च पानीये शङ्करेऽपि च।
शम्बरं सलिले पुंसि मृगदैत्यविशेषयोः ॥२१९॥
शम्बरी चाखुपर्ण्यां स्यात् शर्व्वरी यामिनीस्त्रियोः।
शर्करा खण्डविकृतावुपलाकर्परांशयोः ॥२२०॥
शर्करान्वितदेशेऽपि रुग्भेदे सकलेऽपि च।
शर्करी छन्दसोभेदे नदी मेखलयोरपि ॥२२१॥
शरीरं शोणमध्यस्थपुलिने दर्दरीतटे।
श्वशुरः पूज्ये स्त्री मात्मायां शारीरं देहजे वृषे ॥२२२॥
शार्करः स्याद् दुग्धफेनशर्करान्वितदेशयोः।
शाङ्करस्तु बलीवर्द्दे छन्दोभेदे नपुंसकम् ॥२२३॥
शार्व्वरन्त्वन्धतमसे घातुके भेद्यलिङ्गकम्।
शालारं स्याद् हस्तिनखे सोपाने पक्षिपञ्जरे ॥२२४॥
शावरी शूकशिम्ब्यां स्यात् पुंसि पापापराधयोः।
लोध्रे च शाङ्करिः पुंसि कार्त्तिकेये गणाधिपे ॥२२५॥
शिखरोऽस्त्री द्रुमाग्रेऽद्रिशृङ्गे पुलककक्षयोः।
पक्वदाडिमवीजाभमाणिक्यसकलाग्रयोः ॥२२६॥
शिशिरो ना हिमे नस्त्री षट्‌तुभेदे जडे त्रिषु।
शिलीन्ध्र कन्दलीपुष्पे करके ना झसान्तरे ॥२२७॥
द्रुभेदे स्त्री तु विहगीभेदे गण्डूपदीमृदोः।
शीकरं शरले वातहृताम्बुकणयोः पुमान् ॥२२८॥

शुषिरं वंश्यादिवाद्ये विवरे च नपुंसकम्।
मूषिके ना स्त्रियां नल्यौषधौ रन्ध्रान्विते त्रिषु ॥२२९॥
शृङ्गारः सुरते नाट्यरसे च गजमण्डने।
नपुंसकं लवङ्गेऽपि नागसम्भवचूर्णयोः ॥२३०॥
सम्बरो दैत्यहरिणमत्स्यशैलजिनान्तरे।
नपुंसकन्तु सलिलबौद्धव्रतविशेषयोः ॥२३१॥
सङ्कारोऽग्निचटत्कारे सम्मार्ज्जन्यवपुञ्जिते।
नवदूषितकन्यायां सङ्कारी पुनरुच्यते ॥२३२॥
संस्कारः प्रतियत्नेऽनुभवे मानसकर्म्मणि।
संस्तरः प्रस्तरे यज्ञे सङ्गरो युधि चापदि ॥२३३॥
क्रियाकारे विषे चाङ्गीकारे क्लीवं शमीफले।
सम्भारः सम्भृतौ सङ्घे सामुद्रं देहलक्षणे ॥२३४॥
समुद्रजेऽन्यलिङ्गोऽथ सावित्रः शङ्करे वसौ।
सावित्री सत्यवत्पत्न्यां ब्रह्मपत्न्युमयोरपि ॥२३५॥
सिन्दूरः तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके।
सिन्दूरी रोचनारक्तचेलिकाधातकीषु च ॥२३६॥
सुनारस्तु शुनीस्तन्ये सर्पाण्डकलविङ्कयोः।
सुन्दरी तरुभिन्नारीभिदोः स्त्री रुचिरेऽन्यवत् ॥२३७॥
सैरिन्ध्री परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम्।
वर्णसङ्करसम्भूतस्त्रीमहल्लिकयोरपि ॥२३८॥

सौवीरं काञ्जिके स्रोतोऽञ्जने बदरीफले।
ना तु नीवृति हारिद्रं हरिद्रा रञ्जिते त्रिषु ॥२३९॥
ना नीपवृक्षे हिण्डीरः फेणवार्त्ताकुपुरुषे।

रचतुष्कम्।

अरुष्करो व्रणकृति त्रिषु भल्लातके पुमान् ॥२४०॥
भवेदभिमरो युद्धे बधे स्वबलसाध्वसे।
अनुत्तरं त्रिषु श्रेष्ठे प्रतिजल्पविवर्ज्जिते ॥२४१॥
अलङ्कारस्तु हारादावुपमादावलङ्कृतौ।
अवहारः पुमान् चौरे द्यूतयुद्धादिविश्रमे ॥२४२॥
निमन्त्रणोपनेतव्यद्रव्ये ग्राहाह्वयादसि।
अवतारोऽवतरणे पुष्करिण्यादितीर्थयोः ॥२४३॥
अवस्कारोऽपि वर्च्चस्के गुह्योऽथावसरः पुमान।
प्रस्तावे मन्त्रभेदे च वर्षणे चापि कीर्त्तितः ॥२४४॥
उपलादावकूपारः कूर्म्मराजे महोदधौ।
असिपत्रः खड्गकोषे पुमानिक्षौ च नारके ॥२४५॥
भवेदश्वतरो वेगसरे नागान्तरेऽपि च।
अभिहारोऽभियोगे च चौर्य्ये सन्नहनेऽपि च ॥२४६॥
अग्निहोत्रोऽग्निहविषोरर्द्धचन्द्रो नखक्षते।
गलहस्ते बाणभेदे कृष्णत्रिवृति तु स्त्रियाम् ॥२४७॥

आडम्बरस्तूर्य्यपक्ष्मसंरम्भेगजगर्ज्जिते ।
आत्मवीरः प्राणवति श्यालके च विदूषके ॥२४८॥
इन्दीवरं कुवलये शतावर्य्यान्तु योषिति ।
उदुम्बरस्तु देहल्यां वृक्षभेदे च षण्डके ॥२४९॥
कुष्ठभेदेऽपि च पुमान् ताम्रे तु स्यात् नपुंसकम् ।
उपह्वरं समीपे स्यादेकान्ते च नपुंसकम् ॥२५०॥
उदन्तुरः स्त्रियपूत्तुङ्गे करालोत्कटदण्डयोः ।
उपकारस्त्वोपकृतौ विकीर्णकुसुमादिषु ॥२५१॥
औदुम्बरः श्राद्धदेवे रोगभेदे नपुंसकम् ।
अथ कर्म्मकरो भृत्ये वेतनाजीविनि त्रिषु ॥२५२॥
कीनाशो पुंसि मूर्व्वायां बिम्बिकायामपि स्त्रियाम् ।
कलिकारस्तु घूम्याटे करञ्जे पीतमस्तके ॥२५३॥
कर्णिकारः पुमानारग्वधद्रौ च द्रुमोत्पले ।
कर्णपूरः शिरीषे स्यात् नीलोत्पलावतंसयोः ॥२५४॥
करवीरः कृपाणे स्याद् दैत्यभेदाश्वमारयोः ।
करवीर्य्यदितिश्रेष्ठगवीपुत्रवतीषु च ॥२५५॥
कटम्भरा प्रसारण्यां रोहिण्यां गजयोषिति ।
कनविद्धायां गोलायां वर्षाभूमूर्व्वयोरपि ॥२५६॥
कादम्बरस्तु दध्यग्रे मद्यभेदे नपुंसकम् ।
स्त्री वारुणीपरभृता भारतीशारिकासु च ॥२५७॥

कालञ्जरो योगिचक्रमेलके भैरवे गिरौ।
कुम्भकारी कुलत्थ्याञ्च पुंलिङ्गो घटकारके ॥२५८॥
कृष्णसारा शिंशपायां पुंसि स्नुह्यां मृगान्तरे।
गिरिसारः पुमान् लोहे वङ्गे मलयपर्व्वते ॥२५९॥
घनसारस्तु कर्पूरे दक्षिणावर्त्तपारदे।
चराचरं वाच्यलिङ्गमिङ्गे जगति न द्वयोः ॥२६०॥
चर्म्मकारः पादूकृति स्त्रियां चर्म्मकषौषधौ।
अथ चक्रधरोऽजेऽहीना त्रिषु ग्रामजालिनि ॥२६१॥
चित्रटीरो विधौ भालमङ्कितं येन तत्र च।
घण्टाकर्णोपहाराय हतच्छागास्रविन्दुभिः॥२६२॥
तालपत्रन्तु ताडङ्के रण्डायां तालपत्र्यपि।
तुङ्गभद्रा नदीभेदे स्त्रियां पुंसि मदोत्कटे ॥२६३॥
तुण्डिकेरीतु कार्पास्यां विम्बिकायामपि स्त्रियाम्।
तुलाधारस्तुलाराशौ पुंसि वाणिजके त्रिषु ॥२६४॥
अथ तोयधरो मुस्तास्तनिपण्योषधी घने।
दण्डयात्रा दिग्विजये संयानवरयात्रयोः ॥२६५॥
अथो दशपुरं देशे मवेऽपि स्यान् नपुंसकम्।
दण्डधरः पुमान् पृथ्वीनाथे प्रेताधिपेऽपि च ॥२६६॥
दिगम्बरः स्यात् क्षपणे नग्ने तमसि शङ्करे।
दुरोदरं द्यूतभेदे द्यूतकृत्पणयोः पुमान् ॥२६७॥

द्वैहयात्रा यमपुरीगमने भोजनेऽपि च।
द्वैमातुरो जरासन्धवारणाननयोः पुमान् ॥२६८॥
धराधरो हरौ शैले धाराधरोऽसिमेघयोः।
धाराङ्कुरस्तु नासीरे शीकरेऽपि घनोपले ॥२६९॥
धार्त्तराष्ट्रोऽसितास्याङ्घ्रि हंसे कौरवसर्पयोः।
धुन्धुमारः शक्रगोपे गृहधूमे पटालिके ॥२७०॥
धुरन्धरो धवद्रौ ना वाच्यलिङ्गस्तु धूर्व्वहे।
धृतराष्ट्रः सुराज्ञि स्यात् नागचन्द्रियभेदयोः ॥२७१॥
धृतराष्ट्री हंसपत्न्यां नभश्चरो विहङ्गमे।
विद्याधरे घने वाते निशाचरस्तु रक्षसि ॥२७२॥
फेरुपेचकसर्पेषु पांशुलायां निशाचरी।
निषद्वरस्तु जम्बाले निशायान्तु निषद्वरी ॥२७३॥
नीलाम्बरः प्रलम्बघ्ने कौणपे च शनैश्चरे।
भवेत् परिकरः सङ्घे पर्य्यङ्कपरिवारयोः ॥२७४॥
प्रगाढगात्रिकाबन्धे समारम्भविवेकयोः।
अथ पत्तचरश्चन्द्रे पृथक्चारिगजेऽपि च ॥२७५॥
भवेत् प्रतिसरो मन्त्रभेदे माल्ये च कङ्कणे।
व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डने ॥२७६॥
आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः।
भवेत् परिसरो मृत्यौ विधावपि च पुम्ययम् ॥२७७॥

कालञ्जरो योगिचक्रमेलके भैरवे गिरौ।
कुम्भकारी कुलत्थयाञ्च पुंलिङ्गो घटकारके ॥२५८॥
कृष्णसारा शिंशपायां पुंसि स्नुह्यां मृगान्तरे।
गिरिसारः पुमान् लोहे वङ्गे मलयपर्व्वते ॥२५९॥
घनसारस्तु कर्पूरे दक्षिणावर्त्तपारदे।
चराचरं वाच्यलिङ्गमिङ्गे जगति न द्वयोः ॥२६०॥
चर्म्मकारः पादूकृति स्त्रियां चर्म्मकषौषधौ।
अथ चक्रधरोऽजेऽचेना त्रिषु ग्रामजालिनि ॥२६१॥
चित्रटीरो विधौ भालमङ्कितं येन तत्र च।
घण्टाकर्णोपहाराय हतच्छागास्रविन्दुभिः॥२६२॥
तालपत्रन्तु ताडङ्के रण्डायां तालपत्र्यपि।
तुङ्गभद्रा नदीभेदे स्त्रियां पुंसि मदोत्कटे ॥२६३॥
तुण्डिकेरी तु कार्पास्यां विम्बिकायामपि स्त्रियाम्।
तुलाधारस्तुलाराशौ पुंसि वाणिजके त्रिषु ॥२६४॥
अथ तोयधरो मुस्तासुनिषण्णौषधी घने।
दण्डयात्रा दिग्विजये संयानवरयात्रयोः ॥२६५॥
अथो दशपुरं देशे मवेऽपि स्यान् नपुंसकम्।
दण्डधरः पुमान् पृथ्वीनाथे प्रेताधिपेऽपि च॥२६६॥
दिगम्बरः स्यात् क्षपणे नग्ने तमसि शङ्करे।
दुरोदरं द्यूतभेदे द्यूतकृत्पणयोः पुमान् ॥२६७॥

देहयात्रा यमपुरीगमने भोजनेऽपि च।
द्वैमातुरो जरासन्धवारणाननयोः पुमान् ॥२६८॥
धराधरो हरौ शैले धाराधरोऽसिमेघयोः।
धाराङ्कुरस्तु नासीरे शीकरेऽपि घनोपले ॥२६९॥
धार्त्तराष्ट्रोऽसितास्याङ्घ्रि हंसे कौरवसर्पयोः।
धुन्धुमारः शक्रगोपे गृहधूमे पदालिके ॥२७०॥
धुरन्धरो धवद्रौ ना वाच्यलिङ्गस्तु धूर्व्वहे।
धृतराष्ट्रः सुराज्ञि स्यान् नागक्षत्रियभेदयोः ॥२७१॥
धृतराष्ट्री हंसपत्न्यां नभश्चरो विहङ्गमे।
विद्याधरे घने वाते निशाचरस्तु रक्षसि ॥२७२॥
फेरुपेचकसर्पेषु पांशुलाया निशाचरी।
निषद्वरस्तु जम्बाले निशायान्तु निषद्वरी ॥२७३॥
नीलाम्बरः प्रलम्बघ्ने कौणपे च शनैश्चरे।
भवेत परिकरः सङ्घे पर्य्यङ्कपरिवारयोः ॥२७४॥
प्रगाढगात्रिकाबन्धे समारम्भविवेकयोः।
अथ पत्त्रचरश्चन्द्रे पृथक्चारिगजेऽपि च ॥२७५॥
भवेत् प्रतिसरो मन्त्रभेदे माल्ये च कङ्कणे।
व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डने ॥२७६॥
आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः।
भवेत् परिसरो मृत्यौ विधावपि च पुंस्ययम् ॥२७७॥

परम्परो मृगभेदे प्रपौत्रे तनयस्य च।
परम्परा परिपाट्यां हिंसासन्तानयोरपि ॥२७८॥
पयोधरः कोषकारे नारिकेले स्तनेऽपि च।
कशेरुमेघयोः पुंसि प्रभाकरोऽग्निसूर्य्ययोः ॥२७९॥
प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायान्तु योषिति।
परिवारः परिजने खड्गकोषे परिच्छदे ॥२८०॥
पारावारः समुद्रे ना तटद्वये नपुंसकम्।
पाचटीरस्तु पुंल्लिङ्गो युक्तव्यापारमन्त्रिणि ॥२८१॥
लोहकांस्यरजत्पात्रे सिंहाणे पावकेऽपि च।
पारिभद्रस्तु मन्दारे निम्बद्रौ देवदारुणि ॥२८२॥
पीताम्बरस्तु शैलूषे पुंसि कैटभसूदने।
पीतसारो मलयजे गोमेदकमणावपि ॥२८३॥
पूर्णपात्रं वस्तुपूर्णपात्रे वर्द्धापकेऽपि च।
बलभद्रा त्रायमानाकुमार्य्योः पुंसि सीरिणि ॥२८४॥
ब्रह्मपुत्रः क्षेत्रभेदे नदभेदे च पुंस्ययम्।
वक्रनक्रस्तु पिशुने तथैव शुकपक्षिणि ॥२८५॥
वार्वटीरो रङ्ग ध्मास्मग्रङ्कुरे गणिकासुते।
वारकीरस्तु पुंसि स्यात् भार्य्याद्विणि वाड़वे ॥२८६
यूकायां वेणिवेधिन्यां नीराजितहयेऽपि च।
बिन्दतन्त्रः पुमान् शारिफलके च तुरङ्गके ॥२८७॥

वीरभद्रोऽश्वमेधाश्वे वीरश्रेष्ठे च वीरणे।
स्याद् वीरतरं वीरणे वीरश्रेष्ठे शरे च ना ॥२८८॥
महावीरस्तु गरुडे शूरे सिंहे मखानले।
वज्रे श्वेततुरङ्गे च स्वानविहगेऽपि च ॥२८९॥
महामात्रः समृद्धे चामात्ये हस्तिपकाधिपे।
मणिच्छिदा तु मेदायामृषभाख्यौषधेऽपि च ॥२९०॥
महेश्वरो महादेवे कथितोऽधीश्वरेऽपि च।
मृगनेत्रा रात्रिभेदे विशेषे योषितस्तथा ॥२९१॥
रथकारस्तु माहिष्यात् करणीजे च तक्षणि।
रागसूत्रं तूलाम्बे पट्टसूत्रे नपुंसकम् ॥२९२॥
लम्बोदरः स्यादुद्याने गणानामधिपेऽपि च।
लक्ष्मीपुत्रस्तु पुंलिङ्गः कामदेवे तुरङ्गमे ॥२९३॥
व्यवहारो द्रुभेदे स्यान् न्यायेऽपि च पणे स्थितौ।
अथ व्यतिकरः पुंसि व्यसन व्यतिषङ्गयोः ॥२९४॥
वातपुत्रो महाधूर्ते भीमसेने हनूमति।
विश्वम्भरोऽच्युते शक्रे पुंसि विश्वम्भरा भुवि ॥२९५॥
विश्वकद्रु खिपुखले ध्वानाखेटशुनोः पुमान्।
विभावरी निशाराज्योः कुट्टन्यां वक्रयोषिति ॥२९६॥
विवादवल्लगुण्याञ्च विभाकरोऽग्निसूर्ययोः।
वीतिहोत्रोऽनलेऽर्के च शतपत्र. शिखण्डिनि ॥२९७॥

दार्व्वाघाटे सारसे च कमले तु नपुंसकम्।
शतावरीतुशुण्यां स्यादिन्दीवर्य्यामपिस्त्रियाम्॥२९८॥
शिशुमारोऽम्बुसम्भूतजन्तौ तारात्मकाच्युते।
भवेत्सह्चरो झिण्यां द्वयोरनुचरे त्रिषु॥२९९॥
समुद्राहः पुमान् ग्राहे सेतुबन्धे तिमिङ्गिले।
सम्प्रहारो गतौ युद्धे स्थिरदंष्ट्रो भुजङ्गमे॥३००॥
वराहाकृतिविष्णौ च सुकुमारो मृदौ त्रिषु।
पुंसि पुण्ड्राभिधानेक्षौ सूत्रधारः शचीपतौ॥३०१॥
नान्द्यन्तरसम्बाधिपात्रशिल्पिप्रभेदयोः।

रपञ्चकम्।

तमालपत्रं तापिञ्जे तिलके पत्रकेऽपि च॥३०२॥
तालीशपत्रं भूम्यामलकीतालीशयोः स्मृतम्।
स्यात् पांशुचामरः पुंसि दूर्व्वाञ्चिततटीभुवि॥३०३॥
दर्द्दापके प्रशंसायां पुरोटौ धूलिगुच्छके।
स्यात् पादचत्वरञ्छागे सैकते पिप्पलेऽपि च॥३०४॥
करके परदोषैकप्रवक्तृपुरुषेऽपि च।
पीतकावेरमित्येतत् कुङ्कुमे पित्तलेऽपि च॥३०५॥
स्याद्राजबदरं रक्तामलके लवणेऽपि च।
कुबेराक्षसरित्पुरि कुबेरनलिनीपुरोः॥३०६॥

विप्रतीसार उद्दिष्टः कौकृत्येऽनुशये रुषि ।
भवेत् समभिहारस्तु पौनः पुन्यभृशार्थयोः ॥२०७॥
सर्व्वतो भद्र इत्युक्तः काव्यचित्रे गृहान्तरे ।
निम्बे ना सर्व्वतोभद्रा गम्भारी नटयोषितोः ॥२०८॥
रान्तवर्गः समाप्तः ।

लैककम् ।

लः शक्रे लातु दाने स्याद् ग्रहणेऽपि निगद्यते ।
लौ श्लेषणे च चपले ग्लौ धरण्यां निशापतौ ॥१॥

लद्विकम् ।

अम्लो रसस्य भेदे स्यादाम्ली चाङ्गेरिकौषधौ ।
अलिः सुरापुष्पलिहोः पुस्यालिर्विशदाशये ॥२॥
त्रिषु स्त्रियां वयस्यायां सेतौ पङ्क्तौ प्रकीर्त्तिता ।
आलुर्गलन्तिकायां स्त्री क्लीवं मूले च भेलके ॥३॥
इला कलने सौम्यस्य धरित्र्यां गवि वाचि च ।
ओलस्तु शूरणे पुंसि स्यादार्द्रे वाच्यलिङ्गकः ॥४॥
कला स्यान् मूलविवृद्धौ शिल्पादावंशमात्रके ।
षोडशांशे च चन्द्रस्य कलनाकालमानयोः ॥५॥
कलं शुक्रे त्विप्यजीर्णे चाव्यक्तमधुरध्वनौ ।
कलिः स्त्री कलिकायां ना शराजिकलहे युगे ॥६॥

काली मृतौ महाकाले समये यमकृष्णयोः ।
काला तु कृष्णत्रिवृतामञ्जिष्ठा नीलिनीषु च ॥७॥
काली गौर्य्यां क्षीरकीटे कालिका मातृभेदयोः ।
कीला लेशे द्वयोः स्तम्भज्वालाकफोणिशङ्कुषु ॥८॥
कुलं जनपदे गोत्रे सजातीयगणेऽपि च ।
भवने च तनौ क्लीवं कुलटक्वाव्यौषधौ कुली ॥९॥
अथ कूलं तटे स्तूपे सैन्यपृष्ठतड़ागयोः ।
कोलं कोलिफले क्लीवं पिप्पलीचव्ययोः स्त्रियाम् ॥१०॥
नाऽङ्कपालौ शनौ चित्रे वराहेत्सङ्गभेलके ।
खलं भूस्थानकल्केषु नीचक्रूराधमे त्रिषु ॥११॥
खल्लो वस्त्रप्रभेदे स्याद् गर्त्ते चर्म्मणि चातके ।
खल्ली तु हस्तपादावमर्द्दनाख्यरुजि स्त्रियाम् ॥१२॥
खिलमप्रहतेऽपि स्यात् सारसंचितवेधसोः ।
गलः सर्ज्जरसे कण्ठे गुलः स्याद्दैत्यवे पुमान् ॥१३॥
गुली तु गुटिकारोगभिदोः स्त्रुह्यां गुला स्मृता ।
गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियाम् ॥१४॥
पत्राञ्जने मण्डले चालिञ्जरे वालखेलने ।
चला लक्ष्म्यां पुमान् कम्पे कम्पयुक्तेऽभिधेयवत् ॥१५॥
चिल्लः पुमान् क्लिन्ननेत्रे क्लिन्नाक्षेऽप्यभिधेयवत् ।
आततायिनि च सम्प्रोक्तश्चिल्लो स्यात् क्षुद्रवास्तुके ॥१६॥

चुल्ली चितायामुद्धाने स्त्रियां चेलोऽधमे त्रिषु ।
नपुंसकन्तु वसने छलं स्खलितशाठ्ययोः ॥१७॥
छल्ली वीरुधि सन्ताने वल्कले कुसुमान्तरे ।
जलं गोकलने नीरे ह्रीवेरेऽप्यन्यवज्जडे ॥१८॥
जालं गवाक्ष आनाये क्षारके दन्तवृन्दयोः ।
जालो नीपद्रुमे जाली पटोलिकौषधौ स्त्रियाम् ॥१९॥
झला स्यादातपस्योर्म्मौ दुहितर्य्यपि च स्त्रियाम् ।
झिल्ली चीर्य्यातपरुचोर्वर्त्त्यामुद्वर्त्तनांशुके ॥२०॥
तलं स्वरूपेऽनूर्द्ध्वेऽस्त्री क्लीवं ज्याघातवारणे ।
कानने कार्य्यवीजे च पुंसि तालमहीरुहे ॥२१॥
चपेटे च त्सरौ तल्लीघाते सव्येन पाणिना ।
तल्ली तरुण्यां तल्लस्तु जलाधारान्तरे पुमान् ॥२२॥
तालः करतलेऽङ्गुष्ठमध्यमाभ्याञ्च सम्मिते ।
गीतकालक्रियामाने करास्फाले द्रुमान्तरे ॥२३॥
वाद्यभाण्डे च कांस्यस्य त्सरौ ताल्यजटौषधौ ।
क्लीवन्तु हरिताले स्यात् तुला सादृश्यमानयोः ॥२४॥
गृहाणां दारुबन्धाय पीठिकायामपीष्यते ।
राशौ पलशते भाण्डे तूलं स्याद् ब्रह्मदारुणि ॥२५॥
आकाशेऽथ पिचौ न स्त्री दलमुत्सेधखण्डयोः ।
शस्त्रीच्छेदेऽप्यपद्रव्ये पत्रेऽप्यथ दुलिः स्त्रियाम् ॥२६॥

क्रमद्यां ना मुनौ दोला नील्यां यानान्तरेऽपि च ।
नलः पोटगले राज्ञि पितृदेवे कपीश्वरे ॥२७॥
कमलेऽपि च नल्याञ्च क्रमेण क्लीवयोषितोः ।
नाला न ना पद्मदण्डे नाली शाककडम्बके ॥२८॥
नीलन्तु नीलरक्तो ना निध्यद्रिवानरान्तरे ।
नीली रुग्भेदनीलिन्योः पलमुन्मानमांसयोः ॥२९॥
पल्ल्यल्पग्रामकुट्योः स्त्री पल्लः स्थूलकुसूलके ।
पालिः कर्णलताग्रेऽश्रौ पङ्क्तावङ्कप्रभेदयोः ॥३०॥
छात्रादिदेये स्त्री पाली यूकासश्मश्रु योषितोः ।
पिल्लः पुमान् क्लिन्ननेत्रे क्लिन्नाक्षे पुनरन्यवत् ॥३१॥
पीलुः पुमान् प्रसूने स्यात् परमाणौ मतङ्गजे ।
अस्थिखण्डे च तालस्य काण्डपादपभेदयोः ॥३२॥
पुलः स्यात् पुलके पुंसि विपुलेऽप्यन्यलिङ्गकः ।
फलं जातीफले सस्ये हेतुत्थे व्युष्टिलाभयोः ॥३३॥
त्रिफलायाञ्च कक्कोले प्रियङ्गौ तु फली स्मृता ।
फालः पुंसि महादेवे कालिन्दीभेदनेऽपि च ॥३४॥
क्लीबं सीरोपकरणे त्रिषु कार्पासवाससि ।
बलिर्दैत्यप्रभेदे च करचामरदण्डयोः ॥३५॥
उपहारे पुमान् स्त्री तु जरया श्लथचर्म्मणि ।
गृहदारुप्रभेदे च जठरावयवेऽपि च ॥३६॥

वलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः।
पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च ॥३७॥
बलयुक्तोऽन्यलिङ्गः स्याद् वाट्यालकौ तु योषिति।
बली स्याद् जमोदार्या गतल्यामपि योषिति ॥३८॥
बालोना कुन्तलेऽश्वस्य करिणश्चापि वालधौ।
नारिकेले हरिद्रायां मल्लिकाभिद्यपि स्त्रियाम् ॥३९॥
वाच्यलिङ्गोऽर्भके मूर्खे ह्रीवेरे पुन्नपुंसकम्।
अलङ्कारान्तरे मेध्ये बाली बाला त्रुटौ स्त्रियाम् ॥४०॥
वेला काले च सीमायामब्धेः कूलविकारयोः।
अक्लिष्टमरणे रागे ईश्वरस्य च भोजने ॥४१॥
भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः।
भल्लातक्यां स्त्रियां भल्ली भालं तेजोललाटयोः ॥४२॥
भेलः प्लवे मुनौ पुंसि भीरावज्ञे च वाच्यवत्।
भोलो मौनान्तरे पुंसि त्रिषु कामादिविह्वले ॥४३॥
मलोऽस्त्री पापविड्किट्टे कृपणेत्वभिधेयवत्।
मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि ॥४४॥
मालं क्षेत्रे स्त्रियां पुष्पस्रजो जात्यन्तरे पुमान्।
मालुः पत्रलतानार्योः स्त्रियां मूलं शिफाद्ययोः ॥४५॥
मूलविक्तोऽन्तिके वा ना भे मेला मेलके मसौ।
मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् ॥४६॥

नाऽशोकद्रौ स्त्रियां भूमौ लीला केलिविलासयोः।
शृङ्गारभावचेष्टायां लीलः स्याद् वाच्यलिङ्गकः॥४७।
सतृष्णे चञ्चले लोला जिह्वाकमलयोः स्त्रियाम्।
व्यालो दुष्टगजे सर्पे श्वापदे नान्यवत् खले॥४८॥
विलं छिद्रे गुहायाञ्च पुमानुच्चैःश्रवोहये।
शलन्तु शलले पुंसि भृङ्गिचैत्रभिदो र्विधौ॥४९॥
शालुः कषायद्रव्ये स्यात् चौरकाख्योपधौ पुमान्।
शालिस्तु कलमादौ च गन्धमार्ज्जारके पुमान्॥५०॥
शाला दुस्कन्धशाखायां गृहगेहैकदेशयोः।
ना झषे शिलमुञ्छे स्याद् गण्डूपद्यां शिली मता॥५१॥
स्तम्भशीर्षे शिलाशिल्यौ शिला तु प्रस्तरे मता।
तथा मनःशिलायाञ्च द्वाराधःस्थितदारुणि॥५२॥
शीलं स्वभावे सद्वृत्ते शुक्लो योगान्तरे सिते।
नपुंसकन्तु रजते शूलोऽस्त्री रोग आयुधे॥५३॥
मृत्युकेतनयोगेषु शूल्या स्यात् पण्ययोषिति।
शैलो भूभृति शैलं तु शैलेये तार्क्ष्यशैलके॥५४॥
सालः पादपमात्रे स्यात् प्राकारे सर्ज्जपादपे।
स्थालं भाजनभेदेऽपि स्थाली स्यात्पाटलोखयोः॥५५॥
स्थूलं कूटेऽय नियप्रज्ञे पीवरेऽप्यन्यलिङ्गकः।
हालो हले पुमान् हाला मदिरायाञ्च योषिति॥५६॥

हेला स्त्रियामवज्ञायां विलासे वरयोषिताम्।

लत्रिकम्।

अनलो वसुभेदेऽग्नावनिलो वसुवातयोः ॥५७॥
अर्गला त्रिषु कल्लोलेऽन्तर्दण्डवारयोर्न ना।
अरालः कुटिले सर्ज्जरसे समददन्तिनि ॥५८॥
अङ्गुली करशाखायां कणिकायां गजस्य च।
अचला वसुधायां स्यादचलः शैलकीलयोः ॥५९॥
अमलन्त्वभ्रके क्लीवं लक्ष्म्यां स्त्री निर्म्मले त्रिषु।
अञ्जलिस्तु पुमान् हस्तसम्पुटे कुडवेऽपि च ॥६०॥
अवेलस्त्वपलापे स्यादवेला पूगचर्व्विते।
आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गं भयानके ॥६१॥
इल्वला तारकाभेदे ना भेदे दैत्यमत्स्ययोः।
उत्पली तुपचर्प्यां क्लीवं कुष्ठमसूनयोः ॥६२॥
उपलः प्रस्तरे रत्ने शर्करायान्तु योषिति।
उज्ज्वलो दीप्तशृङ्गारविशदेषु विकाशिनि ॥६३॥
उत्फुल्लं करणे स्त्रीणामुत्तानेऽपि विकस्वरे।
उत्ताल उत्कटे श्रेष्ठे विकराले प्लवङ्गमे ॥६४॥
कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे।
मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः ॥६५॥
कपिला रेणुकायाञ्च शिंशपागोविशेषयोः।

पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम् ॥६६॥
नाऽनले वासुदेवे च मुनिभेदे च कुक्कुरे ।
कम्बलो नागराजे स्यात् सास्नाप्रावरयोरपि ॥६७॥
कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम् ।
करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत् ॥६८॥
ससर्ज्जरसतैले ना क्लीवं कृष्णकुठेरके ।
कन्दलं त्रिषु कपालेऽप्युपरागे नवाङ्कुरे ॥६९॥
कलध्वनौ कन्दली तु मृगगुल्मप्रभेदयोः ।
कदलाकदलौ पृश्न्यां कदलीकदलौ पुनः ॥७०॥
रम्भावृक्षेऽथ कदली पताकामृगभेदयोः ।
कदला डिम्बिकायाञ्च शाल्मलीवृक्षकेऽपि च ॥७१॥
कपालोऽस्त्री शिरोऽस्थ्नि स्याद् घटादेः शकले व्रजे ।
कण्ठालो तु द्वयो र्द्रोणीप्रभेदे ना क्रमेलके ॥७२॥
कल्लोलः पुंसि हर्षे स्यादुल्लोलवैरिणोरपि ।
कामला रोगभेदे वा नानामरुवसन्तयोः ॥७३॥
कामुके वाच्यलिङ्गोऽथ काकोलं नरकान्तरे ।
ना कुलाले द्रोणकाके विषभेदे तु न स्त्रियाम् ॥७४॥
काहला वाद्यभाण्डस्य भेदे चाप्सरसां भिदि ।
काहली तु तरुण्यां स्यात् काहलश्चक्रलायुधे ॥७५॥
शब्दमात्रेऽपि पुंलिङ्ग स्त्रिषु शुष्के भृशे खले ।

किट्टालः पुंसि ताम्रस्य कलसे लोहगूथके ॥७६॥
कीलालं रुधिरे तोये कुशलः शिक्षिते त्रिषु ।
क्षेमे च सुकृते चापि पर्य्याप्तौ च नपुंसकम् ॥७७॥
कुवलञ्चोत्पले मुक्ताफले च बदरीफले ।
कुद्मलो मुकुले पुंसि नद्यां नरकान्तरे ॥७८॥
कुटिला तगरपाद्यां स्त्री भुग्ने च वाच्यलिङ्गकः ।
कुन्तलश्चषके वाले यवे पुंभूम्नि नीवृति ॥७९॥
कुनालः कुकुभे कुम्भकारे स्त्रीलञ्जनान्तरे ।
कुम्भिलः शालमीने च चौरस्तौकार्थचौरयोः ॥८०॥
कुद्दालः स्यात् पुमान् भूमिदारणे युगपत्रके ।
कुचेला विद्धकर्ण्यां स्त्री वाच्यवत्तु कुवाससि ॥८१॥
कुकूलं शङ्कुसङ्कीर्णश्वभ्रे ना तु तुषानले ।
कुण्डलं कर्णभूषायां पाशेऽपि वलयेऽपि च ॥८२॥
कास्वनदुगुडूच्योः स्त्री केवलः कुहने पुमान् ।
नपुंसकन्तु निर्णीते वाच्यवच्चैककृत्स्नयोः ॥८३॥
केवली ज्ञानभेदेऽथ कोमलं मृदुले जले ।
कोहलो वाद्यभेदे स्यात् नाट्यशास्त्रप्रवक्तरि ॥८४॥
ग्रन्थिलस्तु करीरद्रौ विकङ्कततरौ पुमान् ।
सग्रन्थौ त्रिषु गन्धोली भद्रागद्योश्च योषिति ॥८५॥

गरलं तृणपूले च विषे माने नपुंसकम्।
गोपालो नृपगोपेशे गोकीलो मुषले हले ॥८६॥
गौरिलस्तु पुमान् लौहचूर्णे स्याद् गौरसर्षपे।
चपलः पारदे मीने चौरके प्रस्तरान्तरे ॥८७॥
चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु च।
नपुंसकन्तु शीघ्रे स्याद् वाच्यवत् तरले चले ॥८८॥
चत्वालो होमकुण्डे स्यात् पुंसि दर्भेऽपि दृश्यते।
चन्द्रिलः पुंसि वास्तुकशाके भर्गे च नापिते ॥८९॥
चञ्चला तु तडिल्लक्ष्म्योरथ चञ्चलः कामुकेऽनिले।
चूडाला त्वच्चटायां स्त्री चूडावति च वाच्यवत् ॥९०॥
छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके।
जम्बालः शैवले पङ्के जगलो मदनद्रुमे ॥९१॥
मेदके पिष्टमद्ये च पुंसि धूर्तेऽभिधेयवत्।
जटिला पिप्पली मांसी जटायुक्ते च वाच्यवत् ॥९२॥
जङ्गलं निर्जनस्थाने त्रिलिङ्गं पिशितेऽस्त्रियाम्।
जम्भलः पुंसि जम्बीरे बुद्धदेवान्तरेऽपि च ॥९३॥
जम्बूलस्तु पुमान् जम्बूविटपे क्रकचच्छदे।
जाङ्गुली विषविद्यायां जाङ्गुलं जालिनीफले ॥९४॥
जाङ्गली शूकशीम्ब्यां स्त्री जाङ्गलो ना कपिञ्जले।
तरलं चञ्चले पिङ्गे भास्वरेऽपि त्रिलिङ्गकम् ॥९५॥

हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियाम्।
तण्डुलः स्याद् विडङ्गे च धान्यादिनिकरे पुमान्॥९६
तमालस्तिलके खड्गे तापिञ्छे वरुणद्रुमे।
ताम्बूली नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्॥९७॥
तालो रुजि पाके च लोहकूटे मनोजवे।
तुमुलः कलिवृचे ना क्लीवन्तु रणसङ्कुले॥९८॥
तैतिलो गण्डके पुंसि क्लीवन्तु करणान्तरे।
दुकूलं सूक्ष्मवस्त्रे स्यात्क्षौमे च धवला गवि॥९९॥
वृषश्रेष्ठे पुमान् वाच्यलिङ्गः शुक्ले च सुन्दरे।
नकुली कुक्कुटीमांस्योः पशुपाण्डवयोः पुमान्॥१००॥
नाकुली कुक्कुटीकन्दे रास्नायां चविके स्त्रियाम्।
नाभीलं वङ्क्षणे नार्य्याः कृच्छ्रगर्भाण्डयोरपि॥१०१॥
निचुलस्तु निचोले स्यादिज्जलाख्यमहीरुहे।
निर्म्मलं स्यात्तु निर्म्माल्ये चाभ्रके च नपुंसकम्॥१०२
मलहीनेऽन्यलिङ्गञ्च निस्तलं वर्त्तुले चले।
निष्कलस्तु कलाशून्ये नष्टवीर्य्ये च वाच्यवत्॥१०३॥
नैपाली तु नवमालीकुनटीसुवहासु च।
पललं तिलचूर्णे च पङ्के मांसे नपुंसकम्॥१०४॥
ना राचसेऽथ पटलं पिटके च परिच्छदे।
छदिर्द्दृग्रोगतिलके क्लीबं वृन्देपुनर्न ना॥१०५॥

प्रतलं पातालभेदे तताङ्गुलिकरे पुमान्।
टोलं वस्त्रभेदे नौषधौ ज्योत्स्नायां तु योषिति॥१०६॥
वालोऽस्त्री किसलये वीणादण्डे च विद्रुमे।
स्थालीपुष्पिकागौल्योः स्त्रियां पुम्भूम्नि नीवृति ॥१०७॥
पुलः पृथुले शम्भोः खट्वाङ्गे त्व्यसतीभुवोः।
ाकलं कुष्ठभैषज्ये पुंसि स्यात् कुञ्जरज्वरे ॥१०८॥
ाचलं पाचने नाग्नौ राधनद्रव्यवातयोः।
ाटला पाटलौ स्त्री स्यादस्य पुष्पे पुनर्न ना॥१०९॥
ाशुधान्ये पुमान् श्वेतरक्तवर्णेऽपि वाच्यवत्।
ातालं नागलोके स्याद् विवरे वडवानले॥११०॥
तिली वागुरायां स्यान् नारीपात्रप्रभेदयोः।
प्पलं सलिले वस्त्रच्छेदभेदे च ना तरौ ॥१११॥
रंशुके पक्षिभेदे कणायां पिप्पली मता।
चुलो झावुकेऽपि स्यादिज्जले जलवायसे ॥११२॥
ङ्गलो नागभिद्रुद्रचण्डांशुपारिपार्श्विके।
धिभेदे कषायश्री पुंसि स्यान् कपिलेऽन्यवत्॥११३॥
यां वेश्याविशेषे च करिण्यां कुमुदस्य च।
तला तोयपिप्पल्यां स्यान्यवत् पिच्छसंयुते ॥११४॥
ावत्तु तैजसद्रव्ये पिच्छलो विजिलेऽन्यवत्।
ाोसिकाशिंशपयोः शाल्मली सिन्धुभेदयोः ॥११५॥

पुद्गल' सुन्दराकारे त्रिषु पुंस्यात्मदेहयोः।
पेपलो रुचिरे दक्षे फेनिलोऽरिष्टपादपे ॥११६॥
ना सफेने त्रिषु क्लीवं कोलीमदनयोः फले।
बकुला नीलिकायां स्यादेलायां गवि योषिति ॥११७॥
क्षत्रिकास्तु स्त्रियां भूम्नि विद्वायसि न पुंसकम्।
पुंस्यग्नौ कृष्णपक्षे च वाच्यवत् प्राज्यकृष्णयोः ॥११८॥
वरला वारला चापि गन्धोलीहंसकान्तयोः।
वार्द्दलं दुर्द्दिने मेलानन्दायां वार्द्दलः स्मृतः ॥११९॥
मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे।
नपुंसकन्तु कल्याणे सर्वार्थरक्षणेऽपि च ॥१२०॥
मण्डलं परिधौ कोठे देशे द्वादशराजसु।
क्लीवेऽथ निवहे बिम्बे त्रिषु पुंसि तु कुक्कुरे ॥१२१॥
मञ्जुल त्रिषु मञ्जौ ना जलरङ्कौ नपुंसकम्।
जलाश्रले निकुञ्जे च मल्लिका फलिनीस्त्रियोः ॥१२२॥
मातुलो व्रीहिभिन्नाढ्याम्नातोय मदनद्रुमे।
धूस्तुरे मात्रलो वन्दिचौरे च ग्राहरोगयोः ॥१२३॥
मूषलं स्यादयोग्रे च पुन्नपुंसकयोः स्त्रियाम्।
तालमूल्यामाखुपर्णी गृहगोधिकयोरपि ॥१२४॥
मृणालं नलदे क्लीव पुन्नपुंसकयो विसे।
मेखला खड्गबन्धे स्यात् काञ्चीशैलनितम्बयोः॥१२५॥

यमल युगले क्लीवं यमली चेटिकाद्वये।
ासाला रसनादूर्व्वाविदारीमार्ज्जितासु च ॥१२६॥
सालं सिह्लके वेले रसालश्चेक्षुचूतयोः।
ामिलो रमणे कामे लाङ्गुलं पुच्छशेफयोः ॥१२७॥
लाङ्गली तोयपिप्पल्यां क्लीवन्तु कुसुमान्तरे।
ोदारणे तृणराजगृहदारुविशेषयोः ॥१२८॥
ोचलः शृङ्खलाचार्य्येऽव्यक्तवाचिनि च त्रिषु।
ञ्जुलः पुंसि तिनिशे वेतसाशोकयोरपि ॥१२९॥
ण्डालो युद्धभेदे च नौकायाञ्च खनित्रके।
ातूलः पुंसि वात्याया वाञ्चवन्मारुतासहे ॥१३०॥
ामिलो दाम्भिके वामं त्रिषु स्याद् विमला स्त्रियाम्।
ातलायां भुवोभेदे निर्म्मलेऽभिधेयवत् ॥१३१॥
िपुलः पृथुलेऽगाधे मेरुपश्चिमभूधरे।
ादुलस्तु पुमानम्बुवेतसे वेतसेऽपि च ॥१३२॥
ड़ालो नेत्रपिण्डे स्याद् वृषदंशकके पुमान्।
शाला त्विन्द्रवारुण्यामुज्जयिन्यान्तु योषिति ॥१३३॥
गपत्रिभिदो पुंसि पृथुले त्वभिधेयवत्।
पलो गृञ्जने शुद्रे चन्द्रगुप्तेऽपि राजनि ॥१३४॥
कलं त्वचि खण्डे स्याद् रागवस्तुनि वल्कले।
मलोऽस्त्री सम्बलवत् कुलपाथेय मत्सरे ॥१३५॥

शयालुः स्यादजगरे निद्राशीले च कुक्कुरे।
श्रद्धालुः दौहृदिन्यां स्त्री श्रद्धायुक्ते तु वाच्यवत्॥१३६॥
श्यामलः पिप्पले कृष्णे शार्दूलो राक्षसान्तरे।
व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थितः॥१३७॥
शाल्मलि स्तरुभेदे स्याद् द्वीपभेदेऽपि च द्वयोः।
श्रीफलः पुंसि मालूरे धात्रीनीलिकयोः स्त्रियाम्॥१३८॥
शीवलं स्याच्च शैवाले शैलेये च नपुंसकम्।
शीतलं पुष्पकाशीशे शैलजे मलयोद्भवे॥१३९॥
पुमानसनपर्ण्यां स्यात शिशिरे वाच्यलिङ्गकम्।
शृगालो वञ्चके दैत्यभेदे ना डमरे स्त्रियाम्॥१४०॥
शृङ्खला पुंस्कटीवस्त्रबन्धे च निगडे त्रिषु।
शैवलं पद्मकाष्ठे स्यात् शैवालेऽपि पुमानयम्॥१४१॥
शौष्कलः शुष्कमांसस्य पणके पिशिताशिनि।
षण्डाली तैलमाने च सरसीकामुकस्त्रियोः॥१४२॥
सरलः पूतिकाष्ठे नाऽथोदारावक्रयो स्त्रिषु।
सङ्कुलं त्रिषु विस्पष्टवाचि व्याप्तेऽथ सप्तला॥१४३॥
नवमाली चर्मकषागुञ्जासु पाटलौ स्त्रियाम्।
सन्धिला तु सुरुङ्गायां नदीमदिरयोः स्त्रियाम्॥१४४॥
सिध्मला मत्स्यविकृतौ वाच्यवत्तु किलासिनि।
सुवेलः प्रणते शान्ते त्रिषु ना पर्वतान्तरे॥१४५॥

सुतलोऽट्टालिकाबन्धनागलोकप्रभेदयोः।
छिल्लोवर्णकद्रव्ये ना मण्ठाख्यान्तु छिल्ली॥१४६॥
हेमलः स्वर्णकारे स्यात् कृकलासे शिलान्तरे।

लचतुष्कम्।

अक्षमालाऽक्षसूत्रे स्यादरुन्धत्यामपि स्त्रियाम्॥१४७॥
अङ्कपाली परीरम्भे धात्रीवेदिकयोः स्त्रियाम्।
अथानिबलः प्रबले त्रिषु स्त्रीत्वौषधीभिदि॥१४८॥
उदूखलं गुग्गुलौ स्यादुलूखलेऽपि न द्वयोः।
एकाष्ठीला वनतिक्तिकौषधौ पुंसि वकपुष्पे च॥१४९॥
कलकल उक्तः कोलाहले तथा सालनिर्य्यासे।
अथ कर्मफलं कर्मरङ्गकर्मविपाकयोः॥१५०॥
कन्दरालः पुमान् गर्दभाण्डे प्लक्षतरावपि।
कमण्डलुः स्यात् करके नस्त्री ना प्लक्षपादपे॥१५१॥
कुतूहलं कौतुके स्यात् प्रशस्तेऽपि च दृश्यते।
खतमालस्तु पुंलिङ्गो धूमेऽपि च बलाहके॥१५२॥
गण्डशैलो ललाटे स्यात् च्युतस्थूलोपले गिरेः।
गन्धफल्यपि गुन्द्रायां चम्पकस्य च कोरके॥१५३॥
चक्रवालोऽद्रिभेदे स्याच्च चक्रवालन्तु मण्डले।
जलाञ्चलं स्रोतो वारिनिर्गमे शैवलेऽपि च॥१५४॥

दलामलं मरुवके दमनेऽपि नपुंसकम्।
ध्वनिनाला तु वीणायां वेणुकाहलयोरपि ॥१५५॥
स्यात् परिमलोऽतिमर्द्दोतिमनोहरगन्धयोश्चापि।
सुरतोपमर्दविकसच्छरीररागादिसौरभे पुंसि॥१५६॥
अथ पाटगलः पुंसि नले च काशमत्स्ययोः।
भवेद् वङ्कफलो नीपे नाऽऽमलक्यान्तु योषिति॥१५७॥
भस्मतूलं ग्रामकूटे पांशुवर्षे हिमेऽपि च।
भद्रकाली तु गन्धोल्यां कात्यायन्यामपि स्त्रियाम्॥१५८॥
महाकालो महादेवे किम्पाके प्रमथान्तरे।
भवेन् मदकलो मत्तेभमदाव्यक्तवाचिनोः॥१५९॥
महाबलं सीसकेऽतिबलायां स्त्री बलान्तरे।
त्रिलिङ्गं मणिमाला तु हारे दन्तक्षतान्तरे॥१६०॥
महानीलो भृङ्गराजे मणिनागविशेषयोः।
मुक्ताफलन्तु कर्पूरे मौक्तिके लवलीफले॥१६१॥
स्यान् मृत्युफला कदल्यां महाकालफले पुमान्।
भवेद् यवफलो वेणौ मांसीकुटजयोरपि॥१६२॥
रजस्वला पुष्पवत्यां स्त्रियां स्यात् सैरभे पुमान्।
वालकेलिः कलालापे पिङ्गदन्तक्षते पुमान्॥१६३॥
अथ वायुफलं शक्रकार्मुके करकेऽपि च।
भवेद् विचकिलो मल्लीप्रभेदे मदने पुमान्॥१६४॥

बृहन्नला गुडाकेशे महापीटगले पुमान् ।
सदाफलः स्कन्दफले नारिकेलेऽप्युदुम्बरे ॥१६५॥
सिनीवाली तु दृष्टेन्दुकलामादुर्गयोरपि ।
अथ सौर्व्वचलं सर्ज्जक्षारे च लवणान्तरे ॥१६६॥
हस्तिमल्लोऽभ्रमातङ्गे शङ्खनागे विनायके ।
हरितालं धातुभेदे स्त्री दूर्व्वाकाशरेखयोः ॥१६७॥
हलाहलो महासर्पेऽञ्जनायां ना विषेऽस्त्रियाम् ।

लपञ्चकम् ।

आसुतीवल आख्यातः कन्यापालकयज्वनोः ॥१६८॥
उद्दण्डपालः पुंसि स्यात् सर्पमत्स्यप्रभेदयोः ।
एककुण्डल आख्यातो बलभद्रे धनाधिपे ॥१६९॥
कपोटपाल उद्दिष्टः केनिपातसमुद्रयोः ।
स्यात् पाण्डुकम्बलः श्वेतप्रावारग्रावभेदयोः ॥१७०॥
भवेत् सुरतताली तु दूतिकायां शिरःस्रजि ।

लान्तवर्गः समाप्तः ।

वैककम् ।

वः सान्त्वने च वाले च वरुणे च निगद्यते ।
वं प्रचेतसि जानीयाद्दिवार्थे च तदव्ययम् ॥१॥
स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रियाम् ।

वद्विकम् ।

अवि र्नाथे रवौ मेषे शैलमूषिककम्बले ॥२॥
अश्वः पुंजातिभेदे च तुरगे च पुमानयम् ।
ऊर्द्ध्वं स्यादुच्छ्रिते तुङ्गे चोपरिष्टादपि स्मृतम् ॥३॥
क्षवः क्षुते राजिकायां कवि र्वाल्मीकिशुक्रयोः ।
सूरौ काव्यकरे पुंसि स्यात् खलीने तु योषिति ॥४॥
कण्व पापे मुनौ पुंसि किण्व वीजे च शीधुनः ।
पापे क्लीवं नपुंसके षण्डेऽन्यवदविक्रमे ॥५॥
स्यात्तु ग्रीवा कन्धरायां तच्छिरायाञ्च योषिति ।
चार्व्वी तु शोभनाबुद्धौ ज्योत्स्नाधनदभार्य्ययोः ॥६॥
छविः शोभारुचो र्योषिज् जवो वेगवति त्रिषु ।
पुंलिङ्गस्तु भवेद् वेगे चोड्रपुष्पे जवा स्मृता ॥७॥
जीवः प्राणिनि वृत्तौ च वृक्षभेदे बृहस्पतौ ।
जीवा जीवन्तिकामौर्व्वीवचाशिञ्जितभूमिषु ॥८॥
न स्त्री तु जीविते तत्त्वं स्वरूपे परमात्मनि ।
स्याद् विलम्बितनृत्ये च द्रवः प्रद्रावनर्म्मणोः ॥९॥
रसेऽपि दवदावौ तु वनवह्नौ वनेऽप्युभौ ।
द्वन्द्व रहस्ये कलहे तथा मिथुनयुग्मयोः ॥१०॥
दार्व्वी दारुहरिद्रायां तथा गोजिह्विकौषधौ ।
द्यौः स्त्री स्वर्गे च गगने दिवं क्लीवं तयोः स्मृतम् ॥११॥

देवो मेघे सुरे राज्ञि स्यात् नपुंसकमिन्द्रिये।
देवी कृताभिषेकायां तेजनीपृक्कयोरपि ॥१२॥
धवः पुमान् नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च।
ध्रुवः शङ्कौ हरे विष्णौ वटे चोत्तानपादजे ॥१३॥
वसुयोगभिदोः पुंसि क्लीवं निश्चिततर्कयोः।
स्त्रीमूर्व्वाढ्योःशालपर्ण्यां गीतिखुगभेदयो स्त्रिषु ॥१४॥
सन्तते शाश्वते चाथ नवं नव्ये पुमान् स्तुतौ।
नीवी परिपणे स्त्रीणां कटीवसनवन्धने ॥१५॥
पक्वं परिणतेऽपि स्याद् विनाशाभिमुखे त्रिषु।
प्लवः स्यात् प्लवने भेले भेकेऽवौ श्वपचेऽपि च ॥१६॥
शाखामृगे च कुलके प्रवणे पर्कटीद्रुमे।
कारण्डवाख्यविहगे शब्दे सुतगतौ पुमान् ॥१७॥
कैवर्त्तीमुस्तके गन्धतृणेऽपि स्यान् नपुंसकम्॥
पार्श्वं कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च ॥१८॥
प्राध्वन्तु प्रणते चातिदूरवर्त्मनि वन्धने।
पृथ्वी भूमौ महत्याञ्च त्वक्पत्र्यां कृष्णजीरके ॥१९॥
भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः।
भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥२०॥
क्रियालीलापदार्थेषु विभूतिवुधजन्तुषु।
रत्यादौ चाथ रेवा स्यात् नील्यां रत्यां नदीभिदि॥२१

लवो लेशे विनाशे च छेदने रामनन्दने।
लट्वा करञ्जभेदे स्यात् फले वाद्ये खगान्तरे ॥२२॥
लघ्वी लाघवयुक्तायां प्रभेदे स्यन्दनस्य च।
विश्वा त्वतिविषायां स्त्री जगति स्यान् नपुंसकम् ॥२३॥
न ना शुण्ठ्यां पुंसि देवप्रभेदेष्वखिले त्रिषु।
विल्वं फले श्रीफले ना शवःस्यान् कुणपे पुमान् ॥२४॥
नपुंसकन्तु पानीये शिवि भूर्ज्जे नृपे पुमान्।
शिवो मोचेमचादेवे कीलकग्रहयोगयोः ॥२५॥
वालुके गुग्गुलौ वेदे पुण्डरीकद्रुमे पुमान्।
सुखक्षेमजले क्लीव शिवा झाटामलौषधौ ॥२६॥
अभयामलकीगौरी फेरुसक्तुफलास्वपि।
शुल्व ताम्रे यज्ञकर्म्मण्याचारे जलसन्निधौ ॥२७॥
सत्व गुणे पिशाचादौ वले द्रव्यस्वभावयोः।
आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जन्तुषु ॥२८॥
सयो यज्ञे च सन्ताने सान्त्वं दाक्षिण्यसामनोः।
स्रुवा द्वयो र्यज्ञपात्रे शल्लकीमूर्व्वयोः स्त्रियाम् ॥ २९॥
ह्रव आह्वाध्वराह्वाने ह्रस्वो न्यक्खर्व्वयो स्त्रिषु।

वत्रिकम्।

अक्षीव वशिरे शिग्रौ नाऽमत्ते पुनरन्यवत् ॥३०॥

अभावो मरणेऽसत्त्वे आहवो युद्धयज्ञयोः ।
आर्त्तवं स्त्रीरजःपुष्पे क्लीवं स्यादृतुजे त्रिषु ॥३१
आश्रवोऽङ्गीकृतौ क्लेशे नाऽन्यवत् वचनस्थिते ।
उद्भवो यादवभिदि मखे च क्रतुपावके ॥३२॥
उत्सवो मह उल्लेके इच्छाप्रसवकोपयोः ।
कारवी मधुरादीप्यत्वक्पत्रीकृष्णजीरके ॥३३॥
कितवस्तु पुमान् मत्ते वञ्चके कनकाह्वये ।
केशवोऽजे च पुन्नागे पुंसि केशवति त्रिषु ॥३४॥
कैतवन्तु छले द्यूते कैरवः कितवे रिपौ ।
नपुंसकञ्च कुमुदे चन्द्रिकायान्तु कैरवी ।
गाण्डीवो गाण्डिवश्चास्त्री कार्म्मुकेऽर्जु
गालवस्तु मुनौ लोध्रे ताण्डवोऽस्त्री तृण
भवेदुद्धतनृत्ये च त्रिदिवा सरिदन्तरे ।
पुंसि स्वर्गे दीदिविर्ना धिषणेऽन्ने तद
निष्पावः शूर्पपवने राजमाषे कडङ्ग
पवने शिम्बिकायां ना निर्विकल्पेऽन्य
निह्नवः पुंसि निकृताववि श्वासापः
पल्लवोऽस्त्री किसलये विटपे विस्तरे
... ऽलक्तरागे च प्रभावः शान्तितेः
... नां भावे प्राणानामत्यये

लवे ...ऽ जन्ममूले स्याज् जन्महेतौ पराक्रमे।
...नस्य चादिमस्थाने प्रसवो गर्भमोचने ॥४१॥
उत्पादे स्यादपत्येऽपि फले च कुसुमेऽपि च।
प्रसेवः पुंसि वीणाङ्गे स्यूते च पार्थिवो नृपे ॥४२॥
पार्थिवी तु सीतायां स्त्री पृथिव्या विकृतौ त्रिषु।
पुङ्गवः स्याद् बलीवर्दे प्रभेदेऽप्यौषधस्य च ॥४३॥
उत्तरस्थः पुनः श्रेष्ठे फेरवो जम्बुकेऽसुरे।
बल्लवः सूपकारे स्याद् भीमसेने च गोदुहि ॥४४॥
बान्धवो ज्ञातिसुहृदो र्भार्गवो गजधन्विनोः।
शुक्रे परशुरामे च भार्गवी पार्वतीश्रियोः ॥४५॥
दूर्वायां भैरवः पुंसि शङ्करे भीषणे त्रिषु।
माधवोऽजे मधौ राधे आद्ये ना स्त्रिया मिसौ ॥४६॥
मधुशर्करावासन्तीकुट्टनीमदिरासु च।
गोमहिष्यादिसम्पत्तौ यादवः पुंसि केशवे ॥४७॥
राजीवं नलिने ना तु भेदे हरिणमीनयोः।
राघवोऽब्धे मंहामोनभेदे च रघुवंशजे ॥४८॥
रौरवो नरके घोरे वड़वा द्विजयोषिति।
अश्वायां कुम्भदास्याञ्च नारीजात्यन्तरेऽपि च ॥४९॥
वाड़वं करणे स्त्रीणां घोटकौघे नपुंसकम्।
पाताले न स्त्रियां पुंसि ब्राह्मणे वड़वानले ॥५०॥

विभवो रैमोक्षैश्वर्य्ये विद्रवो विद्रुतौ धियि।
विभावः स्यात् परिचये रसस्योद्दीपनादिषु ॥५१॥
आत्रवं भावसंवत्योः शत्रूणां आत्रवो द्विषि।
याड़वो गानरसयोः सचिवो मन्त्रिणि स्मृतः ॥५२॥
सहाये सम्भवो हेतावुत्पत्तौ मेलकेऽपि च।
आधारानतिरिक्तत्वेऽप्याधेयस्य निगद्यते ॥५३॥
सुग्रीवो वासुदेवस्य हये शाखामृगेश्वरे।
सुपवी कारवेल्ले स्यात् कृष्णजीरकजीरयोः ॥५४॥
सैन्धवोऽस्त्री माणिमन्थे नाऽश्वे सिन्धुभवे त्रिषु।

वचतुष्कम्।

अनुभावः प्रभावे स्यात् निश्चये भावबोधके ॥५५॥
भवेदभिषवः स्नाने मद्ये सन्धानयज्ञयोः।
अपह्नवस्तु पुंलिङ्गः स्मृतः स्नेहापलापयोः ॥५६॥
आदीनवः पुमान् दोषे परिक्लेशदुरन्तयोः।
उपप्लवः सैंहिकेये विप्लवोत्पातयोरपि ॥५७॥
कुशीलवस्तु वाल्मीकौ नटयाचकयोरपि।
जलबिल्वः कर्कटे स्यात् पञ्चाङ्गे जलचत्वरे। ५८॥
जीवञ्जीव चकोरे स्याद् द्रुमभेदेऽपि पुंस्ययम्।
धामार्गवस्तु पुंसि स्यादपामार्गे च घोषके ॥५९॥
पारिप्लवश्चाकुले स्याद् चञ्चले च पराभवः।

तिरस्कारे विनाशे च पुंसि पारशव पुमान् ॥६०॥
परस्त्रीतनये शस्त्रे द्विजात् शूद्रासुतेऽपि च।
पुटग्रीवस्तु पुंलिङ्गो गर्गरीताम्रकुम्भयोः ॥६१॥
बलदेवो बले वाते त्रायमाणौषधौ स्त्रियाम्।
रन्तिदेवस्तु नृपते र्भेदे च गरुड़ध्वजे ॥६२॥
रोहिताश्च श्चित्रभानौ हरिश्चन्द्रनृपात्मजे।
अथ शीतशिवं क्लीवं शैलेयमाणिमन्थयोः ॥६३॥
पुंसि सक्तुफलावृक्षे तथा मधुरिकौषधौ।
सहदेवा बलादण्डोत्पलयोः शारिवौषधौ ॥६४॥
सहदेवी तु सर्पाच्यां पुंसि स्यात् पाण्डवे पुनः।

वपञ्चकम्।

आशितम्भवमन्नाद्ये हण्ौ स्यादाशितम्भवः ॥६५॥

वान्तवर्गः समाप्तः।

शैककम्।

शं वदन्ति बुधाः श्रेयः शश्च शस्त्रं निगद्यते।
शी च शयनमित्याहुः शास्त्रं शा च निगद्यते ॥१॥

शद्विकम्।

अंशुरर्कप्रभोस्त्रेषु नाऽऽशा तृष्णादिशोः स्त्रियाम्।
आशु धान्यान्तरे शीघ्रेऽपीशा लाङ्गलदण्डके ॥२॥

ईशः प्रभौ महादेवे काशी वाराणसीपुरे ।
न स्त्रियां तृणभेदे स्यात् कीशो दिगम्बरे कपौ ॥३॥
कुशी फाले कुशा रज्ज्वां त्रिषु पापिष्ठमत्तयोः ।
योक्त्ररामसुतद्वीपे ना दर्भेऽस्त्री कुशं जले ॥४॥
केशः स्यात् पुंसि वरुणे ह्रीवेरे कुन्तलेऽपि च ।
क्लेशो दुःखेऽपि कोपेऽपि व्यवसायेऽपि दृश्यते ॥५॥
कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके ।
जातिकोपे ऽर्थसङ्घाते पेश्यां शब्दादिसंग्रहे ॥६॥
दर्शस्तु स्याद्मावस्यायागभेदावलोकने ।
दंशः कीटविशेषे च वर्म्मदंशनयोः पुमान् ॥७॥
दशा वस्त्रादोपवर्त्त्यां वस्त्रान्ते भूम्नि योषिति ।
दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके ॥८॥
नाशः पलायनेऽपि स्यात् निधनानुपलम्भयोः ।
निशा दारुहरिद्रायां स्यात् त्रियामाहरिद्रयोः॥९॥
पशुः मृगादिदेवाजे नाऽव्ययं पशु दर्शने ।
पाशः केशादिपूर्वः स्यात् तत्सङ्घे कर्णपूर्व्वकः ॥१०॥
सुकर्णे च खसामर्थ्यात् मृगपक्ष्यादिबन्धने ।
पांशुर्धूलौ च शस्यार्थचिरसञ्चितगोमये॥११॥
पेशी सुपक्वकलिके मांस्यां खड्गपिधानके ।
मांसपीण्डामण्डभेदे राशि र्मेषादिपुञ्जयोः ॥१२॥

वंशः पुंसि कुले वेणौ पृष्ठावयववर्गयोः।
वशा बन्ध्यासुतायोषास्त्रीगवीकरिणीषु च ॥१३॥
त्रिष्वायत्ते क्लीवमायत्तत्वे चेच्छाप्रभुत्वयोः॥
विट् पुंसि मनुजे वैश्ये वेशो वेश्यागृहे गृहे ॥१४॥
नेपथ्ये च शशो बोले लोध्रे नृपशुभेदयोः।
स्पर्शो रुजायां दाने च स्पर्शने स्पर्शकेऽपि च ॥१५॥
स्पर्शः स्यात् सम्पराये च प्रणिधावपि पुंस्ययम्।

शान्तिकम्।

आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि ॥१६॥
उड्डीशो ग्रन्थभेदे स्यादुड्डीशश्चन्द्रिकापतौ।
उपांशु र्जपभेदे स्यादुपांशु विजनेऽव्ययम् ॥१७॥
कपिशस्त्रिषु श्यावे स्त्री माधव्यां सिह्लके पुमान्।
कर्कशः काशमर्देचुकाम्पिल्येष्वयसौ पुमान् ॥१८॥
त्रिषु साहसिके क्रूरे दृढ़ामसृणनिर्दये।
कीनाशः कर्षकक्षुद्रोपांशुघातिषु वाच्यवत् ॥१९॥
यमे ना कुलिशो न स्त्री दम्भोलौ ना झषान्तरे।
गिरिशोऽद्रिपतौ वाचस्पतिशङ्करयोः पुमान् ॥२०॥
तुङ्गीशस्तु पुमान् गौरीवक्षभेदिमदीधितौ।
दुःस्पर्शो धन्वयासे ना कण्टकार्यां स्त्रियां त्रिषु।
खरस्पर्शेऽथ निस्त्रिंशः खड्गे ना निर्दये त्रिषु ॥२१॥

निर्वेशस्तु पुमान् भोगे वेतने मूर्च्छनेऽपि च।
निवेशः पुंसि विन्यासे शिविरोद्वाहयोरपि ॥२२॥
निर्देशः शासनेऽपि स्यात् कथनोपान्तयोरपि।
नीकाशो निश्चये तुल्ये पलाशं छदने मतम् ॥२३॥
शठीकिंशुक रक्षःसु पुंसि स्याद् हरिते त्रिषु।
प्रकाशस्तु स्फुटे ख्याते प्रहासातपयोरपि ॥२४॥
प्रदेशो देशमात्रे स्यात् तर्जन्यङ्गुष्ठसम्मिते।
भित्तावपि च पिङ्गाशी नीलिकायां नपुंसकम् ॥२५॥
जात्यस्वर्णे पुमान् पल्लीपतौ मत्स्यान्तरेऽपि च।
वालिशस्तु शिशौ मूर्खे भूकेशः शैवले वटे ॥२६॥
भूकेश्यवरगुजेऽपि स्यात् लोमशो मुनिमेषयोः।
लोमान्विते स्त्रियां काकजङ्घामांसीवचासु च ॥२७॥
शृङ्कशिम्बि महामेदाकाशीशे शाकिनीभिदि।
विवशस्त्विष्ववश्यात्मारिष्टदुष्टधियोरपि ॥२८॥
विकाशः पुंसि विजने प्रकाशे सदृशं समे।
उचिते चाथ संवेशः स्वापस्त्रीरतबन्धयोः ॥२९॥
सुखाशो वरुणे राजतिनिशे सुखभोजने।
हताशो निर्दये चाशारहिते पिशुनेऽपि च ॥३०॥

शचतुष्कम्।

[दे]शः पुमान् लक्ष्ये निमित्तव्याजयोरपि।

अपभ्रंशस्तु पतने भाषाभेदापशब्दयोः ॥३१॥
आश्रयाशः पुमान् वह्नौ त्रिषु चाश्रयनाशके।
उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि ॥३२॥
उपदंशो विदंशे च मेढ्ररोगान्तरेऽपि च।
कूरदृक्‌पिशुने वाच्यलिङ्गः पुंसि शनैश्चरे ॥३३॥
खण्डपर्शुः पशुरामे शङ्करे चूर्णलेपिनि।
खण्डामलकभैषज्ये सिंहिकातनयेऽपि ना ॥३४॥
जीवितेशो यमे पुंसि त्रिषु स्याज्जीवितेश्वरे।
नागपाशः पुमान् स्त्रीणां करणे वरुणायुधे ॥३५॥
पञ्चदशी त्वमावास्यापौर्णमास्योश्च योषिति।
प्रतिस्पशः सहाये स्याद्‌ वात्ताहरपुरोगयोः ॥३६॥
परिवेशो वेष्टने स्यात्‌ परिधावपि पुंस्ययम्।
पादपाशी खड्गुकायां शृङ्खलायामपि स्त्रियाम् ॥३७॥
पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च।
हुतशेषे च भूमिस्पृक् पुंसि मानुषवैश्ययोः ॥३८॥

शान्तवर्गः समाप्तः।

पैकंकम्।

पः कचे पुंसि विज्ञेयः श्रेष्ठे स्यादभिधेयवत्।
क्षः सवर्णे राक्षसे च नरसिंहे च विद्युति ॥१॥
क्षेत्रे नाशे क्षेत्रपाले क्षि र्निवासे गतौ क्षये।

पद्दिकम्।

अक्षो ज्ञातार्थशकटव्यवहारेषु पाशके ॥२॥
रुद्राक्षेन्द्राक्षयोः सर्पे विभीतकतरावपि।
चक्रे कर्षे पुमान् क्लीबं तुत्थे सौवर्चलेन्द्रिये ॥३॥
उषा बाणसुतारात्र्योरुषः कामिनी गुग्गुलौ।
रात्रिशेषे उषायान्तु केचिदाहुः स्तदव्ययम् ॥४॥
उषः क्षारमृत्तिकायां प्रभातेऽपि पुमानयम्।
तत्सन्ध्यायाञ्च रन्ध्रे च चन्दनाद्रौ अवोविन्ने ॥५॥
त्विषि वेदे वशिष्ठादौ दीधितौ च पुमानयम्।
ऋक्षः पर्व्वतभेदे स्याद् भल्लूके शोणके पुमान् ॥६॥
क्षतवेधनेऽन्यलिङ्गो नक्षत्रे पुन्नपुंसकम्।
कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे ॥७॥
स्पर्द्धास्पदे ना दोर्मूले कच्छवीरुत्तृणेषु च।
कर्षो ना कर्षणे मानप्रभेदेऽस्त्रनपुंसकम् ॥८॥
कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याष्टिखातदोः।

ची तुवरिकायाञ्च सैराष्ट्रम्त्यपि स्त्रियाम् ॥९॥
पोऽस्त्री कुद्मले पात्रे दिव्ये खड्गपिधानके ।
निकोषेऽर्थसङ्घाते पेश्यां शब्दादिसङ्कुचे ॥१०॥
प आभीरपल्ल्या स्याद् गोपालध्वनिघोषके ।
स्ये चाम्बुदनादे ना घोषा मधुरिकौषधौ ॥११॥
चो गोत्रे शुचौ दचे तथा तीक्ष्णमनोज्ञयोः ।
षा नागबलायां स्त्री तापमत्स्याटवीष ना ॥१२॥
र्वौलिषोदन्ययोस्त्विट कान्तौवाचिरुचौस्त्रियाम् ।
पोधान्यत्वगचद्रोस्तृषा लिप्साल्पोःस्त्रियाम् ॥१३॥
ट् लिप्सायामुदन्यायां स्मरप ुत्र्यामपि स्त्रियाम् ।
च त्रिपु पटौ पुंसि ताम्रचूडे प्रजापतौ ॥१४॥
निभेदे हरवृषे द्रुमभेदे स्त्रियां भुवि ।
ोष-स्याद् दूषणेपापे दोषा रात्रौ भुजेऽपिच ॥१५॥
माङ्गो मत्स्यात् खगे काके तत्त्वके भिक्षुकेऽपि च ।
माङ्गीककोलिकायां स्यान्न्युत्कार्त्त्वैव ह्वणेऽपिच ॥१६॥
क्लीवेऽथ पुंसि महिषे निकृष्टे पुनरन्यवत् ।
त्रो जटीगर्दभाण्डदीपभित् कुञ्जराशने ॥१७॥
त्रो मासार्द्धके पार्ष्णिग्राहि साध्यविरोधयोः ॥
केशादेः परतो वृन्दे बले सखिसहाययोः ॥१८॥
त्रुक्षोरन्ध्रे पतत्रे च वाजे कुञ्जरपार्श्वयोः

नहुषो नागभेदे स्यात् सोमवंशनृपेऽपि च ॥३८
निकषः शाणफलके निकषा यातुमातरि।
निमेषनिमिषौ कालप्रभेदेऽक्षिनिमीलने ॥३९॥
परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवत्।
प्रदोषः समये दोषे प्रत्यूषोऽहर्मुखे वसौ ॥४०॥
पीयूषं सप्तदिवसावधिक्षीरे तथामृते।
पुरुषः पूरुषे साङ्ख्ये च पुन्नागपादपे ॥४१॥
पौरुषं पुरुषस्य स्याद् भावे कर्मणि तेजसि।
ऊर्द्धविस्तृतदोःपाणिनृमाने त्वभिधेयवत् ॥४२॥
महिषी कृताभिषेकायां स्त्रियामोषधिभिद्यपि।
मारिषः शाकभिद्यार्य्ये नाट्योक्त्या पुंसि योषिति ॥४३॥
दक्षाम्बायां मृगाक्षी तु विशालामृगनेत्रयोः।
रक्ताक्षः कासरे क्रूरे पारावतचकोरयोः ॥४४॥
रोहिषं कत्तृणे क्लीबं पुंसि स्याद् हरिणान्तरे।
विश्लेषो विधुरेऽयोगे शुश्रूषा स्यादुपासने ॥४५॥
कथने श्रोतुमिच्छायां शैलूषो नटबिल्वयोः।
संघर्षस्तु प्रमोटेऽपि स्पर्द्धायाञ्च प्रभञ्जने ॥४६॥
सङ्कर्षः स्यात् पुमान् घृष्टौ स्पर्द्धायामपि दृश्यते।
समीक्षा तु स्त्रियां तत्त्वे बुद्धावपि निभालने ॥४७॥

षचतुष्कम् ।

ानुकर्षो रथाधःस्थदारुण्यप्यनुकर्षणे ।

अम्बरीषं रणे भ्राष्ट्रे क्लीवं पुंसि नृपान्तरे ॥४८॥

ारकस्य प्रभेदे च किशोरे भास्करेऽपि च ।

आम्रातकेऽनुतापे चानिमेषो मत्स्यदेवयोः ॥४९॥

अनुतर्षः सुरापानपात्रे तृष्णाभिलाषयोः ।

अहिद्विट् गरुडे शक्रे मयूरे नकुले पुमान् ॥५०॥

अलम्बुषः प्रहस्ते च छर्द्दने राक्षसान्तरे ।

अलम्बुषा तु मुण्डीर्य्यां स्वर्गवाराङ्गनान्तरे ॥५१॥

अथ किम्पुरुषो लोकभेदकिन्नरयोः पुमान् ।

देववृक्ष. सप्तपर्णे मन्दारादिषु गुग्गुलौ ॥५२॥

नन्दिघोषोऽर्जुनरथे घोषे वन्दिजनस्य च ।

परिवेषस्तु पुलिङ्गः परिधौ परिवेषणे ॥५३॥

परिघोषो निनादे स्यादवाच्ये जलदध्वनौ ।

पलङ्कषा गोक्षुरके रास्नागुग्गुलुकिंशुके ॥५४॥

मुण्डोरीलाक्षयोश्च स्त्री राक्षसे तु पलङ्कष. ।

वीरवृक्षो भल्लातककुभद्रुमयोः पुमान् ॥५५॥

भूतवृक्षस्तु शाखोटद्रुमे श्योनाकपादपे ।

महाघोषा तु कर्कटशृङ्ग्यां पुंस्यतिघोषणे ॥५६॥

क्लीवं हट्टे राजवृक्षः सुवर्णाकपियालयोः ।

वातरूपस्तु वातूलोत्कचयोः शक्रकार्मुके ॥५७॥
विशालाक्षो हरे तार्क्ष्ये ना सुनेत्रेऽभिधेयवत् ।
सकटाक्षो वराहे ना कटाक्षसहिते त्रिषु ॥५८॥
षान्तवर्गः समाप्तः ।

सैककम् ।

सा जीवेच्छे पञ्चवक्त्रे भृगौ भसि निशापतौ ।
शक्तौ तु सा स्त्रियां सस्तु प्रसवे गर्भमोचने ॥१॥

सद्विकम् ।

कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे तु ना ।
कासूर्विकलवाचि स्यात् तथा शक्त्यायुधे स्त्रियाम् ॥२॥
गुत्सः स्यात् स्तवके स्तम्बे हारभिद्ग्रन्थिपर्णयोः ।
गोसो बोलोपसो यास इक्षुपत्त्रिभिदोः पुमान् ॥३॥
त्रासो भये मणेर्दोषे दासो बाणाभुजिष्ययोः ।
दासो भृत्ये च शूद्रे च ज्ञातात्मनि च धीवरे ॥४॥
नासा तु नासिकायाञ्च द्वारोर्द्ध्वदारुणि स्त्रियाम् ।
प्रसूरश्वाजनन्योश्च कन्दलीवीरुधोः स्त्रियाम् ॥५॥
वसुर्ना देवभेदाग्निभायोक्त्रवकराजसु ।
नीचैर्वक्तौपधे श्याम रैरन्ते मधुरे त्रिषु ॥६॥

भास्प्रभावे मयखेल्री मासश्चन्द्रमासयोः पुमान् ॥७॥
मांसं स्यादामिषे क्लीव कक्कोलीजटयो: स्त्रियाम्।
मिसि स्त्री मधुरामास्यो: शतपुष्पाजमोदयोः ॥८॥
रसा काञ्च्यां अ्रीष्टम्दि रसो गन्धरसे जले।
शृङ्गारादौ विषे वीर्य्ये तिक्तादौ द्रवरागयोः ॥९॥
देहधातुप्रभेदे च पारदस्वादयोः पुमान्।
स्त्रियान्तु रसनापाठाशल्लकीकङ्गुभूमिषु ॥१०॥
रासः कोलाहले ध्वाने भाषाशृङ्खलकेऽपि च।
क्रीडाभेदे च गोपानां वत्सः पुत्रादिवर्षयोः॥११॥
तर्णके नोरसि क्लीवं व्यासो ना विस्तृतौ मुनौ।
शुसा वचसि वाञ्छाया हस. स्यात् मानसौकसि॥१२॥
निर्लोभनृपविष्णुर्क्के परमात्मनि मत्सरे।
योगिभेदे मन्त्रभेदे शरीरमरुदन्तरे ॥१३॥
तुरङ्गमप्रभेदेऽपि हिंसा चौर्य्यादिघातयोः।

सचिकम्।

अलसा हंसपदा ना पादरोगद्रुमेदयोः ॥१४॥
क्रियामन्दे चिम्बधार्च्चिर्मयूखशिखयोर्न ना।
अदस् परस्मिन्नत्र स्यादभ्यासोऽभ्यसनेऽन्तिके॥१५॥
आगोऽपराधे पापे स्यादाश्वास पुंसि निर्वृतौ।
आख्यायिकापरिच्छेदे चाशीर्दन्ते मरुद्भुजाम् ॥१६॥

हितस्याशंसने स्त्री स्यादिष्वासः कार्म्मुके पुमान्।
त्रिषु स्यात् क्षेपके चेषोरुच्छ्वासः प्राणनेऽपि च ॥१७॥
आख्यायिका परिच्छेदेऽप्याश्वासेऽपि पुमानयम्।
उत्तंसः कर्णपूरेऽपि शिखरेऽपि च नस्त्रियाम् ॥१८॥
उषस् प्रत्यूषसि क्लीबं पितृप्रसाश्च योषिति।
उरस् वक्षसि च श्रेष्ठेऽप्येनः पापापराधयोः ॥१९॥
ओजस् दीप्ताववष्टम्भे प्रकाशबलयोरपि।
ओकस् आश्रयमात्रे च मन्दिरे च नपुंसकम् ॥२०॥
कीकसः कृमिजातौ स्यात् पुंसि कुल्ये नपुंसकम्।
चमसो यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियाम् ॥२१॥
छन्दस् पद्ये च वेदे च स्वैराचाराभिलाषयोः।
ज्यायान् वृद्धेऽतिप्रशस्ते ज्योतिरग्नौ दिवाकरे ॥२२॥
पुमान् नपुंसकं दृष्टौ स्यान् नक्षत्रप्रकाशयोः।
तरो बले च वेगे च तपो लोकान्तरेऽपि च ॥२३॥
चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः।
तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे ॥२४॥
तामसी निशि दुर्गायां तामसो भुजगे खले।
तेजो दीप्तौ प्रभावे च स्यात् पराक्रमरेतसोः ॥२५॥
धनुः पियाले ना नस्त्री राशिभेदे शरासने।
धनुर्द्धरे त्रिषु नभः क्लीबं व्योम्नि पुमान् घने ॥२६॥

घ्राणश्रावणवर्णास्तु बिसतन्तौ पतद्ग्रहे ।
पनसः कण्टकीफले कण्टके वानरान्तरे ॥२७॥
स्त्रियां रोगप्रभेदे स्यात् पयस् स्यात् क्षीरनीरयोः ।
पायसस्तु क्लीवपुंसोः श्रीवासपरमान्नयोः ॥२८॥
पुक्कसी कलिकानील्योः पुक्कसः श्वपचेऽधमे ।
बीभत्सो नाऽर्ज्जुने क्रूरघृणात्मविकृते त्रिषु ॥२९॥
भूयान् त्रिषु बहुतरे पुनरर्थे त्वदोऽव्ययम् ।
मनस् चित्ते मनीषायां मह उत्सवतेजसोः ॥३०॥
मानसं सरसि स्वान्ते रभसो वेगहर्षयोः ।
रहस् तत्त्वे रते गुह्ये रजस् क्लीवं गुणान्तरे ॥३१॥
आर्त्तवे च परागे च रेणुमात्रे च दृश्यते ।
राक्षसो यातुधाने स्याच् चण्डायां राक्षसी स्मृता ॥३२॥
रेपाः स्यादधमे क्रूरे कृपणेऽप्यभिधेयवत् ।
रेतस् शुक्रे पारदे च रोदश्च रोदसीति च ॥३३॥
दिवि भूमौ पृथक् च स्यात् सहोक्त्याप्येनयोस्तथा ।
लालसौत्सुक्यतृष्णातिरेकयाञ्चासु च द्वयोः ॥३४॥
वयस् पक्षिणि बाल्यादौ यौवने च नपुंसकम् ।
वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि ॥३५॥
पुंसि चन्द्रस्य तनये बर्हिस् पुंसि हुताशने ।
नस्ती कृशे वपुस् क्लीवं तनौ शस्ताकृतावपि ॥३६॥

वतंसस्तु पुमान् कर्णपूरशेखरयोरपि।
वाचसो जलनिर्याने शयानौ सुनिषण्णके ॥३७॥
वायसोऽगुरुवृक्षे च श्रीवासध्मांक्षयोः पुमान्।
काकोडुम्बरिकायाञ्च काकमाच्याञ्च वायसी ॥३८
विद्वानात्मविदि प्राज्ञे पण्डिते चाभिधेयवत्।
विलासो हावभेदे स्याल् लीलायामपि पुंस्ययम्॥३९।
वीतंसो बन्धनोपाये मृगाणां पक्षिणामपि।
तेषामपि च विश्वासहेतोः प्रावरणेऽपि च ॥४०॥
वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि।
शिरस् प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च ॥४१॥
श्रीवासो वृकधूपे स्यात् पङ्कजे मधुसूदने।
श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत् ॥४२॥
श्रेयसी करिपिप्पल्यामभयापाठयोरपि।
सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः ॥४३॥
सरसी विस्मे कासारे सरो नीरतडागयोः।
स्यात् समासस्तु पुंलिङ्गः सङ्क्षेपे च समर्थने ॥४४॥
सारसः पक्षिभेदेन्द्वोः क्लीवन्तु सरसीरुहे।
साहसन्तु बलात्कारदुष्टकार्ये दमेऽपि च ॥४५॥
सुरसन्तु त्रिषु स्वादौ पर्णासे तु नपुंसकम्।
स्त्री रास्नानागमात्रोश्च स्रोतोऽम्बुवेग इन्द्रिये ॥४६॥

विहितव्यमात्रे च सर्पिष्यपि नपुंसकम्।

सचतुष्कम्।

अधिवासो निवासे स्यात् संस्कारे धूपनादिभिः ॥४७॥
अवध्वंसः परित्यागे निन्दनेऽप्यवचूर्णने।
अवतंसो नस्त्रियां स्यात् कर्णपूरे च शेखरे ॥४८॥
अगौकाः पुंसि शरभे पक्षिपञ्चास्ययोरपि।
उदर्च्चिरुत्प्रभे वाच्यलिङ्गः पुंसि हुताशने ॥४९॥
कलहंसस्तु कादम्बे राजहंसे नृपोत्तमे।
कनीयानतियुनि स्यादत्यल्पानुजयोः स्त्रिषु ॥५०॥
कुम्भीनसः क्रूरसर्पे स्त्रियां लवणमातरि।
भवेद् घनरसः सान्द्रनिर्य्यासे मोरटेऽम्बुनि ॥५१॥
कर्पूरे पीलुपर्ण्याञ्च सस्यक सिद्धरसेऽपि च।
चन्द्रहासो दशग्रीवकरवालेऽसिमात्रके ॥५२॥
जटायुः पुंसि सम्पातेः कनीयसि च गुग्गुलौ।
अथ तामरसं पद्मे ताम्रकाञ्चनयोरपि ॥५३॥
त्रिस्रोता जह्नुकन्यायां स्रोतस्वत्यन्तरेऽपि च।
दिवौकाश्च दिवौकाश्च पुंसि देवे च चातके ॥५४॥
दीर्घायुः शाल्मलीवृक्षे वायसे जीवकद्रुमे।
मार्कण्डेये च पुंसि स्याच्चिरञ्जीविनि वाच्यवत् ॥५५॥

नगौकाः पुंसि शरभे पक्षिपञ्चाख्ययोरपि।
निःश्रेयसन्तु कल्याणमोक्षयोः शङ्करे पुमान् ॥५६॥
नीलाञ्जसाऽप्सरोभेदे सरिद्भेदे च विद्युति।
प्रचेता पार्श्विनि मुनौ ना प्रहृष्टहृदि त्रिषु ॥५७॥
पुनर्वसु र्ना मुनिभिद्यजे द्वित्वे तु भान्तरे।
पौर्णमासः पुमान् यज्ञभेदे स्त्री पूर्णिमातिथौ ॥५८॥
महारसः स्यात् खर्ज्जूरे कोषकारकशेरुणोः।
मलीमसस्तु मलिने पुष्पकाशीशलोहयोः ॥५९॥
भवेन्मधुरसा द्राक्षामुर्व्विकादुग्धिकासु च।
यमस्वसा तु दुर्गायां यमुनायामपि स्त्रियाम् ॥६०॥
यवीयाननुजेऽपि स्यादतियूनि च वाच्यवत्।
रासेरसस्तु गोष्ठ्यां स्याद् रासशृङ्गारयोरपि ॥६१॥
रससिद्धो रसावासे पट्टीजागरकेऽपि च।
राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे ॥६२॥
वरीयान् योगभिच्छ्रेष्ठवरिष्ठेष्वतियूनि च।
विहायाः शकुनौ पुंसि गगने पुन्नपुंसकम् ॥६३॥
विभावसुः पुमान् सूर्य्ये हारभेदे च पावके।
श्वःश्रेयसन्तु कल्याणे परमात्मनि शर्म्मणि ॥६४॥
अथ सर्व्वरसो वाद्यभाण्डभेदे च धूनके।
सप्तार्च्चिः पावके पुंसि क्रूरचक्षुषि तु त्रिषु ॥६५॥

साधीयानतिवाढे स्यादतिसाधौ तु वाच्यवत्।
सिद्धरसो रसे पुंसि धातुप्रभृतिषु त्रिषु ॥६६॥
सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोः।
सुमेधास्तु स्त्रियां ज्योतिष्मत्यां त्रिषु सुबुद्धिनि ॥६७॥

सपञ्चकम्।

दिव्यचक्षुः सुगन्धस्य भेदे नाऽन्धे सुलोचने।
स्यान् नभश्चमसश्चन्द्रे चित्रापूपेन्द्रजालयोः ॥६८॥
हिङ्गुनिर्यास इत्येष निम्बे हिङ्गुरसेऽपि च।

सपद्मम्।

हिरण्यरेताः पुंसि स्याद् दिवाकरहविर्भुजोः ॥६९॥

सान्तवर्गः समाप्तः।

ह्वैककम्।

ह्वः शिवे सलिले शून्ये धारणे मङ्गलेऽपि च।
गगने नकुलीशे च रक्ते नाके च वर्ण्यते ॥१॥

ह्रद्विकम्।

अहिर्वृत्रासुरे सर्पे पुंसीशेद्यमवाञ्छयोः।
कुहः स्तौ कोकिलालापनष्टेन्दुकलदर्शयोः ॥२॥

ऽऽनुग्रहनिर्ब्बन्धग्रहणेषु रणोद्यमे।
सूर्य्यादौ पूतनादौ च सैंहिकेयोपरागयोः ॥३॥
ग्राहो ग्रहेऽवहारे च गुहः पाण्मातुरे गुहा।
सिंहपुच्छ्याञ्च गर्त्ते च पर्व्वतादेश्च गह्वरे ॥४॥
गृह गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि।
नाहस्तु वन्धने कूटे प्रोहो गजाङ्घ्रिपर्व्वणोः ॥५॥
वाच्यवत् निपुणे तर्के वर्हं पिच्छे दलेऽस्त्रियाम्।
बहु स्यात् त्र्यादिसङ्ख्यासु विपुलेऽप्यभिधेयवत् ॥६॥
मह्रीनद्यन्तरे भूमौ मह उत्सवतेजसोः।
अथ मोहो नृलिङ्गः स्यादविद्यायाञ्च मूर्च्छने ॥७॥
लोहोऽस्त्री शस्त्रके लौहे जोङ्गके सर्व्वतैजसे।
वहः स्याद् वृषभस्कन्धे वाहे गन्धवहेऽपि च ॥८॥
वाहो भुजे पुमान् मानभेदाश्ववृषवायुषु।
व्रीहिः सामान्यधान्ये स्यादाशुधान्ये तु पुंस्ययम् ॥९॥
व्यूहः स्याद् बलविन्यासे निर्म्माणे वृन्दतर्कयोः।
सहो बले नस्त्रियां स्यात् स्त्रियान्तु नखभेषजे ॥१०॥
दण्डोत्पलामुद्गपर्णीकुमारीपृथिवीषु च।
सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः ॥११॥
सिंही तु कण्टकार्य्यां स्याद् वार्त्ताकौ वासकेऽपि च।
स्नेहः स्यात्तु पुंसि तैलादिरसद्रव्ये च सौहृदे ॥१२॥

हत्रिकम्।

अत्यूहा नीलिकायां स्त्री कालकण्ठखगे पुमान्।
आग्रहोऽनुग्रहासक्त्योराक्रमे ग्रहणेऽपि च ॥१३॥
आरोहः स्त्रीवरोहे च वरारोहाकटावपि।
आरोहणे गजारोहे दैर्घ्ये च समुच्छ्रये ॥१४॥
उत्साह उद्यमे सूत्रे कटाहः कूर्म्मकर्परे।
द्वीपस्य च प्रभेदे स्यात् तैलादेः पाकभाजने ॥१५॥
जायमानविषाणाग्रमहिषीशावकेऽपि च।
कलहं युधि वाटे ना खड्गकोषे च भण्डने ॥१६॥
दात्यूहस्तु पुमान् कालकण्ठचातकपक्षिणोः।
निग्रहो भर्त्सनेऽपि स्यात् मर्य्यादायाञ्च बन्धने ॥१७॥
निर्य्यूहः शिखरे द्वारे निर्य्यासे नागदन्तके।
निरूहो वस्तिभेदे स्यादूहशून्ये च निश्चिते ॥१८॥
प्रग्राहस्तु तुलासूत्रे वृषादिप्रग्रहेऽपि च।
पटहो ना समारम्भे आनके पुन्नपुंसकम् ॥१९॥
प्रवहस्तु वहिर्यात्रा मातरिश्वप्रभेदयोः।
प्रग्रहस्तु तुलासूत्रे वन्द्यां नियमने भुजे ॥२०॥
हयादिरश्मौ रश्मौ च सुवर्णालुमहीरुहे।
प्रवाहस्तु प्रवृत्तौ स्यादपि स्रोतसि वारिणः ॥२१॥

अव्ययानि ।

अथाव्ययानि वक्ष्यन्ते व्यक्तं पूर्वादितैः क्रमैः ।
अकारादन्तता चास्मिन् तस्मादप्यतिरिच्यते ॥१॥

अ

अशब्दः स्यादभावेऽपि स्वल्पार्थप्रतिषेधयोः ।
अनुकम्पायाञ्च तथा वासुदेवे त्वनव्ययम् ॥२॥

आ

आ प्रगृह्यं स्मृतौ वाक्येऽनुकम्पायां समुच्चये ।

इ

इ खेदे च रुषोक्तौ चापाकरणानुकम्पयोः ॥३॥

ई

ई विषादेऽनुकम्पायां लक्ष्मीं पुनरनव्ययम् ।

उ

उ सम्बोधनरोषोक्त्योरनुकम्पानियोगयोः ॥४॥
पदस्य पूरणे पादपूरणेऽपि च दृश्यते ।

ऊ

ऊ वाक्यार [illegible] [illegible] दृश्यते ॥५॥

ऋ

ऋ वाक्यारम्भे रचायां वचः स्मृत्योरन्ययम् ॥६॥
देवमातायां दनौ चापि भैरवे दनुजे गतौ।

ऌ

ऌकारो देवतामातायां भुवि कुभ्रे च कीर्त्तितः ॥७॥

ॡ

ॡकारो देवनार्य्यां स्यात् नार्य्यात्मन्यपि मातरि।

ए

ए स्मृतावव्ययसूयानुकम्पामन्त्रणहूतिषु ॥८॥

ऐ

ऐ शब्दो दृश्यते हूतौ स्मृत्यामन्त्रणयोरपि।

ओ

ओ सम्बोधन आह्वाने स्मरणे चानुकम्पने ॥९॥

औ

औ शब्दः कथितो हूतौ तथा सम्बोधनेऽपि च।
स्त्री तु विश्वम्भरायां स्यात् पुमांस्तु निस्वने स्मृतः॥१०॥

कैककम्।

कु पापे चेषदर्थे च कुत्सायाञ्च निवारणे।

कद्विकम्।

धिक् भर्त्सने च निन्दायां

कद्विकम्।

मनागप्यल्पमन्दयोः ॥११॥

हिरुक् शब्दो विनार्थे च मध्यार्थेऽपि च दृश्यते।

गद्विकम्।

अङ्ग सम्बोधने हर्षे सम्भ्रमासूययोरपि ॥१२॥

ङद्विकम्।

आङ् सीमायामभिव्याप्तौ क्रियायोगेषदर्थयोः।

चैककम्।

चान्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये ॥१३॥

पक्षान्तरे तथा पादपूरणेऽप्यवधारणे।

चद्विकम्।

किञ्चारम्भे च साकल्ये प्राक् पूर्व्वस्मिन्नवान्तरे ॥१४॥

अग्रे प्रभातेऽतीते च देशे दिक्कालयोरपि।

चत्रिकम्।

तिर्य्यक् तिरोर्थे वक्रे च विरुद्धादौ त्वनव्ययम् ॥१५॥

ननु च प्रश्नदुष्टोक्त्योः सम्यक् दृढप्रशंसयोः।

ठद्विकम्।

सुष्ठु प्रशंसनेऽपि स्यादत्यर्थे च निगद्यते ॥१७॥

ठत्रिकम्।

अपष्ठु निरवद्ये च शोभनार्थे च दृश्यते।

णचतुष्कम्।

अन्तरेणपदं विद्याद् विनामध्यार्थयोरपि ॥१८॥

तैककम्।

तु पादपूरणे भेदे समुच्चयेऽवधारणे।
पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे ॥१९॥

तद्विकम्।

अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपि च।
नितान्तासम्मतिक्षेपवाचकोऽप्येष दर्शितः ॥२०॥
अस्तु स्यादभ्यनुज्ञानेऽप्यसूयापीडयोरपि।
प्रतिक्षेपे प्रशंसायां प्रकर्षे लक्षणेऽपि च ॥२१॥
असम्मत्यर्थ उद्दिष्टमिति हेतौ प्रकाशने।
निदर्शने प्रकारे स्यात् परकृत्यनुकर्षयोः ॥२२॥
समाप्तौ च प्रकरणेष्वतात्पर्यविकल्पयोः।
समुच्चये वितर्के च प्रश्ने च पादपूरणे ॥२३॥
उत स्यात् प्रश्ने वितर्के च चेत् कुत्सितप्रशंसयोः।
पक्षान्तरेऽप्यसाकल्ये जातुशब्दो विगर्हणे ॥२४॥

कदाचिदर्थेऽपि तथा नेत् विकल्पनिषेधयोः ।
प्रति प्रतिनिधावित्थम्भूताख्यानाभिमुख्ययोः ॥२५
मात्रार्थभागवीप्सासु लक्षणप्रतिदानयोः ।
बत मन्त्रणसन्तोषखेदानुक्रोशविस्मये ॥२६॥
स्वस्ति स्यात् मङ्गले पुण्येऽप्याशंसायामपि क्वचित्
स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे ॥२७॥
हन्त वाक्यारम्भखेदविषादहर्षसम्भ्रमे ।

तत्रिकम् ।

आरात् दूरे समीपे च कच्चित् कामप्रवेदने ॥२८॥
प्रश्ने हर्षे मङ्गले च किमुत प्रश्नतर्कयोः ।
विकल्पेऽतिशयेऽपि स्यात् तावत् मानेऽवधारणे॥२९
सम्भ्रमे च परिच्छेदे तथा कार्त्स्न्याधिकारयोः ।
पश्यत् स्यात् प्रशंसायां विस्मये च निगद्यते ॥३०॥
पश्चात् प्रतीच्यां चरमेऽप्यधिकारेऽपि दृश्यते ।
यद्वत् प्रश्ने वितर्के च यावत् कार्त्स्न्येऽवधारणे ॥३१॥
प्रशंसायां परिच्छेदे मानाधिकारसम्भ्रमे ।
पक्षान्तरे च शश्वत् स्यादनुप्रश्ने च मङ्गले ॥३२॥
पुरा कल्पे सदार्थे च पुनरर्थे च दृश्यते ।
सकृत् सहैकवारे स्यात् साक्षात् प्रत्यक्षतुल्ययोः॥३३

तचतुष्कम्।

अहोवतानुकम्पायां खेदे सम्बोधनेऽपि च।
पुरस्तात् प्रथमे प्राच्यामग्रतोऽर्थपुरार्थयोः ॥३४॥

यद्विकम्।

अथाथो संशये स्यातामधिकारे च मङ्गले।
विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये ॥३५॥
तथाऽभ्युपगमे पृष्टप्रतिवाक्ये समुच्चये।
सदृशे निश्चयेऽपि स्यात् यथा तुल्यार्थमानयोः ॥३६॥
प्रशंसायां वृथा वन्ध्ये

यत्रिकम्।

निष्कारणेऽन्यथा पुनः।
वितथे चापरार्थे च सर्व्वथा हेतुवादयोः ॥३७॥

दद्विकम्।

उत्प्रकाशे विभागे च प्राबल्या स्वास्थ्यशक्तिषु।
प्राधान्ये बन्धने भावे मोक्षे लाभोर्द्ध कर्म्मणोः ॥३८॥
यद् गर्हाहेत्ववधृत्यो र्यदि गर्हा विकल्पयोः।

धद्विकम्।

अधि स्यादधिकारे चापीश्वरे च निगद्यते ॥३९॥

नैककम्।

न स्यात् निषेधोपमयो र्नि निवेशस्त्वशार्थयोः।

नित्यार्थसंशयक्षेपकौशलोपरमेषु च ॥ ४० ॥
सामीप्याश्रयदानेषु मोक्षान्तर्भावबन्धने ।
राज्यधोभावविन्यासे नु वितर्कापमानयोः ॥४१॥
विकल्पानुनयातीते प्रश्ने चेत्वपदेशयोः ।

नद्विकम् ।

अनु हीने सहार्थे च पश्चात् सादृश्ययोरपि ॥४२॥
लक्षणेत्थम्भूताख्यानभागवीप्सास्वनुक्रमे ।
आयामे च समीपे च किन्नु प्रश्नवितर्कयोः ॥४३॥
चन विस्मये साकल्ये ननु शब्दो विनिग्रहे ।
अनुप्रश्ने परकृतावधिकारे च सम्भ्रमे ॥४४॥
आमन्त्रणेऽप्यनुनये प्रश्नानुज्ञावधारणे ।
नानाशब्दो विनार्थेऽपि तथानेकोभयार्थयोः ॥४५॥
स्थाने तु कारणार्थे स्याद् युक्तसादृश्ययोरपि ।

पद्विकम ।

अप स्यादपकृष्टार्थे वर्जनार्थवियोगयोः ॥४६॥
विपर्य्यये च विकृतौ चौर्य्ये निर्देशहर्षयोः ।
अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये ॥४७॥
तथा युक्तपदार्थेऽपि कामकारक्रियासु च ।
उप स्यादधिकार्थे च हीनार्थासन्नयोरपि ॥४८॥

भद्रिकम्।

अभीत्यभूतकथने चाभिमुख्याभिलापयोः।

मैककम्।

मा वारणे विकल्पे च स्मातीते पादपूरणे ॥४९॥
स्मात् मङ्गले परक्कतौ

भद्रिकम्।

अमान्तिकसहार्थयोः।
आम् ज्ञाननिश्चयस्मृत्योरम् रोषेऽङ्गीकृतावपि ॥५०॥
प्रश्नेऽपि स्यादूम् रुषोक्तौ पृच्छायामोमुपक्रमे।
प्रणवे चाभ्युपगमे चापाकृतौ च मङ्गले ॥५१॥
कम् पादपूरणे तोये मस्तके च सुखेऽपि च।
किम् कुत्सायां वितर्के च निषेधप्रश्नयोरपि ॥५२॥
किमु सम्भावनायां स्यात् विमर्षे चापि दृश्यते।
नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च ॥५३॥
सम्भाव्यकुत्साप्राकाश्यविकल्पेऽपि च दृश्यते।
सम् कल्याणे सुखे सन्तु शोभनार्थसमार्थयोः ॥५४॥
सङ्गार्थे च प्रहृष्टार्थे सामिनिन्दार्द्धयोर्मतम् ॥
हम् रुषोक्तावनुनये ऊम् प्रश्नेऽप्यपोक्तौ ॥५५॥
अनुप्रश्नेऽभ्यनुज्ञायां ननु स्यात् प्रश्नवितर्कयोः।

मन्त्रिकम्।

अलम् भूषणपर्य्याप्तिवारणेषु निरर्थके ॥५६॥
एवमेवम् प्रकारे स्यादङ्गीकारेऽवधारणे।
अनुप्रश्ने परन्तार्थावुपमापृच्छयोरपि ॥५७॥
कथम् पूर्वे च गर्हायां प्रकारार्थे च सम्भ्रमे।
प्रश्ने सम्भावनायाञ्च कामम् चानुमतौ स्मृतम् ॥५
प्रकामे चाप्यसूयायां तथानुगमनेऽपि च।
जोषम् सुखे प्रशंसायां तूष्णीं लज्जनयोरपि ॥५८
नूनन्तु निश्चिते तर्के स्मरणे वाक्यपूरणे।
परम् नियोगे चेपे च प्राध्वम् नम्रानुकूलयोः ॥६०।
सत्यम् प्रश्नेऽभ्युपगमे

मचतुष्कम्।

ऽवश्यम् नित्यप्रयत्नयोः।
अभीक्ष्णम् मुहुरत्यन्ते शीघ्रप्रकर्षयोरपि ॥६१॥
इदानीं वाक्यभूषायां सम्प्रत्यर्थे च दृश्यते।
तद्दिनम् दिनमध्ये स्यात् तथैव प्रतिवासरे ॥६२॥
साम्प्रतम् चाधुनार्थे स्यादुचितार्थे च दृश्यते।

यद्विकम्।

अयि प्रश्नानुनययोः स्यात् सम्बोधनेऽपि च ॥६३॥
अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च।

ख्या त्वप मङ्गले च पश्यशब्दस्तु विस्मये ॥६४॥
सायामपि तथा
यत्रिकम्।
समयाऽन्तिकमध्ययोः।
रैककम्।
प्रकर्षे गताद्यर्थेऽपि
रद्विकम्।
अरेऽपाकृत्यसूययोः ॥६५॥
थूरी चाप्युभौ शब्दौ विस्तारेऽङ्गीकृतावपि।
निषेधे च कष्टे च नि निर्णयनिषेधयोः ॥६६॥
रे स्यात् सर्व्वतोभावे वर्ज्जने व्याधिशेषयोः।
त्यम्भूताख्यानभागवीप्सालिङ्गनलक्षणे ॥६७॥
।पाख्याने निरसने पूजाव्यप्तोश्च भूषणे।
रा विमोक्षप्राधान्यप्रातिलोम्येषु धर्षणे ॥६८॥
।भिमुख्ये ,शार्थे च विक्रमे च गतौ वधे।
रा पुराणे निकटे प्रबन्धातीत भाविषु ॥६९॥
रः प्रेत्यव्योम्नि नाके चापि
रत्रिकम्।
अन्तः स्वीकारमध्ययोः।
श्नरा तु विनार्थे स्यात् मध्यार्थनिकटार्थयोः ॥७०॥

उररी उररी च विस्तारेऽङ्गीकृतौ त्रयम्
नहि निषेधोपमयोः प्रादुः प्राकाश्य इत्यं
सम्भाव्ये च प्रवृत्तौ च पुनरप्रथमे मतम्।
अधिकारे च भेदे च तथा पक्षान्तरेऽपि

नद्विकम्।

किलशब्दस्तु वार्त्तायां सम्भाव्यानुनयार्थयोः
खलु स्याद् वाक्यभूषायां जिज्ञासायाञ्च स
वीप्सामाननिषेधेषु पूरणे पदवाक्ययोः।

वैकक्रम्।

वा स्याद् विकल्पोपमयोः वितर्के पादपूर
समुच्चये च विस्मये नानार्थातीतयोरपि
वे स्यात् सम्बोधने पादपूरणेऽनुनयेऽपि च
वि नियहे नियोगे च तथैव पदपूरणे।
निश्चयेऽसहने ऐतावथाप्तिविनियोगयोः
ईषदर्थे परिभवे गुद्वायान्वनेऽपि च।
विज्ञाने (पद्विकम्)
अथैव चौपम्ये नियोगे वाक्यपूरणे ॥७७॥
अवधारणे च चार्गनियोगे च विनिग्रहे।

पद्विकम्।

उषा रात्रौ तदन्ते च, दोषा रात्रौ च त

ाड्, शीघ्रे भृशार्थे च

पञ्चकम्।

निकषाऽन्तिकमध्ययोः।

सैकाक्षम्।

...या भृशार्थानुमतिज्ञ ... सम्प्रद्विषु ॥७९॥

सद्विकम्।

...स् स्मरणेऽपाकरणे कोपसन्तापयोरपि।

...स्वभावने कोऽपि नि निषेधे च निश्चये ॥८०॥

...कथातीतयोर्मौस्तु सम्बोधनविषादयोः।

सत्रिकम्।

...ऽशाशब्द आख्यात स्त्वत्वर्णार्थयोरपि ॥८१॥

...ऽन्तर्हे तिर्य्यगर्थे निचैः स्वैराल्पयोर्मतम्।

...ऽग्रे प्रथमे भूयोऽधिकारे च पुनः पुनः ॥८२॥

...थोऽन्योन्यं रहोर्थे च शनैः स्वैरे शनैश्चरे।

सचतुष्कम्।

...भितः शीघ्रसाकल्यसम्मुखाभयतोऽन्तिके ॥८३॥

...थ... प्रथमे चाग्रे पुरतः प्रथमाग्रयोः।

...षु प्रातःकाले स्यात् तथैव धर्मवासरे ॥८४॥

हैकद्वय।

...स्यात् सम्बोधने पादपूरणे च विनिग्रहे।